P-971

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ श्रीप्रत्येकबुद्धचरितं ॥

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाळा )

वीरसंवत्—२४४६. विक्रमसंवत्—१९७६. सने—१९२०.

किं रु. ६–०–०

श्रीजैनभास्करोदय प्रिन्टिंग प्रेस. जामनगर.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीप्रत्येकबुद्धचरित्रं प्रारभ्यते ॥

( श्लोकबद्धं )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाला )

भुवि भविकजनालिप्रीणनार्थं वसंतः । कुशलकमलमालोल्लासहंसोपमानः ॥ प्रथमजि-
नवरेंद्रोऽन्येऽपि सीमंधराद्याः । शिवमिह ददतां ते सर्वसंघाधिराजः ॥ १ ॥ परमामोदसंपादि-
पादाय परमात्मने ॥ चिदानंदस्वरूपाय । तीर्थपाय नमः सदा ॥ २ ॥ यस्य पादद्वयांभोजे ।
भ्रमंति भ्रमरा इव ॥ सुरासुरनराधीशा—स्तं श्रीवीरजिनं स्तुमः ॥ ३ ॥ प्रभावविभवावासं ।
। प्रतिभादानदक्षिणं ॥ स्पृशामि शिरसा सौव—गुरुपादरजःकणं ॥ ३ ॥ करकंडवादिसाधू-

आ. श्री कैलाससागर सूरि ज्ञान मं.
श्री महावीर जैन आराधना केन्द्र
कोबा, जि. गां.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नां । वैराग्यरसहेतवे ॥ किंचित्प्रत्येकबुद्धानां । चरित्रं कीर्तयिष्यते ॥ ४ ॥ काहं मंदमति-
स्तेषां । क्व चरित्रं महात्मनां ॥ तदस्मि द्रमको मेरौ । ध्वजारोपणवांछकः ॥ ५ ॥ तथापि व-
चसां शुद्ध्यै । जन्मसाफल्यहेतवे ॥ तेषां प्रत्येकबुद्धानां । नाममात्रमिहोच्यते ॥ ६ ॥ एकैकं
कारणं दृष्ट्वा । प्रबुद्धाः स्वयमेव ये ॥ उच्यंते ते महात्मानः । प्रत्येकबुद्धसंज्ञया ॥ ७ ॥
शिष्या यस्य जिनेंद्रस्य । यावंतो हस्तदीक्षिताः ॥ तावंतस्तस्य तीर्थे स्युः । प्रत्येकबुद्धसाधवः
॥ ८ ॥ तत्तेषां कः समस्ताना—मपास्ताशेषकर्मणां ॥ पवित्राणि चरित्राणि । वचसा वक्तु-
मीश्वरः ॥ ९ ॥ तथापि सांप्रतं वीर—शासने पापनाशने ॥ सहैव जन्म दीक्षा च । ज्ञानं
निर्वृत्तिरापि यैः ॥ १० ॥ करकंडुश्च द्विमुखो । नमिराजो नगाह्नतिः ॥ इति नाम्ना प्रसिद्धा-
स्ते । महात्मानोऽजवन्निह ॥ ११ ॥ दृष्ट्वा गामिंद्रकेतुं च । वलयं चाम्रपादपं ॥ चत्वारो ग-
त्वरान् देहान् । ज्ञात्वा दीक्षां प्रपेदिरे ॥ १२ ॥ तत्रादौ कथ्यते वृद्ध—वृषजं प्रेक्ष्य तत्क्षणं
॥ प्रबुद्धस्य प्रसिद्धस्य । करकंडोः कथानकं ॥ १३ ॥ तथाहि—
जंबूद्वीपाभिधो द्वीपो । लक्षयोजनविस्तृतः ॥ चित्रं योजनकोटीना—माश्रयः शोभतेतरां

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust
श्री जै. धा. * कोबा *

॥ १४ ॥ तत्रास्ति दक्षिणे भागे । भरतक्षेत्रमुत्तमं ॥ षट्खंडमध्यखंडं य—दाश्चर्याय कथं न
तत् ॥ १५ ॥ भूभामिनीहृदि स्फार—हारलक्ष्मीसहोदरा ॥ वैरिवर्गकृताकंपा । चंपा तत्राभ-
वत्पुरी ॥ १६ ॥ यत्र प्रासाददंभेन । स्वयमेत्य सुराचलः ॥ चलध्वजाभुजेनास्ते । सुरानाकार-
यन्निव ॥ १७ ॥ वसंति यत्र राजानो । नवप्रासादनंदिताः ॥ परं यद्वैरिणश्चक्रु—र्नवप्रासाद-
नंदिताः ॥ १८ ॥ यत्र श्रीवासुपूज्यस्य । कल्पकल्याणपंचकं ॥ जगदानंदसंपादि । संजातं पा-
पवंचकं ॥ १९ ॥ तत्र राजा महान्यायी । प्रजायामतिवत्सलः ॥ स्वर्गे स्वर्गाधिप इव । दधि-
वाहन इत्यभूत् ॥ २० ॥ सुता चेटकराजस्य । नाम्ना पद्मावती सुता ॥ सर्वांतःपुरमुख्याभू—
द्राज्ञी तस्य महीपतेः ॥ २१ ॥ अन्यदा सा महादेवी । शुभस्वप्नेन सूचितं ॥ कुक्षौ सरोवरे
गर्भं । बभार कलहंसवत् ॥ २२ ॥ गर्भस्थार्भकमाहात्म्या—दुत्पेदे दोहदो हृदि ॥ रोचिर·
भ्रकगर्भस्थाद् । गृहे गृहमणेरिव ॥ २३ ॥ प्रौढमातंगमारूढा । नृपनेपथ्यभूषिता ॥ निजभ-
र्त्रा स्वहस्तेन । धृतछत्रपवित्रिता ॥ २४ ॥ ददाना बहुदानानि । शृण्वती मधुरध्वनिं ॥ विह-
रामि कदा हंत । स्वोद्यानेषु यदृच्छया ॥ २५ ॥ इत्येवं दोहदस्तस्या । यावन्नो पूर्यते तदा ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कृशदेहाऽभवत्कृष्ण–पक्षे चंद्रकलेव सा ॥ २६ ॥ अथ राज्ञान्यदा पृष्टा । प्रिये केनासि दुर्ब-
ला ॥ किं केनापि तवाज्ञेह । खंडिता मम मंदिरे ॥ २७ ॥ अथवा केनचिद्भद्रे । दूनासि
स्वजनेन किं ॥ व्याधिर्वाधिः शरीरं ते । सांप्रतं बाधतेऽथवा ॥ २८ ॥ साब्रवीद्विनयेनैवं । सं-
योजितकरांबुजा ॥ स्वामिंस्तव प्रसादेन । दुःखं मे नास्ति किंचन ॥ २९ ॥ परं गर्भप्रभावो-
त्थो । दोहदोऽयं हृदा सह ॥ देहं दहति हिमव–न्मालतीदलकोमलं ॥ ३० ॥ प्रिये पोपूर्यते
त्वको । दुःपूरोऽपि मनोरथः ॥ सुखसाध्यः कियानेष । इत्युक्त्वाभ्युत्थितो नृपः ॥ ३१ ॥ राजा-
थ जयनामानं । राजेव पूर्वपर्वतं ॥ आतपत्रं समादाया—रुरोह स्वमतंगजं ॥ ३२ ॥ शुभा-
कारैरलंकारैः । स्फारहारैरलंकृता ॥ सुभास्वरमणिश्रेण्या । भासयंती दिशो दश ॥ ३३ ॥ नृ-
पादेशात्समारुह्य । तं गजं गजगामिनी ॥ परीवारसमाकीर्णा । साचालीत्काननंप्रति ॥३४॥
युग्मं ॥ यशोनिदानदानानि । ददाना सा यथेप्सितं ॥ शुशुभे कल्पवल्लीव । शैलशृंगसमुत्थि-
ता ॥ ३५ ॥ अस्मिन्नवसरे नव्य–मेघवृष्ट्यनुभावतः ॥ सर्वतः सुरभिगंध । उच्छलदिलातला-
त ॥ ३६ ॥ तं तथाविधमाघ्राय । स्मृत्वा निजं महाटवीं ॥ मतंगजो मदोन्मत्तः ॥ स तत्क्ष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णमजायत ॥ ३७ ॥ शुंडादंडेन चंडेन । मूलादुन्मूलयंस्तरून् ॥ पश्यत्सु सर्वलोकेषु । स च-
चालटवींप्रति ॥ ३८ ॥ विकटाः सुभटास्तत्र । विचित्राः शस्त्रपाणयः ॥ समकालं गजं धर्तु-
मन्वधावंस्त्वरातुराः ॥ ३९ ॥ कांश्चिच्चरणघातेन । शुंडादंडेन कांश्चन ॥ कांश्चिद्दशनघातेन ।
दलयामास सोऽचिरात् ॥ ४० ॥ भटैरस्खलितगति—र्वेगवांश्चंडवायुवत् ॥ राज्ञीं राजानमादा-
य । स जगाम महाटवीं ॥ ४१ ॥ गच्छता चिरकालेन । भूभुजा मार्गमंतरा ॥ वटवृक्षोऽग्रतो
दृष्टः । शाखाभिः शोभितोऽभितः ॥ ४२ ॥ तेनोक्तं हे प्रिये हस्ती । वटाधस्ताद् व्रजेद्यदा ॥
तदा त्वया गृहीतव्या । लंबिता वटवल्लरी ॥ ४३ ॥ एवमुक्ते नरेंद्रेण । पद्मावत्यभ्यधादिति ॥
यदादिशति देवो मे । करिष्ये तदहं प्रभो ॥ ४४ ॥ वेगात्तत्र गजे प्राप्ते । लब्धलक्ष्यो नरेश्व-
श्वरः ॥ आललंबेऽविलंबेन । प्रलंबां वटवल्लरीं ॥ ४५ ॥ राज्ञी तु स्त्रीस्वभावेन । लब्धलक्ष्यत्व-
वर्जिता ॥ नाशकद्वल्लरीं धर्तुं । गजारूढैव निर्गता ॥ ४६ ॥ नरेंद्रोऽपि विलक्षात्मा । संभ्रांत-
नयनद्वयः ॥ स्फालच्युतो द्रुमालंबी । शाखामृग इवाभवत् ॥ ४७ ॥ गजपृष्ठे दधावेऽथ । मु-
ष्टिं बद्ध्वा नरेश्वरः ॥ गजस्तु वायुवद्गच्छं—स्तस्यादृश्योऽभवत्क्षणात् ॥ ४८ ॥ धावनेन प्रभू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेन । विषमचरणद्वयः ॥ स एवं चिंतयामास । किंचित्स्थित्वा स्वमानसे ॥ ४९ ॥ इतो म-
म प्रिया याति । पुरी दूरे नवेदितः ॥ हा हा करोमि किमहं—मितो व्याघ्र इतस्तटी ॥
॥ ५० ॥ अथवा शीलमाहात्म्या—त्स्वयमेव महासती ॥ एषा गृहं समेष्यति । किं क्लिशामि
मुधैव तत् ॥ ५१ ॥ एवं विचिंत्य राजाथ । चचाल स्वपुरींप्रति ॥ चंपायामागतो राज्यं । स
पूर्ववदपालयत् ॥ ५२ ॥ बहुमार्गं समुल्लंघ्य । तपनातपतापितः ॥ गजोऽथ सलिलापूर्णं । प्र-
विवेश सरोवरं ॥ ५३ ॥ स तत्र सलिलोल्लोलै—र्लोलैश्चिक्रीड शीतलैः ॥ पद्मावत्यपि सातंक
—मुत्ततार शनैः शनैः ॥ ५४ ॥ चंगं तरंगनंगीनि—र्गौरांगी सा पयोनरं ॥ तरंती राजहंसी-
व । निःससार सरोवरात् ॥ ५५ ॥ सापश्यदेकतो व्याघ्रान् । घुर्घुरारवनीषणान् ॥ एकतः
सिंहसंदोहान् । स्फारफूत्कारकारकान् ॥५६॥ एकतः प्रचलज्जिह्वान् । द्विजिह्वान् कृतफूत्कृतीन्
॥ सनल्लानेकतो जिल्लान् । यमदूतानिवापरान् ॥ ५७ ॥ युग्मं ॥ कांदिशीका नयोद्भ्रांता—
लोकयंती दिशो दश ॥ संत्रस्तहरिणीवासौ । रराज तरलेक्षणा ॥ ५८ ॥ निश्चेष्टा काष्ठवत्क-
ष्टा—न्मूर्छितां पतितां नुवि ॥ वातः सज्जनवन्नीतो । दुःस्थां सुस्थीचकार तां ॥ ५९ ॥ अवद-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुपयोधारा—पल्वलीकृतनूतला ॥ रुरोद प्रतिशब्देन । रोदयंती च रोदसीं ॥ ६० ॥ पद्मावतीं रुदंतीं ता—मवलोक्यैव पद्मिनी ॥ भ्रमद्भ्रमरझंकारै—ररोदीच्छ्यामलानना ॥ ६१ ॥ वातान्निघातधूताग्र—शाखाः सर्वेऽपि शाखिनः ॥ धूनयंति शिरांसीव । तस्या दुःखावलोकनात् ॥ ६२ ॥ रुदित्वा चिरकालं सा । विललापेति दुःखिता ॥ प्राणनाथ निराधारा । त्यक्तारण्ये कथं हहा ॥ ६३ ॥ अथवा प्राणनाथस्य । न दोषोऽयं यतस्तदा ॥ न मया प्रतिपद्यापि । गृहीता वटवल्लरी ॥ ६४ ॥ अहं गर्भवती बाला । भीरुचित्तात्र कानने ॥ एकाकिनी समानीता । दैव किं करुणा न ते ॥ ६५ ॥ मुहुर्मुहुर्महादुःखा—न्मुमूर्छ च रुरोद च ॥ करुणस्वरमत्यंतं । विलालापाप्यनेकशः ॥ ६६ ॥ अथ धैर्यं समालंब्य । सैवं चित्ते व्यचिंतयत् ॥ शोकं विवेकमुक्ताना—मुचितं किं करोम्यहं ॥ ६७ ॥ नानेकैः शोकसंतापै—र्न विलापैर्न रोदनैः ॥ कदाचिन्मुच्यते प्राणी । पुरातनकुकर्मणा ॥ ६८ ॥ मध्ये व्याघ्रादिजीवानां । कश्चिद्व्यापादयेद्यदि ॥ परलोकस्य पाथेयं । किंचिद्धर्मं करोमि तत् ॥ ६९ ॥ प्रपद्ये देवमर्हंतं । तथा चारित्रिणो गुरून् ॥ जिनेंद्रभाषितं धर्म—मेवं सम्यक्त्वमग्रहीत् ॥७०॥ अर्हंतः शरणं संतु । सिद्धा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्च शरणं मम ॥ साधवः शरणं शुद्ध-धर्मोऽस्तु शरणं मम ॥ ७१ ॥ आशिश्रयदसावेवं । चतुःशरणमंजसा ॥ पापान्यालोचयामास । निंदंती स्वं मुहुर्मुहुः ॥ ७२ ॥ क्षमयामि सर्वजंतून् । क्षाम्यंतु मयि जंतवः ॥ मैत्री समस्तभूतैर्मे । वैरं नो मम केश्चन ॥ ७३ ॥ क्षांत्वा च क्षमयित्वा च । शमसंवेगमागता ॥ सा साकारं तदा भक्त-प्रत्याख्यानमशिश्रयत् ॥ ७४ ॥ तथाहि—जइ मे हुज्ज पमाओ । इमस्स देहस्स इमाइ वेलाए ॥ आहारमुवहिदेहं । चरमे समयंमि वोसिरियं ॥ ७५ ॥ सिद्धिसीमंतिनीकंठे—दारहारसहोदरं ॥ परमेष्ठिनमस्कारं । दध्यौ ध्यानपरायणा ॥ ७६ ॥ नमस्कारप्रभावेण । व्याघ्रव्यालादयः समे ॥ पशवः स्तंभिता जाता-श्चित्रेषु लिखिता इव ॥ ७७ ॥ ततः सा निर्भया किंचि-ज्जपंती श्रीनमस्कृतिं ॥ एकां दिशं समादाय । प्रचचाल शनैः शनैः ॥ ७८ ॥ पदे पदे प्रस्खलंती । यावद् दूरं गता तदा ॥ एकं तापसमद्राक्षी-त्तपसा शोषितांगकं ॥ ७९ ॥ क्रमेण तस्य पार्श्वं गा-द्भाषितः सोऽथ किंचन ॥ पद्मावतीं पप्रछैवं । तापसो मधुरस्वरं ॥ ८० ॥ का त्वं कुतः समायाता । क्व वा यास्यसि केन मां ॥ आभाषयसि पृष्टैवं । सावदज्जदाक्षरं ॥ ८१ ॥ अहं चेटकराजस्य । नाम्ना पद्मावती

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सुता ॥ भार्या चंपाधिराजस्य । दधिवाहनभूभुजः ॥ ७३ ॥ चंपातोऽहं समायाता । गमिष्यामि च तां पुरीं ॥ विज्ञातुं स्वपुरीमार्गं । भवानाभाषितो मया ॥ ७४ ॥ अरण्ये किमिहायाता । तेनैवमुदिते सति ॥ साख्य दोहदात्सर्वं । स्ववृत्तांतमचीकथत् ॥ ७५ ॥ तापसः प्राह हे वत्से । स्वजातीयो भवेन्मम ॥ त्वत्पिता चेटको राजा । दिष्ट्या दृष्टासि सांप्रतं ॥ ७६ ॥ मा शोकं कुरु मारोदी—र्यतोऽपारे दुरुत्तरे ॥ संसारे संसरन् जीवः । क्वचिद् दुःखी क्वचित्सुखी ॥ ७७ ॥ सुघटं दुर्घटं कुर्याद् । दुर्घटं सुघटं पुनः ॥ तदेव घटयेद् दैवं । यन्मनुष्यो न चिंतयेत् ॥ ७८ ॥ कस्यापि न सुखं नित्यं । दुःखं कस्येह नागतं ॥ खंडितः को न दैवेन । संसारे संसरन् जनः ॥ ७९ ॥ शोकजन्मजरामृत्यु—वियोगरोगपूरितः ॥ पराभवैकप्रभवः । स्वभावाद्भव ईदृशः ॥ ८० ॥ अपारासारसंसार—पारावारनिरूपणं ॥ दुःखापनोदसंपादि । तापसेनेति निर्मितं ॥ ८१ ॥ अथ वनफलैर्वर्यै—रनिच्छंत्यपि कारिता ॥ सा तेनाग्रहमादाय । पारणं तृप्तिकारणं ॥ ८२ ॥ तस्याः स दर्शयन्मार्गं । तां निन्ये स जनावनिं ॥ परोपकरणे यत्नं । कुर्वते तीक्ष्णबुद्धयः ॥ ८३ ॥ अथाग्रे स भ्रमन् दृष्ट्वा । हलाकृष्टां वसुंधरां ॥ पद्मावतीमुवा-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

चैवं । वचसा प्रीणयन्मनः ॥ ए४ ॥ एतस्यां भुवि नास्माकं । गंतुं समुचितं भवेत् ॥ वत्से गछ यथेछं त्वं । नेतव्यं न कुतश्चन ॥एए॥ अत्र दंतपुरं नाम । पुरमस्ति समीपगं ॥ ततश्चं-पापुरीं नित्यं । सार्था गछंत्यनेकशः ॥ ए६ ॥ भवत्या तत्र गंतव्यं । सार्थेन सह केनचित् ॥ तव मार्गे शिवं भूया—दित्युक्त्वा ववलेऽथ सः ॥ ए७ ॥ सा पुनस्तेन मार्गेण । चलंत्यचि-रकालतः ॥ विवेकिलोकसंपूर्णं । प्राप दंतपुरं पुरं ॥ ए८ ॥ धर्मार्थिनी धर्मशालां । पृष्ट्वा ग-त्वा महासतीः ॥ विनयेन ववंदे सा । धर्मभूर्तीरिवांगिनीः ॥ एए ॥ क्रमेण सकलाः साध्वी-र्वंदित्वा भक्तिभाजिनी ॥ राज्ञी महत्तरापार्श्वे । समागत्य विवेश सा ॥ १०० ॥ दधार सं-पुटीकृत्य । सा मुखाग्रे करांबुजे ॥ स्वभाववैरतो वक्त्रें-दुना संकोचिते इव ॥ १ ॥ महत्तरा बभाणैवं । श्राविके कुत आगता ॥ धर्मध्यानसुधापानं । तापहृत्क्रियते न वा ॥ २ ॥ तदा प्रादुर्भवद्दुःखा । सा साश्रुनयनाजनि ॥ अभीष्टाभाषणात्कस्य । कष्टं शव्यति नो क्षणात् ॥ ॥ ३ ॥ तस्या मातुरिवाग्रे सा । कथामचीकथन्निजां ॥ गुरवो धर्मनिष्टानां । पितृमातृसमाः खलु ॥ ४ ॥ महत्तरा बभाषेऽथ । तस्या हृदयमंदिरं ॥ विरहानलसंतप्तं । शमयंती वचोऽमृतैः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५ ॥ उद्वेगः क्रियते कस्मा—न्न स्वकीयो हि कश्चन ॥ संसारे विद्यते कोऽपि । न हि क-
स्यापि वल्लभः ॥ ६ ॥ एष जीवो भवं भ्राम्य—न्नकार्षीत्सर्वजंतुभिः ॥ समस्तानपि संबंधां—
स्तल्लोकं कियतां धरेत् ॥ ७ ॥ माता पिता तथा भ्राता । भर्ता च स्वजनोऽपि च ॥ सर्वोऽपि
जायते वैरी । यदि स्वार्थो न सिद्ध्यति ॥ ८ ॥ एको निःकारणं बंधुः । सर्वकल्याणकारकः
॥ भवाब्धितारको धर्मः । स्नेहस्तत्र विधीयते ॥ ९ ॥ शरीरमस्थिरं लोके । संपदो विपदा-
स्पदं ॥ एक एव स्थिरो धर्मः । श्रयणीयो विचक्षणैः ॥ १० ॥ समीहितानि सिध्ध्यंति । ध-
र्माच्चिंतामणेरिव ॥ दृष्टांतस्तत्र विषये । पद्मावति विभावय ॥ ११ ॥ तथाहि—

आसीत्पुरा श्रीपुरनामधेयं । पुरं गरीयो नगरेषु श्रेष्टं ॥ तत्राभवद्भूमिपतिः प्रतापी । म-
हानयो नाम नयिकधाम ॥ १२ ॥ पुरे च तस्मिन् वसतिस्म धन्या— भिधस्तदा श्रेष्टीवरो ध-
नाढ्यः ॥ अनंगसेनाजितसेनसंज्ञा—वुभौ शुभौ तस्य सुतावभूतां ॥ १३ ॥ तयोः सखा को-
ऽपि पयोधिमार्गा—दुपार्ज्य वित्तं प्रचुरं समागात् ॥ तं वित्तवंतं धनदोपमानं । दृष्ट्वेति तौ
मंत्रयतःस्म तत्र ॥ १४ ॥ आवां न हट्टादिकमंडनेन । श्रियं कदाप्यर्जयितुं समर्थौ ॥ आरुह्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्मात्किल यानपात्रं । गत्वा विदेशं श्रियमर्जयावः ॥ १५ ॥ लक्ष्मीवतः कूटभृतोऽप्यदातुः । सर्वेऽपि लोकाः परितो भ्रमंति ॥ अहर्निशं चंद्ररविग्रहाः किं । प्रदक्षिणां मेरुगिरेर्न दद्युः ॥ ॥ १६ ॥ परस्परं ताविति मंत्रयित्वा । गत्वा च तातानुमतिं गृहीत्वा ॥ नानाधनोपार्जनहेतवे तौ । पयोनिधौ प्रयतःस्म पोतं ॥ १७ ॥ तस्मिन् वहित्रे धनिनोऽपरेऽपि । प्रक्षिप्य भांडान्यचटन्ननेके ॥ वाताभिघातैरथ तच्चचाल । रथो यथा सुंदरसौरजेयैः ॥ १८ ॥ पोते गतेंभोनिधिमध्यभागं । वायुर्ववौ कोऽपि महाप्रचंडः ॥ उदच्छलंस्तत्र च शैलशृंगो—त्तुंगास्तरंगाः कृतरंगभंगाः ॥ १९ ॥ इतस्ततो दोलयतिस्म पोत—स्तथांतरावर्तिजनस्य चेतः ॥ ब्रुडामि हा बांधव रक्ष रक्षे—त्याद्यारवस्तत्र निरंतरोऽभूत् ॥ २० ॥ अकार्षुरेते कुलदेवताया । नानाप्रकाराण्युपयाचितानि ॥ अस्मार्षुरन्ये प्रभुवीतरागं । रोगातुरा वैद्यमिवानवद्यं ॥ २१ ॥ शेवालजालैरिव नीलवर्णै—रंभोवडुन्मीलदगैः परीतः ॥ इवोपनीतः कुलदेवतभि—र्द्वीपो जनैस्तत्र गतैरदर्शि ॥ २२ ॥ बुभुक्षितैराम्रफलं रसालं । सारोवरं नीरमिवातपार्तैः ॥ इवांधकारे पतितैः प्रदीपं । द्वीपं तमालोक्य जनैरतोषि ॥ २३ ॥ निर्यामकास्तं तटिनीपतेस्तटं । नि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्युर्वहित्रं क्षणरक्षणाय तौ ॥ द्वीपं समालोकयितुं कुतूहला—त्सहोदरावुत्तरतःस्म पोतात् ॥२४॥
अथो मनोज्ञं वनमीक्षमाणौ । यावद्गतौ तौ सुचिरं विदूरे ॥ अपश्यतां तावदतीवतुंगं । प्रासाद-
मेकं कपिशीर्षचंगं ॥२५॥ वेध्यानुसाराद् द्विशिखाविवैतौ । कोष्टानुसाराज्जवतो व्रजंतौ ॥ आश्चर्यतो
विस्मरतः स्वपोतं । नवांतरं वा कलिकालवातात् ॥२६॥ ताभ्यामशब्दा नगरी निरैक्षि । वि-
शालशालोज्ज्वलयोगपट्टं ॥ प्रक्षिप्य चेष्टारहितोपविष्टा । ध्यानाधिरूढा वनयोगिनीव ॥२७॥
शून्यं पुरं लोकपरंपराभि—र्बुद्धिप्रपंचैरिव मूर्खचित्तं ॥ दृष्टं मणिश्रेण्यवभासमानं । निशीव
तारांकितमंतरिक्षं ॥ २८ ॥ ततःपरं हट्टपरंपरायां । धनेन धान्येन च पूरितायां ॥ प्राप्तौ क्र-
मात्तौ सहसं चरंतौ । कुहाविवाभ्राध्वनि चंद्रसूर्यौ ॥ २९ ॥ अपश्यतां वस्तुभिरंचितानि ।
शस्तैः समस्तैर्धनिनां गृहाणि ॥ ततश्च सत्तक्षणराजमानं । राजांगणं पर्वतराजमानं ३०। बालोऽपि
वृद्धोऽपि युवापि कोऽपि । नो मानवो लोचनगो वरोऽभूत् ॥ अचिंति ताभ्यामिति विस्मिताभ्या
—माश्चर्यविस्फारितलोचनाभ्यां ॥३१॥ लोकाः किमेतस्य पुरस्य सर्वे । क्वचित्प्रणेशुः परचक्र-
भीत्या ॥ किं राक्षसी कापि समस्त्यदूरे । ग्रस्तास्तया वा मनुजाः समस्ताः ॥३२॥ एवं विकल्पाद्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हृदये दधानौ । नरेंद्रगेहेऽचटतां नरौ तौ ॥ क्रमागतौ सप्तमभूमिकायां । सुवर्णमाणिक्यवि-
निर्मितायां ॥ ३३ ॥ सुस्फारशृंगारविराजमाना । मुखश्रिया निर्जितराजमाना ॥ शचीरति-
प्रीत्यनुरूपरूपा । शृंगारशृंगारसमस्वरूपा ॥ ३४ ॥ चक्षुर्द्वयस्यांजनरंजितस्य । कटाक्षविक्षेपण-
तः क्षणेन ॥ विक्षोजयंतीव मनोऽमराणां । प्रचंमवातादिव सागरांतः ॥ ३५ ॥ उत्थाय शय्या-
तलतः सलीलं । हे नाथ नाथेति मुदा वदंती ॥ कन्या मनोज्ञा विनयानतांगी । तयोर्द्वयोः
संमुखमाजगाम ॥ ३६ ॥ त्रिनिर्विशेषकं ॥ उवाच सा योजितपाणिपद्मा । निर्नायकाहं गम-
यांबजूव ॥ इहाद्ययावद्दिवसान्निरर्थान् । नाथारसक्षोज्झतमालतीव ॥ ३७ ॥ कृता सनाथाद्य-
दिने जवद्भ्यां । मत्पुण्ययोगेन समागताभ्यां ॥ तत्स्थीयतामत्र मया सहाहं । दासीव जा-
र्या जवतोर्जवामि ॥ ३८ ॥ इदं गरीयो नगरं समग्रं । तथा च धान्यानि धनान्यमूनि ॥ ए-
षा च कन्या सुकृतोपनीत—मिदं समस्तं जवदीयमेव ॥ ३९ ॥ श्रुत्वेति वाक्यानि तयोदि-
तानि । प्रमोदतोऽचिंतयतां हृदेति ॥ कन्यास्ति किं नागकुमारिकेयं । किं वामरी काप्यथ
मानवी वा ॥ ४० ॥ किं वानया चेतसि चिंतया नौ । नैवेदृशी क्वापि मृगेक्षणास्ति ॥ जक्ता-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नुरक्ता विनयेन युक्ता । कुर्वेंऽनया भोगसुखानुभूतिं ॥ ४१ ॥ भद्रे मुखश्रीजितपूर्णचंद्रे । वि-
लोक्यते केन न कोऽपि लोकः ॥ अस्मिन् पुरे धान्यधनालयेऽपि । पृष्टेति ताभ्यां निज-
गाद सैवं ॥ ४३ ॥ निशम्यतामत्र समस्त्यदूरे । महापुरं नाम्न पुरं महीयः ॥ तत्रास्ति लक्ष्मी-
तिलकाभिधानः । क्षोणीपतिः क्षीणरिपुप्रतानः ॥ ४४ ॥ तस्याभवं सप्तसुतोपरिष्टा–दहं सु-
ता रूपवती वरिष्टा ॥ उद्यौवना यत्रदिने सभाया—मागम्य तातांगमुपाविशं च ॥ ४५ ॥
अत्रांतरेऽष्टांगनिमित्तवेत्ता । समागतः संशयभावभेत्ता ॥ पृष्टः स राज्ञा मम पुत्रिकाया । अ-
स्या वरः को भविता वदैतत् ॥ ४६ ॥ स प्राह राजन् शृणु सावधानं । समुद्रतीरेऽस्ति पुरं
प्रधानं ॥ निष्कास्य तस्मान्मनुजान् समस्तान् । राजांगणे स्थापय तत्र पुत्रीं ॥४७॥ समेष्यतस्त-
त्र नरावुभौ यौ । भाव्यौ वरौ तौ तव पुत्रिकायाः ॥ राजाह नैमित्तिक मे सुतेय–मेका वरौ द्वौ
किमिदं त्वयोक्तं ४७ स प्राह नाश्चर्यमिदं नरेंद्र । यतो न भाव्यं ध्रुवमन्यथा स्यात् ॥ किं पांडुपुत्राद्द्रु-
पदात्मजायाः । पंचप्रमाणाः पतयः श्रुता न ॥४९॥ विसृज्य नैमित्तिकमुत्तमं तं । निर्वास्य लोकान्नग-
रादितश्च ॥ अस्थापयन्मामुपवेश्मनीह । विलोकयंतीं भवदागमार्थं ॥५०॥ समागतौ संप्रति तौ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवंतौ । नैमित्तिकोक्तौ प्रवरौ वरौ मे ॥ वृत्तांतमाकर्ण्य तयैवमुक्तं । बभूवतुस्तौ मुदितावतीव
॥ ५१ ॥ कन्या पुनः प्राह विभू भवद्भ्या—मवस्थितिस्तावदिहैव कार्या ॥ बहिर्न हि क्का-
पि कदापि गम्यं । नैवेदृशं क्कापि समस्ति रम्यं ॥ ५२ ॥ चतुर्दिशास्वस्य पुरस्य पार्श्वे । चत्वा-
रि विस्तारिवनानि संति ॥ विलोकनीयानि न तानि नित्यं । वनं विशेषादपि दाक्षिणात्यं ॥
॥ ५३ ॥ उक्त्वेति तौ स्नानविलेपनाद्यैः । सेष्टानि मिष्टानि च भोजयंती ॥ शुश्रूषयामास त-
था कथंचि—द्यतं यथैकक्षणवद्दिनेन ॥ ५४ ॥ गेहेऽपि किं वः गमनेन साध्यं । किं वा महा-
सागरलंघनेन ॥ अत्रैव भोगादिसुखानि संति । तत्र स्थितौ ताविति चिंतयित्वा ॥ ५५ ॥
क्षीणे मरुन्मोहमहाविकारे । पुमानिवापोपशमं पयोधिः ॥ प्रस्तावमासाद्य जनाः समस्ताः ।
प्रपूर्य पोतं स्वगृहाण्यवेयुः ॥ ५६ ॥ अथो द्वितीये दिवसे क्कचित्सा । जगाम बाला वचसा
रसाला ॥ कुतूहलान्निःक्षणिकौ क्षणेन तौ । निर्गतौ लोकयितुं वनानि ॥ प्राच्यामुदीच्याम-
पि च प्रतीच्यां । महीरुहैश्चंपकचूतमुख्यैः ॥ विराजमानानि वनानि ताभ्यां । यथाक्रमं तत्र
विलोकितानि ॥ ५७ ॥ अन्योन्यमालोचयतां ततस्तौ । मनोहराण्येव वनान्यमूनि ॥ दृष्टा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नि मेरोरिव नंदनाद्या — न्यानंदनार्थं भुवमागतानि ॥ ५९ ॥ अयोपमानेन वनं चतुर्थं। ना-
व्येव नव्यं न हि संशयोऽत्र ॥ चतुर्षु पादेष्वपि खद्विकायाः । संजायते किं विषमोऽपि को-
ऽपि ॥ ६० ॥ एकेन सिक्थेन विलोकितेन । स्थाल्याः स्वरूपं सकलं विदंति ॥ निषेधयामास
तथापि कस्मा—द्वने चतुर्थे गमनं प्रिया सा ॥ ६१ ॥ अन्यावहे किंचिदतीवचर्यं । वेविद्यते
तद्विपिनं हि तूर्यं ॥ तत्कौतुकं तत्र विलोकयावः । प्रायो निषिद्धे बहुला दिदृक्षा ॥ ६२ ॥
सहोदरौ ताविति मंत्रयित्वा । प्रचेलतुर्दक्षिणदिग्वनाय ॥ तदैव गंधो दुरभिः समागा—द्घ्रा-
णेंद्रियामोटनहेतुभूतः ॥ ६३ ॥ क्वचित्कपालं क्वचिदस्थिजालं । क्वचित्करालां नररुंडमालां
॥ क्वचित्प्रवालं कलिलप्रणालं । कंकालवेत्तालकुलं क्वचिच्च ॥ ६४ ॥ क्वचिच्छृगालैः क्षुधया क-
रालैः । काकैश्च कोलाहलतो मिलद्भिः ॥ आस्वाद्यमानानि कलेवराणि । निरैक्षिषातां विपि-
ने व्रजंतौ ॥ ६५ ॥ युग्मं ॥ किंचिद्बिभीतौ चकितौ च किंचित् । किंचिच्चलंतौ क्रमतो वनां-
तः ॥ जीवंतमेकं नरमैक्षिषातां । विषार्दितं खादितपादजंघं ॥६६॥ दृष्ट्वा तदा सन्मुखमा-
गतौ तौ । हाहेति कुर्वन् स नरो जगाद ॥ बुभुक्षितस्येव मृगाधिपस्य । मुखे भवंतौ कि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मिहागतौ स्तः ॥ ६७ ॥ अजागरीद्वा प्रतिकूलदैवं । प्राप्तौ युवामुत्कटसंकटे यत् ॥ दैवेऽनुकूले निकटेऽपि तत्त्व । किमंधकारं सति नास्वति स्यात् ॥ ६८ ॥ तयोर्वचस्तत्तुदतिस्म चित्ते । क्षारस्य निक्षेप इव क्षतेषु ॥ अपृच्छतां कंपितकाययष्टी । प्रचंडवाताहतवल्लितुल्यौ ॥ ६९ ॥ इदं गरीयो नगरं किमस्ति । का सा च कन्या किमिदं वनं च ॥ केऽमी जनाः केन निपातिताश्च । कोऽयं भवान् बांधवकल्पजल्पः ॥ ७० ॥ नरः स मंदस्वरमित्युवाच । नार्योऽवधार्याः सकला अनार्याः ॥ या ज्वालयंत्यो ननु जातरूपं । कांतं लभंते ज्वलनाद्विशेषं ॥ ७१ ॥ विमोह्य चेतांसि शरीरकांतिं । सुवर्णरूपामिव दर्शयित्वा ॥ नरान् सलोभान् शलभोपमाना । दहत्यहो दीपशिखेव नारी ॥ ७२ ॥ स्त्रियो रमंते मनसान्यपुंसा । वाचापरेण क्रिययापरेण ॥ सूर्यप्रिया किं तलिनी न हंसैः । संगं च भृंगैः कुरुतेंतरंगं ॥ ७३ ॥ प्रचंडपाखंडकरंडभूता । रंडाः समस्ता अपि संति लोके ॥ विशेषतोऽस्या नगरस्थितायाः । नार्याः स्वरूपं शृणुतां भवंतौ ॥ ७४ ॥ इदं पुरं रत्नपुराभिधान—मनेकपौरैः परिपूर्णमासीत् ॥ अथात्तरत्नैरिव रत्नराशी—रोचिः प्रपंचैरिव चंद्ररोचिः ॥ ७५ ॥ तत्रांग्यभाग्यादुदपादि राक्षसी । कांता-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

रत्नूभौ विषवल्लीवन्नवा ॥ सानीय पापा नगरस्य मानवा—नस्मिन् वने क्रूरमना व्यनाशयत् ॥ ७६ ॥ धनेषु धान्येष्वपि सत्सु पापा । वांछत्यसौ मानवमांसमेव ॥ अत्येव मिष्टान्नमपास्य विष्टां । न रासभः किं करभः शमीं वा ॥ ७७ ॥ नरान् समस्तानपि भक्षयित्वा । पुनर्बुभुक्षा-कुलकुक्षिरेषा ॥ विधाय रूपं नवकन्यकाया । मायावती तिष्ठति भूपगेहे ॥७८॥ जलात्स्थलो-च्छा समुपेत्य तस्या—मुन्निद्रमुख्यामनुरज्यते यः ॥ अत्यल्पकालाद्भजते स मृत्यु—र्मलिर्नलि-न्यामिव गंधलीनः ॥ ७९ ॥ सुभोजनस्नानविलेपनाद्यैः । प्रपोष्य सा सप्तदिनानि यावत् ॥ वि-नाशयत्यत्र वने मनुष्या—नजान् महायज्ञ इव द्विजाली ॥ ८० ॥ स्थलाध्वनाभूवमिहागतोऽ-हं । साश्चर्यनेत्रो नगरे मृगाक्षः ॥ मां हावभावैः कपटस्वभावै । राक्षस्यरक्षद् हृदयं प्रतार्य ॥ ८१ ॥ प्रपोष्य मे सप्तदिनानि देह—माजंघमस्मिन् विपिने चखाद ॥ क्षणादथो एष्यति भो-क्ष्यते च । कायं महाक्रंदकृतोऽपि शेषं ॥ ८२ ॥ एवं स्वरूपं सकलं निशम्य । मुमूर्छतुर्भीति-वशंवदौ तौ ॥ समीरणक्षेपणतो नरः स । आश्वासयामास कृपाप्रपात्रः ॥ ८३ ॥ किं कोऽप्यु-पायो वरिवर्त्ति तात—ग्येनोत्कटात्संकटतस्त्रुटिः स्यात् ॥ ताभ्यां स पृष्टः पुनरेवमाह । स्वरे-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ण कूपादिव निर्गतेन ॥ ७४॥ नयं नवदृन्यां बहु नो विधेयं । यतोऽस्त्यदूरादिह तीर्थमेकं ॥ पीयूषवापीव मरुस्थलीषु । निदाघकाले सलिलप्रपेव ॥ ७५ ॥ तत्रास्ति यक्षः किल धर्मराजो । दुष्टेषु साक्षादिव धर्मराजः ॥ अत्रोपकारी हयरूपधारी । समेत्यसौ सततमसतमेऽह्नि ॥७६॥ राजांगणाभ्यर्णमुपेत्य यक्ष । उच्चैःस्वरेणेति करोति शब्दं ॥ जलात्स्थलाद्वा य इहागतः स्या-त्पृष्टं समारोहतु सोऽवतीर्य ॥७७॥ एषास्ति कन्या न हि किंतु राक्षसी । जनान् हनिष्य-त्यनुरज्य भोजनैः ॥ निघ्नंति मत्स्यान् किमु मत्स्यबंधका । आलोच्य मांसैर्व्रत नो दुराशयाः ॥ ७७ ॥ यक्षोक्तमेवं वचनं निशम्य । राजांगणाद्यो मनुजोऽवतीर्य ॥ तमश्वमारोहति साह-साद्य-स्त्रुटत्यतो दुर्घटसंकटात्सः ॥ ७ए ॥ दिनद्वयात्पूर्वमिहागतोऽजू-श्रीधर्मराजान्निधय-क्षराजः ॥ अथो पुनः पंचमवासरे स । समागमिष्यत्यनुराजवेश्म ॥ ए० ॥ तत्पृष्टनागश्रय-णं विधेयं । नार्युक्तवाक्ये हृदयं न देयं ॥ आलानबंधं लभते न हस्ती । चेद्धस्तिनीसंगमला-लसमुखः स्यात् ॥ ए१ ॥ तत्पृष्ठनागोपरि संस्थितान्नो । जनानुपद्रोतुमसौ समर्था ॥ किमद्रि-शृंगोपरि वर्तमाना-नाक्रामति क्रूरमतिर्मृगारिः ॥ ए२ ॥ सा राक्षसी चाटुवचांस्यनेकशो ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भृशं वदंती कपटे पटीयसी ॥ अनुव्रजंती भवतोर्न चक्षुषा । निरीक्षणीया क्षणमात्रमप्यहो ॥ ९३ ॥ क्षुब्धं तया चेद्गुवयोर्नचेतः । स्वैर्हावभावैः पटुचाटुभिश्च ॥ भयंकरं रूपमतीव कृत्वा । कृत्यानुधाविष्यति भापनार्थं ॥ ९४ ॥ परं भवद्भ्यां न भयं विधेयं । श्रीयक्षपृष्टे त्वधिरूढवद्भ्यां ॥ मतंगजस्कंधतलाधिरूढं । शुनी किमुच्चाटयितुं पटुः स्यात् ॥ ९५ ॥ अयं ह्युपायस्त्रुटने समस्ति । स पंचमे वासर एव कार्यः ॥ परं चिरं न स्थितिरत्र साध्वी । यतोऽथ सैष्यत्यचिरादिहैव ॥ ९६ ॥ भो भो भवंतौ व्रजतां त्वरेण । तस्याः पुरोऽत्रागमनं न प्रोच्यं ॥ ज्ञास्यत्यसौ चेद्गुवयोः स्वरूपं । विनाशयिष्यत्यधुनैव तर्हि ॥ ९७ ॥ हृद्येव धार्या हृदयस्य वार्ता । चेष्टाः समाः पूर्ववदेव कार्याः ॥ धूर्तेन लोकेन समं हि धूर्तै-र्विजीयते नो सरलैः कदापि ॥ ९८ ॥ तथा पिशाच्या सह दंभवत्या । भाव्यं भवद्भ्यामपि दंभवद्भ्यां ॥ किं वा विधत्तेंजनमंजनस्य । बको बकस्याप्यनलोऽनलस्य ॥ ९९ ॥ सुधासमानैर्मधुरैः प्रधानैः । सा वंचनीया वचनप्रपंचैः ॥ पूरस्तटिन्या न तरून् क्षिणोति । किं स्वादुभिः शीतलवारिवारैः ॥ ॥ १०० ॥ कार्यं मुखांभोजविराजितायां । तस्यां सरस्यामिव संवसद्भ्यां ॥ चेतो भवद्भ्यां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खलु निर्विकल्पं । सा नो नवेत्संशयमंकिता यथा ॥ १ ॥ एवंविधां तस्य नरस्य शेषां । गुरोः
सुशिष्याविव तौ निशम्य ॥ श्रद्धां दधानौ पवनोपमान—वेगव्रजाद्व्रजतुः पुरांतः ॥ २ ॥
आरुह्य राजांगणसप्तमक्षणं । शय्यातले पूर्ववदेव तस्थतुः ॥ क्षणांतरे तत्र च सापि सर्पिणी
—समा समागादतिदुष्टमानसा ॥ ३ ॥ यथा दर्दुरौ सर्पसर्पप्रियायाः । यथा मूषकौ सह मा-
र्जारिकायाः ॥ शृगालौ यथा सक्षुधो व्याघ्रिकाया । बिन्नीतौ तथा दर्शनादेव तस्याः ॥ ४ ॥
ईषज्जहसतुः स्मेर—वदनौ माययाथ तौ ॥ सापि मायावती तस्था—वालिंग्य स्नेहविह्वला
॥ ५ ॥ विलासहासलासाद्यै । रज्यते न मनस्तयोः ॥ विषवृक्षफलं ज्ञातं । सरसत्वात्किमद्य-
ते ॥ ६ ॥ अप्यंतर्गोपितात्तापा—त्तयोर्विज्ञायताज्नवत् ॥ किमु कोटरसंस्थेऽग्नौ । तरुर्नवति
शाक्वलः ॥ ७ ॥ गोप्यीकृतोऽपि संताप—स्तयोः किंचित्स्फुटोऽभवत् ॥ जस्मनाछादितोऽप्य-
ग्नि—रीषत्तापं तनोति यत् ॥ ८ ॥ योगिनः परमात्मानं । चक्रवाका दिवाकरं ॥ चकोरा इव
शीतांशुं । मयूरा इव वारिदं ॥ ९ ॥ हंसा इव शरत्कालं । वसंतं वनराजिवत् ॥ पुमांसौ
तावतीवेष्टं । यद्भागमनमैहतां ॥ १० ॥ युग्मं ॥ वार्तालापकलापेषु । सचेतचेतसावुन्नौ ॥

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

श्री. जै. सा. * कोबा *

ददतुः शून्यहुंकारं । पुरंध्र्याः पुरतस्तदा ॥ ११ ॥ संसर्गजा गुणा दोषा । इति सत्यापयंत्यभू-
त् ॥ चेतोवृत्तिस्तयोः शून्या । शून्यतद्रंगसंगतः ॥ १२ ॥ तत्र शय्यातले नैव । लेभाते तौ
धृतिं क्वचित् ॥ मत्स्या इवाल्पपानीये । मत्कुणा आतपे यथा ॥ १३ ॥ प्रीत्यालिंगितदेहत्वा–
त्सापत्न्यादिव वैरतः ॥ न बुभुक्षा न निद्रा च । तयोः संनिधिमागमत् ॥ १४ ॥ तयोर्भयशि-
लापट्ट—रुद्धचेतोंतरालयोः ॥ मुखप्रक्षिप्तमप्यन्न–मधस्तादुत्ततार नो ॥ १५ ॥ राक्षस्यूचेऽथ
साशंका । भो भवंतौ कुतूहलात् ॥ अभूतां किं गतौ क्वापि । वनादिस्थानके बहिः ॥ १६ ॥
अहो निर्घृणतामुष्या । अहो कपटपाटवं । लक्ष्मीतिलकपुत्र्यस्मी—त्याव्यलीकं जगौ हि
या ॥ १७ ॥ आवयोः सहचारी हि । कोऽप्यस्ति पुण्यबांधवः ॥ येन तत्र वने नीता–वावां
कौतुककैतवात् ॥ १८ ॥ येन पीडातुरेणापि । वाक्यदीपेन कूपिका ॥ एषा स्फुटीकृता तं हि
। हितं मन्यामहे नरं ॥ १९ ॥ अवगण्य निजां पीडां । संतो जंतूपकारिणः ॥ तिष्टंतोऽप्या-
तपे वृक्षा । लोके छायां वितन्वते ॥ २० ॥ राक्षस्येषा भवत्येव । नरेण प्रतिपादिता ॥ मा-
ज्ञासीत्तत्र गमनं । हसंताविति हेतवे ॥ २१ ॥ बुटिष्यावः कथं हा हा । संकटाद्विकटादतः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ध्यायंताविति चेतोंत–रूचतुर्माययेति तां ॥२२॥ षड्भिः कुलकं ॥ आवाभ्यां न प्रिये किंचि–त्त्व-
न्निषिद्धं विधीयते ॥ मर्यादया निषिद्धोऽपि । स्थाने किं याति वारिधिः ॥२३॥ अथ सा कन्यको-
वाच । भो भोः प्राणप्रियौ कुतः ॥ विज्ञायते शरीरे वां । भोजनं च न रोचते ॥२४॥ तावूचतुः प्रिये
कल्ये । सुस्निग्धं मोदकादिकं ॥ भुक्तं बहुतरं तेन । विद्यतेऽद्योदरव्यथा ॥ २५ ॥ व्यथायाः
संगतो दीप—शिखाया इव सांप्रतं ॥ श्याममलिनांजनेनेव । व्याप्तेयं तनुरस्ति नौ ॥ २६ ॥
भुक्तेन बहुना नाथ । जाठरोऽग्निर्विजृंभते ॥ एधोभिर्बहुभिः क्षिप्तै—रल्पो विध्याप्यतेऽनलः
॥ २७ ॥ एवमादिप्रकारेण । तस्मिन् वदति नृद्वये ॥ कृत्याचेतोऽभवत्तुष्टं । शांते वायाविवांबु-
धिः ॥ २८ ॥ पंचाब्दानीव पंचाथ । वासरा ऐयरुः क्रमात् ॥ यक्षः श्रीधर्मराजाख्यः । समा-
गादश्वरूपभाक् ॥ २९ ॥ मनुष्यवाचा सोऽवोच—ज्जलस्थलमयाध्वनः ॥ योऽत्रागतो भवेन्मु-
ग्धः । स पृष्टे मेऽधिरोहतु ॥ ३० ॥ राजांगणस्थिता नैषा । मानवी किंतु राक्षसी ॥ विश्व-
स्तान् मानवानेषा । विनाशयति निश्चितं ॥ ३१ ॥ त्वक्सारां कूटहेमाभां । दर्शयंत्यां तनुप्र-
भां ॥ अस्यां कल्याणमिच्छद्भि—र्मा विश्वासो विधीयतां ॥ ३२ ॥ अनया सह यः स्नेहं । करि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्यति स नंद्यति ॥ कुर्वाणं वह्निना स्नेहं । तत्क्षणं भक्षणं यथा ॥ ३३ ॥ कृता अपि गुणा नीचे । भवंति दुःखहेतवे ॥ तन्वत्यपि गुणांस्तंतुः । पूर्णिकायाः क्षयाय यत् ॥ ३४ ॥ यत्र तत्र न हि स्नेहः । करणीयो विचक्षणैः ॥ तिला यंत्रेण पीड्यन्ते । सर्वत्र स्नेहकारिणः ॥३६॥ इत्येवं तस्य वाक्यानि । श्रुत्वा तौ मुदितौ हृदि ॥ हुं स एव समायातो । यक्षराजो दयानिधिः ॥ ३७ ॥ उत्तरीतुमथो लग्नौ । तत्क्षणं सप्तमक्षणात् ॥ भोजनार्थी कथं तिष्ठे—त्सादरं चेन्निमंत्रितः ॥ ३८ ॥ नाथ नाथेति जल्पाका । तन्वती प्रेम कृत्रिमं ॥ देहछायेव संजाता । सा तयोः सहचारिणी ॥ ३९ ॥ यक्षप्रभावतः कृत्या । न तयोर्गतिमस्खलत् ॥ मेघे सति नदीपूरः । स्खल्यते किं शिलादिभिः ॥ ४० ॥ उत्तीर्य भूपतेर्गेहा—द्वेगवंतौ च वायुवत् ॥ आरोहतां हयाकार—धारकं यक्षनायकं ॥ ४१ ॥ यक्षश्चचाल वेगेन । तावादाय दयामयः ॥ अन्वायाता पिशाची सा । हावभावान् वितन्वती ॥ ४२ ॥ उल्लापानुगवंती । विलापानि च तन्वती ॥ चक्षुर्भ्यां सकटाक्षाभ्यां । सेक्षमाणा निरंतरं ॥ ४३ ॥ तस्मितं किं त्यजेन्मेघः । कौमुदीशश्च कौमुदीं ॥ दिवा दिवाकरः किं वा । रतिप्रीति किमंगजः ॥ ४४ ॥ तन्मामेका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किनीं त्यक्त्वा । युवाभ्यां गम्यते कथं ॥ कूपछायैव ही व्यर्था । यौवनश्रीर्युवां विना ॥४५॥
गमयिष्यामि हि जन्म । कथं ह्येकामपि क्षपां ॥ पद्मिनी गमयेत्कष्टा–त्पद्मिनीस्वामिनं विना
॥ ४६ ॥ युवामनुगमिष्यामि । स्वप्रियौ विमुखावपि ॥ विमुखस्यापि सूर्यस्य । छाया किं ना-
नुगामिनी ॥ ४७ ॥ निशां त्यक्त्वा निशानाथो । वासरं नासुरं भजन् ॥ शुष्कपिप्पलपत्राभः
। कलावानपि दृश्यते ॥ ४८ ॥ सुतरां यामिनीतुल्यां । नामिनीं विरहातुरां ॥ नवद्भ्यां सुख-
मिच्छद्भ्यां । हित्वेतो गम्यते कुतः ॥ ४९ ॥ एषोऽश्वोऽश्वो न यक्षो नो । किंवत्सौ दुष्टराक्ष-
सः ॥ प्रतार्य मानवान्नित्यं । निजस्थाने विनाशयेत् ॥ ५० ॥ चतुर्थे विपिने ह्यस्य । मायास्था-
नं प्रवर्तते ॥ अनेके मारिता मुग्धा–स्तेन वां विप्रतारितौ ॥ ५१ ॥ युवयोर्गतयोस्तत्र । मा-
कार्षीत्स प्रतारणं ॥ अत एव मया पूर्वं । निषिद्धं गमनं वने ॥ ५२ ॥ इति नार्या वचः श्रु-
त्वा । हावभावैर्दिशन्मनः ॥ अनंगव्याकुलस्वांतो—ऽनंगसेनो व्यचिंतयत् ॥ ५३ ॥ अश्वेन
राक्षसीत्येषा । कन्यका प्रतिपाद्यते ॥ राक्षसश्चानयाश्वोऽयं । सत्यं किमुनयोस्ततः ॥ ५४ ॥
एषापी नस्तनी स्वर्ण—सवर्णा वरवर्णिनी ॥ कोमला कदलीवांगे—रुत्पलोत्फुल्ललोचना ॥५५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अश्वस्त्वदृष्टपूर्वोऽसौ । वाक्याद्यक्तोऽवगम्यते ॥ राक्षसोऽसौ भवेच्चेत्त—द्विश्वासो न विधीयते ॥ ५६ ॥ धनधान्येन संपूर्णं । पुरं दृष्टं मया पुरा ॥ अदृष्टपूर्वसंस्थाने । न जानेऽयं क्व नेष्यति ॥ ५७ ॥ अथवा वचनं तस्य । नरस्य न भवेन्मृषा ॥ अथवा दैवतीं मायां । को वा विज्ञातुमीश्वरः ॥ ५८ ॥ इति संदेहसंदोह—दोलांदोलितमानसः ॥ गिरेरिव महालोष्टो । यक्षपृष्टात्पपात सः ॥ ५९ ॥ अनंगसेनमादाय । सा लक्ष्यं गृध्रपक्षिवत् ॥ उड्डीय स्वाश्रयं नीत्वा । शूलायामध्यरोपयत् ॥ ६० ॥ देवताशक्तिमाहात्म्या—द्वेगाद्यक्षानुगामिनी ॥ द्वितीयं पुनरेत्याहा—जितसेनं जितेंद्रियं ॥ ६१ ॥ अथ नाथ कथं भावी । बांधवस्ते त्वया विना ॥ सुखीस्यात्कुमुदं किं वा । विना कुमुदबांधवं ॥ ६२ ॥ एकोदरसमुत्पन्न—देहयोर्मरणं हहा ॥ भारंडपक्षिवद्भावि । भवतोर्भिन्नचेतसोः ॥ ६३ ॥ मूढो न मन्यतेऽन्योक्तिं । न जानाति स्वयं पुनः ॥ राक्षसे कुरुते श्रद्धां । किं हा दैव करोम्यहं ॥ ६४ ॥ तस्या इत्यादिवाक्येन । चलितं नो मनो मनाक् ॥ उन्मूलिततरुर्वायुः । किं मेरुमपि चालयेत् ॥ ६५ ॥ अयं हावैरभिन्नोऽपि । भेत्स्यते भापकाकृतेः ॥ अभेद्यमपि पानीयैः । स्वर्णमग्नेर्द्रवीभवेत् ॥ ६६ ॥ विचिंत्येति स्फु-

P.P. Ac. Gunratnasuri M.S.　Jun Gun Aaradhak Trust

दीचक्रे । कृत्वा रूपं भयानकं ॥ क्व रे यासीति जल्पाका । धावंती सा त्वरातुरा ॥ ६७ ॥ बुबुत्काराक्रामकुदिश्वा—ट्टट्टहास्यानि कुर्वती ॥ प्रसारितकरायसी—च्छ्यामला मुक्तलालका ॥ ॥ ६८ ॥ तडिद्वत्सज्वलत्कारां । करद्रुधिरशोणिता ॥ भीषणां यमजिह्वाव—द्दधाना क्षुरिकां करे ॥ ६९ ॥ त्रिभिर्विशेषकं ॥ तथाप्यजितसेनस्य । मनः क्षुब्धं न किंचन ॥ वज्रं किं शक्यते भेत्तुं । वारिणा वह्निनापि वा ॥ ७० ॥ सा निष्फलप्रयासाथ । जगाम यमदिग्वने ॥ अनंगसेनं साक्रंदं । जघान घननिर्दया ॥ ७१ ॥ क्षेमेणाजितसेनं तं । महासाहसिनं क्रमात् ॥ यक्षराजः समादाया—यातोऽसौ जनसद्मनि ॥ ७२ ॥ निस्तुलं साहसं तस्य । ज्ञात्वा यक्षोऽनुरंजितः ॥ आविश्चक्रे निजं रूपं । चलत्कुंडलमंडलः ॥ ७३ ॥ सोऽवादीत्त्वं प्रसन्नोऽस्मि । याचस्व त्वं यथेप्सितं ॥ अद्य यावन्मयान्यो नो । कोऽपि दृष्टो भवादृशः ॥ ७३ ॥ विमृश्याजितसेनस्तं । चिंतामणिमयाचत ॥ सर्वे सिध्ध्यंति येनार्था—स्तदिछंति विचक्षणाः ॥ ॥ ७४ ॥ अथ प्रसन्नचित्तः स । तस्मै वांछितपूरकं ॥ श्रीमच्चिंतामणिं दत्वा । यक्षराजस्तिरोदधे ॥ ७५ ॥ उपवासत्रयं कृत्वा—जितसेनः सुरार्पितं ॥ चंदनादिभिरभ्यर्च्य । चिंतामणि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मसाधयत् ॥ ७६ ॥ चिंतामणिप्रन्नावेण । सुरणत्किंकिणीरवं ॥ अमूल्यरत्नखचितं । दीप्यमानं दिनेशवत् ॥ ७७ ॥ अवतीर्णमिव स्वर्गाद् । ध्वजव्रजविराजितं ॥ दिव्यं विमानमानंदिवांगमात्रादवाप सः ॥ ७७ ॥ युग्मं ॥ तत्र सिंहासनासीनः । स तस्थौ देवराजवत् ॥ चामरिरमरीनिश्च । वीज्यमानो निरंतरं ॥ ७ए ॥ उच्छ्रितछत्ररोचिष्णु—रलंकारैरलंकृतः ॥ देवतागीतगीतानि । शृएवन् पश्यंश्च नाटकं ॥ ७० ॥ श्रीपुरे नगरे गछ । हे विमानेति चिंतनात् ॥ चचाल दिवि तद्वेगा—द्भासुरं सूर्यबिंबवत् ॥ ७१ ॥ अचिरेण समायातं । विमानं श्रीपुरोपरि ॥ द्विधाकृततनुर्नानु–र्बृहद्भानुः किमेष वा ॥ ७२ ॥ तिर्यग्याति दिनाधीश । उर्ध्वं वा ज्वलनो ज्वलेत् ॥ पतत्येतत्पुनर्ज्योति–स्तदेतत्किं विचार्यते ॥ ७३ ॥ इतीक्षमाणं साश्चर्य–मुन्मुखैर्नागरैर्जनैः ॥ धन्यस्य श्रेष्टिनां श्रेष्ट—स्योत्ततार गृहांगणे ॥ ७४ ॥ त्रिन्निर्विशेषकं ॥ धन्योऽयं धन्य एवाख्या—निधानेन गुणेन च ॥ विमानागमनाऊन्यो । जनैरिति ततः स्तुतः ॥ ७५ ॥ उत्तीर्याजितसेन आदरनरात्तस्माद्विमानात्स्वयं । श्रीतातांह्रिपयोरुहे भ्रमरवद्भक्त्यासिषेवे ध्रुवं ॥ माताप्याप परां मुदं सुरसमं दृष्ट्वा निजं नंदनं । इत्थं रंगनरेण पूर्णमनवत्तू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्णं स्फुरत्तोरणं ॥ ७६ ॥ सुवर्णं धनधान्यढ्यं । यद्यच्चेतोऽभिचिंतितं ॥ चिंतामणिप्रभावेण । तत्सर्वं तस्य सिद्ध्यति ॥ ७७ ॥ एतत्कथोपमानेन । संसारस्य शिवस्य च ॥ स्वरूपं विद्यते तच्च । पद्मावति निशम्यतां ॥ ७८ ॥ संसारो धनधान्याढ्यः । शून्यपत्तनसन्निभः ॥ चतुर्भिर्विपिनैस्तुल्या—श्चतस्रो गतयो मताः ॥ ७९ ॥ वनेन दाक्षिणात्येन । सदृशी नारकी गतिः ॥ तत्र ये नारका जीवा—स्ते पुनर्मृतकैः समाः ॥ ८० ॥ राक्षसीसदृगस्त्येषा । संसारे मोहवासना ॥ तस्यां मुह्यति यो मर्त्यो । मृत्युमाप्नोत्यनेकशः ॥ ८१ ॥ ताभ्यां सहोदराभ्यां च । समाः सर्वेऽपि मानवाः ॥ श्रीधर्मराजयक्षेण । समानः सद्गुरुः स्मृतः ॥ ८२ ॥ सप्ताहोरात्रसदृशं । मनुष्यायुः प्रकीर्तितं ॥ आश्रयः श्रेय इच्छद्भि—स्तस्मिन् सत्येव सद्गुरौ ॥ ८३ ॥ चिंतामणिसमः सम्यक् । चारित्रं धर्म उच्यते ॥ श्रीपुरेण श्रियां धाम्ना । सदृक्षो मोक्ष ईष्यते ॥ ८४ ॥ यः श्रयेत न मूढात्मा । मोहवासनयानया ॥ गुरुं हितगिरं सोऽयं । सहते नरकेष्ववशं ॥ ८५ ॥ आश्रित्यापि गुरुं चित्ते । संदेहं कुरुते मनाक् ॥ अधो निपतितः सन् स । शोचतेऽनंगसेनवत् ॥ ८६ ॥ गुरुमाश्रित्य वामाक्षी—कटाक्षैर्यो न भिद्यते ॥ द्वाविंशत्युपस-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गर्वेषै—र्यो बिभेति न साहसी ॥ ९७ ॥ तस्मै योग्य इति ज्ञात्वा । चिंतामणिसमं गुरुः ॥ ददातु चारुचारित्रं । समीहितकरं करात् ॥ ९८ ॥ तपोभिर्बहुभिः पुष्पैः । पावनैर्भावनादिभिः ॥ आराध्य साधितं सत्त—स्कुर्यात्सर्वं समीहितं ॥ ९९ ॥ स्यात्तस्याजितसेनवन्निरुपमं वैमानिकं चैहिकं । कालादल्पतरात्सुखं शिवपुरे प्राप्तिश्च निर्बाधने ॥ यो धत्ते परमादरेण मतिमांश्चारित्रचिंतामणिं । त्यक्त्वा मोहवशंवदत्वमिति तं पद्मावति त्वं भज ॥ ३०० ॥ दुःखमिश्रितसंसार—सुखं नैवाभिकांक्ष्यते ॥ विषसंसक्तमामोद—मोदकाद्यं किमद्यते ॥ १ ॥ अरघट्टघटीतुल्यो । जीवो भ्राम्यन् भवावटे ॥लक्ष्मीसुखादिपानीयैः । क्षणं रिक्तः क्षणं भृतः ॥ २ ॥ पुण्यक्षयकरी संप—त्सतां नो हर्षहेतवे ॥ पापक्षयकरी चाप—न्निंद्यते न विचक्षणैः ॥ ३ ॥ इंद्रजालमिवालीक—संसारं त्यज दुस्त्यजं ॥ निर्व्याजं भज चारित्र—मिंद्रादेरपि दुर्लभं ॥ ४ ॥

एवं महत्तरासौम्य—प्रशस्यास्यसुधाकरात् ॥ साप्रीयत चकोरीव । तां पीत्वा देशनासुधां ॥५॥ वैराग्यरंगमापन्ना । व्यापन्नाशनदक्षिणां ॥ अवैलक्ष्यामसौ दीक्षा—मयाचिष्ट महत्तरां

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ ६ ॥ भगवत्याह किं गर्भो । भवत्याः श्राविकोत्तमे ॥ सुंदरोदरदर्यंतः । केसरीव न तिष्ठति ॥ ७ ॥ मम दीक्षां न दास्यंति । गर्भेऽस्मिन् कथिते सति ॥ पद्मावती विचिंत्येति । गर्भो नास्तीत्यभाषत ॥ ८ ॥ चारित्रं महत्तरातः । सा समीहितदायकं ॥ रोहणाचलभूमीत—श्चिंतामणिवदग्रहीत् ॥ ए ॥ कियत्सु दिवसेष्वस्या । गर्भे जाते महत्तमे ॥ महत्तरापुरः प्रह्वा । सा स्वभावमचीकथत् ॥ १० ॥ प्रछन्नं रक्षिता काले । प्रभाभासितदिक्तटं ॥ अजीजनत्सुतं साथ । पूर्वा दिगिव भास्करं ॥ ११ ॥ दीपवद्दीप्यमानांगं । रूपवंतमनंगवत् ॥ प्रेक्ष्य सा तनयं स्वीयं । निर्ममापि मुदं दधे ॥ १२ ॥ पितुर्नामांकितां मुद्रां । क्षिप्त्वा बालकरांगुलौ ॥ श्मशाने सात्यजद्यत्ना—द्रत्नकंबलवेष्टितं ॥ १३ ॥ बालोऽयं मा शृगालाद्यै—रद्यतेऽद्येतिचिंतया ॥ स्थिता तिरोहिता सास्था—द्भाग्यरेखेव रक्षिका ॥ १४ ॥ पतितं जात्यरत्नं किं । ज्वलज्ज्वलन एष वा ॥ प्रदीपः किमयं दीप्र—स्तारको वा दिवश्च्युतः ॥ १५ ॥ इत्याशंकाकुलः स्फार—नेत्रो बालांतिकागतः ॥ श्मशानपालकोऽपश्य—ज्जातमात्रं स्तनंधयं ॥ १६ ॥ देवतानां कुमारोऽयं । किं वा पातालवासिनां ॥ अनिरुद्धः कुमारो यः । श्रूयते सोऽयमेव वा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १७ ॥ अथवाहमपुत्रोऽस्मि । तेन मे कुलदेवता ॥ एनं सुतमदान्नूनं । पूज्यमाना दिवा-
निशं ॥ १८ ॥ एवं विचिंत्य चंमालो । गृहीत्वा बालकं करे ॥ निधानमिव संप्राप्तं । नार्यायै
प्रददौ मुदा ॥ १९ ॥ सापि दृष्ट्वा हृदा तुष्टा । स्फुरद्रोमांचकंचुका ॥ मेघवृष्टेरिव स्पष्टं ।
प्रादुर्भूतांकुरा धरा ॥ २० ॥ दंपतीभ्यामपुत्राभ्यां । प्राप्ते तस्मिन् स्तनंधये ॥ चिंतामणौ द-
रिद्रेणे—वातोषि महिमावति ॥ २१ ॥ गूढगर्भा पुरैवासी—त्सुतं प्रासूत सांप्रतं ॥ इति
लोकप्रथा जज्ञे । लोकाः खलु बहिर्मुखाः ॥ २२ ॥ पद्मावती निजं बालं । गतं चांमालवे-
श्मनि ॥ विज्ञाय हृदये दूना । सखेदा सत्यचिंतयत् ॥ २३ ॥ मया ज्ञातमभूदेष । कस्मैचि-
द्यदि दास्यते ॥ तदा ज्ञातस्वरूपेऽस्मिन् । मा मोहो मम वर्धतां ॥ २४ ॥ अयं भाग्याद्यमशा-
नेऽपि । त्यक्तः सन् भूभुजादिना ॥ आदास्यते न तज्जातं । धिग्मां दुर्मतिदूषितां ॥ २५ ॥
अयं चांमालगेहस्थो । भविता मलिनः खलु ॥ निर्मलं किमु वासः स्या—न्मलिनं न मलस्थि-
तं ॥ २६ ॥ निर्मला निर्मला एव । तिष्टंतोऽपि मलेऽथवा ॥ अश्यामलः श्यामलव्योम—सं-
स्थोऽपि न किमर्यमा ॥ २७ ॥ संगो न जायते नूनं । सदसद्गुणकारणं ॥ मणिर्विषधरशिरः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

—स्थितो विषहरः स्मृतः ॥ २८ ॥ संगो न जायते नूनं । सदसद्गुणकारणं ॥ अपि राजादनांतःस्थं । बीजं कटुकमेव हि ॥ २९ ॥ अनेनैषोऽपि चांमालो । नविता निर्मलः खलु ॥ श्यामलं व्योम चंद्रेण । नोज्ज्वलं क्रियते किमु ॥ ३० ॥ एवं विचिंतयंती सा । समागात्स्वमुपाश्रयं ॥ वेगेन तत्र गत्वा च । व्यलगन्निजकर्मणि ॥ ३१ ॥ महासतीनिः सा पृष्टा । क ते बालो महासति ॥ मृतबालमजनिषि । तत् श्मशाने तमत्यजं ॥ ३२ ॥ व्यलीकवचनं सैवं । पद्मावत्यप्यनाषत ॥ यतः सर्वत्र संसारे । नान्यथा नवितव्यता ॥ ३३ ॥ चांमालस्य गृहे बालः । प्राप वृद्धिं शनैः शनैः ॥ कल्पद्रुमांकुर इव । दैवादवकरावनौ ॥ ३४ ॥ अथावकर्णित इति । श्वपाकस्तस्य सोऽनिधां ॥ अकार्षीदुत्सवं कृत्वा । निजगेहानुसारतः ॥ ३५ ॥ अथ पद्मावती साध्वी । श्वपिच्या सह सर्वदा ॥ करोति प्रीतिसंसर्ग—माभाषयति बालकं ॥३६॥ यत्किंचिल्लभते वस्तु । प्रशस्तं मोदकादिकं ॥ तद्बालाय ददौ तस्मै । पुत्रस्नेहो हि डुर्धरः॥ ॥ ३७ ॥ अवकर्णितोऽपि तस्यां । नक्तचित्तोऽनवद्भृशं ॥ मातुः स्नेहात्तथा चापि । यो ददाति स देवता ॥ ३८ ॥ तदागमात् श्वपाकस्य । गेहान्नष्टा दरिद्रता ॥ प्रदीपो हरति ध्वां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं । यत्र कुत्रापि संस्थितः ॥ ३९ ॥ अथावकर्णितः क्रीडन् । राजपुत्रस्वभावतः ॥ विधाय वालुकापुंजे । सिंहासन इवाविशत् ॥ ४० ॥ अपरान् क्रीडतो बालान् । रे रे ददत मे करं ॥ राजाहमित्यभाषिष्ट । स सर्वेषु पराक्रमी ॥ ४१ ॥ स्वस्वभावेन देहेऽसौ । रुक्कंडूवा समाकुलः ॥ कंडूयत शरीरं मे । करोऽयं भवतां मयि ॥ ४२ ॥ एवमुक्ते समस्तास्ते । संभूय शिशवः सदा ॥ अकार्षुस्तस्य देहस्य । करैः कंडूयनं घनं ॥ ४३ ॥ तदादि बालकैः सर्वैः । करकंडुरितीदृशं ॥ यथार्थं दत्तमेतस्या–भिधानं परया मुदा ॥ ४४ ॥ आददानः सौम्यमूर्तिः । क्रमेण सकलाः कलाः ॥ राजेव शुक्लपक्षेऽसौ । रराज द्युतिराजितः ॥ ४५ ॥ श्मशानं पालयामास । स पितुः स्थानके स्वयं ॥ स किं पुत्रो निजं तातं । निश्चिंतं कुरुते न यः ॥ ४६ ॥ तदा तत्र श्मशानांत–र्वंशजालसमाकुले ॥ मूर्तिमंतौ धर्ममोक्षा—विव साधू समागतौ ॥४७॥ तयोराद्यः समस्तानां । वंशानां वेत्ति लक्षणं ॥ पर्वादिकविचारं च । गृहीतुश्च फलाफले ॥ ॥ ४८ ॥ पाश्चात्येनाथ मुनिना । श्मशाने गच्छता सता ॥ एकः समुद्गको दंडो–ऽदर्शि वंशस्य गह्वरे ॥ ४९ ॥ स आद्यं पृष्टवान् साधुं । भगवन् कीदृशो भवेत् ॥ कल्याणदायकः कीदृ–

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गकव्याणाय दंरुकः ॥ ५० ॥ वंशलक्षणविज्ञान–दक्षिणो मुनिपुंगवः ॥ एवं प्रोवाच वाचालः ॥ सद्यः संमोदयन्मनः ॥ ५१ ॥ एकपर्वा प्रशस्या स्याद् । द्विपर्वा कलहप्रदा ॥ वंशयष्टिर्भवे-द्यातु—त्रिपर्वा लाभहेतवे ॥ ५२ ॥ मारणांता चतुःपर्वा । मार्गे कलहहारिणी ॥ पंचपर्वा भवेद्यष्टिः । षट्पर्वातंकदायिनी ॥ ५२ ॥ सप्तपर्वारोग्यकरी । पृथुला चतुरंगुला ॥ अष्टांगुलोन्नृता सप्त—पर्वा मत्तेभवारिणी ॥ ५३ ॥ अष्टपर्वा भवेद्यष्टिः । सुसंपत्तिविधायिनी ॥ नवपर्वा यशोहेतु—र्दशपर्वा तु संपदे ॥ ५४ ॥ वहुवर्णा सुशुषिरा । दग्धा वक्रा सकीटका ॥ ऊ-र्ध्वशुष्का भवेद्यष्टि–र्वर्जनीया प्रयत्नतः ॥ ५५ ॥ एकवर्णा महास्निग्धा । पंचवर्णविनूषिता । इत्यादिलक्षणा ज्ञेया । प्रशस्या वंशयष्टिका ॥ ५६ ॥ अंगुल्या दर्शयित्वैकं । दंरुकं प्रमदप्रदं ॥ अयमेतेषु सारोऽस्ति । नक्षत्रेष्विव चंद्रमाः ॥ ५७ ॥ नाग्यसौनाग्यसंपन्न । एतद्दंरुं ग्रही-ष्यति ॥ विना नाग्येन केनापि । चिंतारत्नं न लभ्यते ॥ ५७ ॥ गृहीतुः सप्तमे घस्रे । मह-द्राज्यं नविष्यति ॥ एषा राज्यकरी यष्टि–र्वर्धिता चतुरंगुलं ॥ ५९ ॥ तदा वेविद्यते योगः । स पुनः सांप्रतं न हि ॥ कार्यं कुर्युः समस्तं हि । संयोगे सति नान्यथा ॥ ६० ॥ नैकं बी-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

जं प्ररोहाय । न पृथ्वी सलिलं न च ॥ सर्वेषामपि संयोगा—त्प्ररोहति तरुर्गुरुः ॥ ६१ ॥ ए-
वंविधानि वाक्यानि । प्रछन्नं संस्थितोऽशृणोत् ॥ करकंडुस्तदैवैको । ब्राह्मणोऽपि महामतिः
॥ ६२ ॥ अथ साधुद्वयं क्वापि । विजहार महीतले ॥ तृणे स्त्रैणेऽपि हि स्वर्णे । साधवः स-
मदृष्टयः ॥ ६३ ॥ इयं भूमिर्मदीयास्ति । तदियं वर्धतामिह ॥ पश्चादेव गृहीष्यामि । मुनि-
नोक्तप्रमाणकां ॥ ६४ ॥ एवं विचिंतयन् सुस्थः । करकंडुः स तस्थिवान् ॥ महांतः सर्वका-
र्येषु । तस्थुरौत्सुक्यभाजनं ॥ ६५ ॥ युग्मं ॥ अर्कोऽप्युदेति वारुण्यां । चलत्यपि सुराचलः॥
ज्वलनोऽपि भवेद्भीतो । हिमवज्ज्वलनी भवेत् ॥ ६६ ॥ कदाचित्सागरांभोऽपि । मर्यादाम-
तिवर्तते ॥ परं न साधुवाक्यानि । प्रचलंति कदाचन ॥ ६७ ॥ अनेन मुनिरत्नेन । दंडरत्नं
प्ररूपितं ॥ तदस्य ग्रहणे यत्नं । करोम्यचिरकालतः ॥ ६८ ॥ चतुरंगुलमेतस्य । वृद्धिं यावत्प्र-
तीक्ष्यते ॥ श्रेयांसि बहुविघ्नानी—तिहेतोस्तन्न युज्यते ॥ ६९ ॥ साधुवाक्यांजनेनायं । नि-
धानमिव दृश्यते ॥ पश्चाद्भाग्ययोगेन । मायं कदापि दृश्यतां ॥ ७० ॥ केनाप्यज्ञानतो दंडो ।
मायं चेच्छिद्यतेऽथवा ॥ अपि चिंतामणीरत्न—मज्ञानां कर्करायते ॥ ७१ ॥ सांप्रतं गृह्यतेऽयं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चे-त्तदा स्यान्निष्फलः खलु ॥ कृते कालविलंबे तु । विघ्नानि स्युरनेकशः ॥ ७२ ॥ किं करोम्यु-
त्तयोर्मध्ये । प्रपंचं रचयामि कं ॥ इति चिंतातुरस्तस्थौ । क्षणमात्रं स वाडवः ॥ ७३ ॥ अष्टभिः
कुलकं ॥ आः ज्ञातं सांप्रतं दंडो । यन्नो सिद्धिविधायकः ॥ तन्नूनं न्यून एषोऽस्त्य-व्याप्यहो
चतुरंगुलः ॥ ७४ ॥ खनित्वा भूमिकामध्या-च्चतुरंगुलमंजसा ॥ दंडकं हि गृहीष्यामि । स्त्री
रत्नमिव दुःकुलात् ॥ ७५ ॥ एवं विचिंतयन् विप्रः । क्षिप्रं तत्र समेत्य सः ॥ प्रछन्नं पृथिवी-
पीठं । चखान चतुरंगुलं ॥ ७६ ॥ उत्खन्य दंडकं लात्वा । यावत्स वलितस्तदा ॥ विलोकि-
तोऽधिकं भाग्य-भाजिना करकंडुना ॥ ७७ ॥ बलादुछिद्य विप्रस्य । पार्श्वादग्राहि दंडकः ॥
तेन साकं स लोभत्वा-दारेभे कलहं द्विजः ॥ ॥ ७८ ॥ चक्रतुः कलहं गाढं । युध्यमानौ
परस्परं ॥ एकद्रव्याभिलाषो हि । परमं वैरकारणं ॥ ७९ ॥ युध्यमानौ पुरं प्राप्तौ । मिलितः
कौतुकाकुलः ॥ लोको नागरिकस्तत्रा-पृछद्व्यतिकरं तयोः ॥ ८० ॥ करकंडुर्बभाषेऽथ । द्वि-
जोयं चौरवन्मम ॥ श्मशानभुवमागत्य । वंशदंडकमग्रहीत् ॥ ८१ ॥ मया दृष्टे समुछेद्य । गृही-
ते निजवस्तुनि ॥ लोभाभिभूतहृदयो । वृथायं कलहायते ॥ ८२ ॥ द्विजन्माह मह्यं दंड-म-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

यमेव ददात्वसौ ॥ अहमस्मै महारम्यं । दास्ये दंमकपंचकं ॥ ७३ ॥ करकंमुः पुनः प्राह ।
सहस्रैरपि मे न हि ॥ अन्यैः प्रयोजनं किंचि—दयमेव विलोक्यते ॥ ७४ ॥ एकश्चिंतामणिः
सर्व—कार्यसिद्धिविधायकः ॥ अतिदीप्तैरनेकैश्च । काचैः किं नाम साध्यते ॥ ७५ ॥ लोकैः
पृष्टं किमेतस्मिं—स्त्वदीयो गाढमाग्रहः ॥ तदोच्चैःस्वरमित्यूचे । बालत्वात्करकंमुना ॥ ७६ ॥
अस्य दंमस्य माहात्म्या—त्सप्तमे दिवसे मम ॥ किंचिन्महत्तरं राज्यं । नविष्यति न संशयः
॥ ७७ ॥ जहास सकलो लोको । वचनं च निशम्य तत् ॥ असंनाव्यार्थवाक्यस्य । प्रयोगो
हासहेतवे ॥ ७८ ॥ जनैरुक्तं च ते राज्यं । जायतेऽस्य प्रनावतः ॥ अनिरामस्तदा ग्रामो । दा-
तव्योऽस्मै द्विजाय च ॥ ७९ ॥ तद्वचः प्रतिपेदे स । उमित्युक्त्वा विशालधीः ॥ मध्ये भू-
याथ लोकेन । विनग्नः कलहस्तयोः ॥ ८० ॥ विप्रेण मेलिताः सर्वे । स्वज्ञातीया महत्तराः ॥
सकलः पुरतस्तेषां । वृत्तांतोऽवाचि संभ्रमात् ॥ ८१ ॥ सर्वैरालोचितं रात्रा—वेतं चांमालचेट-
कं ॥ व्यापाद्याद्यैव लास्यामो । बलात्कारेण दंमकं ॥ ८२ ॥ तेषां मंत्रममुं कापि । सश्वपालोऽ-
श्रृणोत् क्षणात् ॥ नूनं नाग्यवतां नैव । प्रनवेद्वैरिणां बलं ॥ ८३ ॥ चांमाली स च चांमालः

। करकंडुरिति त्रयं ॥ निर्जगाम पुरात्तस्मा—द्बलत्रयमिवालसात् ॥ ९४ ॥ नगरान्निर्गतांस्तां-
स्तान् । ज्ञात्वा कैश्चिन्महोद्धतैः ॥ हंतुं मृगानिव व्याधै—रनुगंतुं प्रचक्रमे ॥ ९५ ॥ तावदेको
द्विजो वृद्धो । वयसापि गुणेन च ॥ आह सुस्थीकृतान् सर्वा—नुद्धताननुशासितुं ॥ ९६ ॥
मा त्वरध्वं कुरुध्वं मा । प्रयासं बहुधा वृथा ॥ प्राप्यंते सोद्यमेनापि । विना भाग्येन न श्रियः
॥ ९७ ॥ प्रधानानि निधानानि । विविधाः प्रधयोऽपि च ॥ प्रादुर्भवंति तस्याग्रे । यस्य भाग्यं
शिरःस्थितं ॥ ९८ ॥ मानवा दानवा देवा—स्तस्य पादपयोरुहं ॥ भक्तिभाजो भजंत्येव । यस्य
भाग्यं शिरःस्थितं ॥ ९९ ॥ श्रीपुण्याढ्यनरेश्वरस्य विलसत्पुण्यप्रभावात्प्रति—क्षिप्तं वैरिषु वै-
रतस्तृणमपि प्राप्तं ज्वलच्चक्रतां ॥ चक्रं च प्रतिवासुदेवनृपतेः सेवाकरं भृत्यव—द्भाग्यस्यापच-
ये हहा निजशिरश्छेदाय संजायते ॥ ४०० ॥ उल्लासके सत्कमलावलीना—मुच्चैस्तरां तिष्ठति
भाग्यभानौ ॥ प्रादुर्भवत्यन्यपदार्थसार्थैः । साकं निधानान्यपि संनिधाने ॥ १ ॥ निर्भाग्या
नैव पश्यंति । निधानाद्यं कदाचन ॥ अंगारवृश्चिकापूर्णा—न्यथ पश्यंति कुत्रचित् ॥ २ ॥
श्रीभाग्याभाग्यविषये । दृष्टांतः श्रेष्ठिचौरयोः ॥ संभूय निश्चलीभूय । श्रूयतां भो द्विजोत्तमाः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ३ ॥ पुरं लक्ष्मीपुरं नाम । पुराभूद्भूरिभूतिभृत् ॥ स्थिरचित्तोऽभवछ्रेष्टी । तत्र नाम्ना गुणेन च ॥ ४ ॥ सदा सद्गुरुसंयोगा–न्मर्ममर्माणि वेत्त्यसौ ॥ तद्रसज्ञस्तदासक्त–स्तिष्टत्यलिरिवांबुजे ॥ ५ ॥ तस्य गेहेऽस्ति पुण्यैक–प्रभवो विभवो न हि ॥ तथापि व्याकुलस्वांतो । नासौ भ्राम्यति कुत्रचित् ॥ ६ ॥ न वंचयति लोकांश्च । पुण्यकार्यं न मुंचति ॥ न्यायोपार्जितवित्तेन । कष्टान्निर्वाहयेद्गृहं ॥ ७ ॥ तद्गेहिनी रहस्याह । स्वामिन्न क्रियते त्वया ॥ धर्मैकतानचित्तेन । व्यवसायो न तादृशः ॥ ८ ॥ अयं धर्मः कृतो नूनं । फलिष्यति भवांतरे ॥ स्यादवश्यं हि साम्यस्या—प्यवसाने फलावली ॥ ए ॥ गृहस्य गृहिणा कार्या । चिंता सर्वापि सर्वदा ॥ सा त्वया क्रियते नैव । नाथ तत्किमु कारणं ॥ १० ॥ प्राह श्रेष्टमतिः श्रेष्टी । प्रिये किं स्यात्स्वचिंतया ॥ पूर्वं यदार्जितं कर्म । तां तदेव करिष्यति ॥ ११ ॥ कठोरकुचयोर्मातु—र्येन सृष्टं पयोमधु ॥ दैवं तदेव मे चिंतां । करिष्यति न संशयं ॥ १२ ॥ भवांतरार्जितं पुण्यं । भुज्यतेऽस्मिन् भवे प्रिये ॥ तत्साध्य ऐहिके कार्ये । खिद्यते को मुधा बुधः ॥ १३ ॥ कदाचिन्मुंचति स्नेहं । पीड्यमानापि वालुका ॥ परं यल्लिखितं भाग्ये । तस्मान्न

P.P. Ac. Gunratnasuri M.S.                    Jun Gun Aaradhak Trust

प्राप्यतेऽधिकं ॥ १४ ॥ प्राह प्रियाथ हे नाथा-वितथं भवतो वचः ॥ परं फलंति कर्माण्यु-पक्रमैः शस्यवज्जलैः ॥ १५ ॥ ऊचे स्थिरमतिः स्थैर्या-त्किमेतज्जल्पसि प्रिये ॥ यस्मादुपक्र-मोऽप्यास्ते । सर्वकर्मवशंवदः ॥ १६ ॥ अपि जीवितुमिच्छंतो । दुष्टकर्मभिरीरितं ॥ कार्यंते चौर्यमुख्याणि । हंत कर्मस्वतंत्रता ॥ १७ ॥ अल्पोपक्रमवंतोऽपि । भूषितास्तत्र चामरैः ॥ सुखं तिष्ठंति यद्भूपा-स्तत्र कर्मैव कारणं ॥ १८ ॥ रंकाः स्वोदरचिंतार्थं । रुलंतोऽपि दिवानिशं ॥ न लभंते सुखं क्वापि । तत्र कर्मैव कारणं ॥ १९ ॥ इत्येवं दंपती प्रीत्या । वदमानौ परस्परं ॥ कियंतं निन्यतुः कालं । तौ च संतोषतोषितौ ॥ २० ॥ अन्यदा स गतः श्रेष्टी । बहिर्भू-मौ कुतूहलात् ॥ इष्टिकां चालयामास । लोभमुक्तमना मनाक् ॥ २१ ॥ सुवर्णटंककैः पूर्णं । जात्यरत्नैरलंकृतं ॥ अधो निधानमद्राक्षी-त्संतोषे किं न दृश्यते ॥ २२ ॥ एतदर्थं मया ताव-त्प्रयासः कोऽपि न कृतः ॥ तद्यथा स्वयमेवैत-न्ममाध्यक्षमजायत ॥ २३ ॥ तथा यद्यस्ति मे प्राप्तं । तत्स्वयं गृहमेष्यति ॥ एतत्कृते कृतीभूय । प्रयासं कः करोत्यतः ॥ २४ ॥ विचिंत्ये-ति निधानं त-त्पिधायेष्टिकया तया ॥ निर्लोभहृदयः श्रेष्टी । समागान्नगरांतरा ॥ २५ ॥

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

श्रेष्ठिन्नाग्योदयज्ञानु—मिवामृष्यन्नमर्षतः ॥ द्वीपांतरमगाज्ञानुः । प्रससार तमोन्नरः ॥ २६ ॥
श्रेष्ठिनी श्रेष्ठिनं प्राह । स्वामिन् किं वाचि धीयते ॥ क्षुधाकरालिता बालाः । प्रसुप्ता अद्य
संत्यमी ॥ २७ ॥ कल्येऽहं किं करिष्यामि । गेहे न्नोजनमस्ति नो ॥ न्नवतोत्थाय नो कश्चि—
दुद्यमस्तु करिष्यते ॥ २८ ॥ श्रेष्ठ्याह न प्रिये कार्यो । विषादः कोऽपि मानसे ॥ मन्येऽद्य
मम शीर्षस्थो—ऽजागरीद्भाग्यन्नास्करः ॥ २९ ॥ येनाद्य मयका दृष्टं । निधानं महदेककं ॥
श्रेष्ठिन्याह कुतः स्वामिन् । गृहीतं तन्न तत्क्षणं ॥ ३० ॥ जगौ श्रेष्ठी मया ज्ञातं । प्राप्तव्य-
मिदमस्ति चेत् ॥ तदा स्वयं समागत्य । पतिष्यति गृहांतरे ॥ ३१ ॥ श्रेष्ठिनी पुनराचष्ट । क
थ्यते न्नवतः कियत् ॥ प्राप्योऽपि कवलः किं वा । मुखे निपतति स्वयं ॥ ३२ ॥ निधानस्था-
नकं नत्वा—न्निज्ञानानि च मत्पुरः ॥ पश्चिमे प्रहरे गत्वा । नेष्यामि निजमंदिरे ॥ ३३ ॥ अ-
स्मिन्नवसरे तत्र । क्रूराश्चौरास्त्रयः स्थिताः ॥ क्षात्रं प्रपात्य गेहांतः । शृएवंति तत्र तद्गिरः
॥ ३४ ॥ श्रेष्ठी चौरानविज्ञाय । जजल्प श्रेष्ठिनींप्रति ॥ अन्निज्ञानानि सर्वाणि । श्रुतान्यपि
च तस्करैः ॥ ३५ ॥ चौरैरचिंति किं ताव—दस्य गेहे गृहीष्यते ॥ व्रजामस्तत्र गृह्णीमो । नि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धानं तन्महत्तमं ॥ ३६ ॥ चौर्यं हि क्रियते नैव । क्रियते चेत्कदाचन ॥ तद्विधेयं यतो भूयो । भूयते भूरिभूतिभिः ॥ ३७ ॥ एवमालोच्य ते सर्वे । तस्करा सदनात्ततः ॥ अप्रमादपरात्साधोः । प्रमाद इव निर्ययुः ॥ ३८ ॥ गत्वा श्रेष्ट्युदितस्थाने । चालयित्वेष्टिकां च तां ॥ ददृशुः कलशं ताम्र—मयं कम्रं स्फुरत्प्रभं ॥ ३९ ॥ निधानं प्राप्तमित्यस्मा—द्धर्षादाकर्षणाय ते ॥ यदैव चिक्षिपुर्हस्तान् । वृश्चिकैः खादितास्तदा ॥ ४० ॥ हंहो ही खादिता हस्ते—ष्वेतत्किं नाम विद्यते ॥ भूमावाहत्य स त्यक्त—स्तस्करैः संभ्रमादिति ॥ ४१ ॥ सर्वैरवाचि दुष्टेन । वणिजा वंचिता वयं ॥ योऽस्मान् विज्ञाय गेहांतः । प्रविष्टानुक्तवानिदं ॥ ४२ ॥ तत्रैकस्तस्करः प्रोचे । कपटैकपटीयसा ॥ पुरापि वणिजेकेन । वंचितस्तन्निशम्यतां ॥ ४३ ॥ अस्मिन्नेव पुरे श्रेष्ठी । विद्यते यो धनो धनी ॥ प्रवेष्टुं तस्य गेहांतः । पश्याम्यवसरं सदा ॥ ४४ ॥ विज्ञातमत्परीणामः श्रेष्ठी निजगृहालके ॥ वृश्चिकं स्थापयामास । कच्चोलकनियंत्रितं ॥ ४५ ॥ अन्यदा रात्रिमध्येऽहं । प्रविष्टो गृहमंतरा ॥ क्रूरं चौरं स मां ज्ञात्वा । श्रेष्ठी स्वश्रेष्ठिनीं जगौ ॥ ४६ ॥ हे प्रिये लक्षमूल्यं त—न्मुद्रारत्नं क विद्यते ॥ प्रियाह शून्यचित्ताया । आलके वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मृतं मम ॥ ४७ ॥ श्रेष्ठी कोपादिवाचष्ट । मुग्धे शून्यतया त्वया ॥ मदीयमर्जितं वित्तं । सर्वं निर्गमयिष्यते ॥ ४८ ॥ केनापि वस्तुना तत्किं । स्थगितं विद्यते न वा ॥ प्रेयसी प्राह कच्चोल—केनाछादितमस्ति तत् ॥ ४९ ॥ वचांसीति तयोः श्रुत्वा । क्षिप्तस्तत्र करो मया ॥ कच्चोलकं परावृत्त्य । वृश्चिकोऽदशदंगुलौ ॥ ५० ॥ करं फूत्कृत्य फूत्कृत्य । स्वथूत्केनास्पृशं यदा ॥ श्रेष्ठिना धर्षितस्ताव—न्मुद्रा किं माति नांगुलौ ॥ ५१ ॥ अन्येभ्योऽपि गृहेभ्यो य—च्चौरयित्वा मयार्जितं ॥ सर्वस्वं तव मुक्त्वाहं । जीवग्राहं पलायितः ॥ ५२ ॥ इत्येवं वणिजा तेन । वंचितोऽस्मि पुराप्यहं ॥ तावदन्योऽप्यवक् चौर—स्तेनाहमपि वंचितः ॥ ५३ ॥ धनस्य मीनतुल्यस्य । ग्रहणाय दिवानिशं ॥ अभ्रमं बकवन्मायी । तस्य गेहस्य पार्श्वतः ॥ ५४ ॥ अन्यदा स्वगृहाद्रात्रा—वुत्सर्गार्थं स निःसृतः ॥ मया ऊर्गितः कूर्चेऽसौ । विधृतः प्रबलाह्वलात् ॥ ५५ ॥ उक्तं च यदि मे लक्षं । टंककानां प्रदास्यसि ॥ तदा मोक्ष्यामि नो चेत्त्वां । हनिष्याम्यसिनामुना ॥ ५६ ॥ श्रेष्ठ्यूचे मुंच मुंच त्वं । लक्षं दास्यामि सांप्रतं ॥ उच्चैरूचे कलत्रं च । रे रे वाक्यं प्रिये शृणु ॥ ५७ ॥ सांप्रतं विद्यते कूर्चं । चौरेणानेन मे धृतं ॥ मेलयित्वा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कलङ्केणा–प्येकेनास्ति पतन्निह ॥ ५८ ॥ कदाचिदेष चेत्कूर्चं । त्यक्त्वा नक्रं ग्रहीष्यति ॥ तदा
कलङ्कद्वयेनापि । त्रुटिः क्वापि न विद्यते ॥ ५९ ॥ उत्तिष्ठोत्तिष्ठ रे तस्मा–त्प्रमादं मा कृथा वृथा
॥ प्रदेहि तस्करायास्मै । शीघ्रं टंककलङ्ककं ॥ ६० ॥ तदा कूर्चं मया त्यक्त्वा । गृहीतं प्राण-
मेव हि ॥ धूनयित्वा शिरः शीघ्रं । बलान्नक्रममोचयत् ॥ ६१ ॥ वज्राग्नेयं गृहद्वारं । पिधाय
सोऽस्वपत्सुखं ॥ विलक्षः सन्नहं नष्टो । वणिजां मतिरीदृशी ॥ ६२ ॥ तृतीयोऽप्याह वणिजा
। पुराहमपि वंचितः ॥ एकस्मिन् वत्सरे कच्छः । कृतोऽभून्मयका पुरा ॥ ६३ ॥ तदागाद्वणि
गन्येद्युः । खादिता तेन कर्कटी ॥ मया दृष्टे च मुष्ट्याद्यै–राहतो र्भर्त्सितो भृशं ॥ ६४ ॥
स रुष्टः प्राह रे दुष्ट । प्रमाणं मामकं तदा ॥ यदा ते सकलं कच्छं । ध्वंसयाम्यचिरादपि
॥ ६५ ॥ कथयित्वेति गत्वांतः–पुरं भेजे स वैद्यतां ॥ सखिल्लिस्तत्र भूपोऽभू–त्तत्र राजां-
गणे ततः ॥ ६६ ॥ उवाच भूपतिं स्वामिन् । खिल्लिस्ते मस्तके कुतः ॥ अत्र संति न वैद्याः
किं–मौषधं यन्न कुर्वते ॥ ६७ ॥ राजाह न निराकर्तुं । स्वभावः शक्यते यथा ॥ औषधं न
तथा खिल्ला–विति सर्वे जगुर्जनाः ॥ ६८ ॥ अवग्वणिगसौ वार्ता । मूर्खाणां विदुषां न च ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अहं निमेषमात्रेण । खिल्लिं स्फाटयितुं क्षमः ॥ ६९ ॥ राजा सहर्ष आचख्यौ । त्वमेवैतां निराकुरु ॥ योऽस्माकं वालयेज्ञाव–मर्जुनः स्यात्स एव हि ॥ ७० ॥ वणिजोक्तं विना शास्त्रं । शूरः शास्त्रं विना द्विजः ॥ भेषजं च विना वैद्यो । न कार्यं कर्तुमीश्वरः ॥ ७१ ॥ तत्प्रदेहि महाराज । सहायान् सेवकान् स्वकान् ॥ येनानीयौषधान्यत्र । कुर्वे खिल्लेः प्रतिक्रियां ॥ ७२ ॥ यमदूतानिवादाय । सेवकांस्तानदोऽवदत् ॥ उन्मूल्य सकलं कन्दं । गृह्णंत्वौषधहेतवे ॥ ७३ ॥ ते तथा चक्रुरुच्चैरा । मयि पश्यति सत्यपि ॥ दुर्निवारा नृपाज्ञापि । सेवकानां तु का कथा ॥ ७४ ॥ गृहीत्वा सकलं कन्दं । स गत्वा नृपसद्मनि ॥ आडंबरं महच्चक्रे । तद्धि तव महत्त्वकृत् ॥ ७५ ॥ आजालं वसुधापाल–शिरस्तलमलेपयत् ॥ स ओंकारफुट्फुट्स्वाहे—त्यमुं मंत्रं जपेत्यवक् ॥ ७६ ॥ कृत्वोपवासमत्रोप—विशोपकुलदेवतं ॥ न स्मार्यो मर्कटश्चित्ते । परमद्य त्वया क्वचित् ॥ ७७ ॥ कृपाणसदृशः कल्ये । वेणीदंकस्तवैष्यति ॥ औषधानां प्रभावेण । किं किं वा नोपजायते ॥ ७८ ॥ परं चेत्स्मरसि स्वांते । कदाचिदपि मर्कटं ॥ तदा कृतः प्रयासो मे । निष्फलोऽयं भविष्यति ॥ ७९ ॥ राजा सर्वं तथा चक्रे । वारंवारं निवारितः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हृगादिव समायाति । मर्कटश्चित्तमंतरा ॥ ७० ॥ प्रभाते भूपतेः शीर्षे । रोममात्रं न निर्ययौ ॥ तावद्रुष्टेन भूपेन । वणिगाकारितः पुरः ॥ ७१ ॥ वणिजावाचि राजेंद्र । वेणी ते निःसृता न किं ॥ तन्मन्ये मर्कटश्चित्ते । चिंतितो हि भविष्यति ॥ ७२ ॥ अयं सत्यं वदन्नस्ति । मया चिंतित एव सः ॥ एवं विचिंतयन् राजा । सुप्रसन्नोऽभवत्पुनः ॥ ७३ ॥ राजानं राजलोकं च । वंचयामास यो धिया ॥ अमुष्यान्मम सर्वस्वं । वणिजेऽस्मै नमो नमः ॥ ७४ ॥ स्वानुभूताः कथास्तिस्र—स्त्रिभिरेवमुदीरिताः ॥ पश्यद्भिर्वणिजो लोका—नस्तोककपटांबुधीन् ॥ ७५ ॥ सर्पेण यो भवेद्दष्टो । रज्जौ सर्पं स मन्यते ॥ वह्निना यो भवेद्दग्धो । फूत्कृत्य स पिबेज्जलं ॥ ७६ ॥ इति तेऽपि त्रयश्चौरा । वणिग्भिर्वंचिताः पुरा ॥ स्थिरचित्तं सरलम—प्यमन्यंत स्ववंचकं ॥ ७७ ॥ चौरैरालोचितं तेना—स्मासु यत्कपटं कृतं ॥ पातयामः शिरस्यस्य । सन्मुखं धृष्यते हि सः ॥ ७८ ॥ एतं कलशमुत्पाट्य । वृश्चिकावलिभिर्भृतं ॥ क्षिपामस्तद्गृहे येन । खाद्यंते सकलाश्च ते ॥ ७९ ॥ विमृश्येति त्रिभिश्चौरै—रुत्पाट्य कलशो महान् ॥ स्थिरचित्तगृहे क्षिप्तो । नष्टं चौरैश्च तत्क्षणात् ॥ ८० ॥ प्रभाते ह्यथ संजाते । स्वखट्वासंनिधा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नगं ॥ निधानं दृष्टपूर्वं त—त्स्थिरचित्तो निरैक्षत ॥ ए१ ॥ लात्वा रत्नान्यपूर्वाणि । नेटयित्वा नरेश्वरं ॥ सर्वामचीकथद्वार्तां । तुष्टो न्यायी स उक्तवान् ॥ ए२ ॥ त्वया चेन्निजनाग्येन । प्राप्तो विजव ईदृशः ॥ तत्त्वं जुंक्ष्व निराशंकं । महानाग महामते ॥ ए३ ॥ अथ गेहं समागत्य । सत्कृत्य स्वजनान् जनान् ॥ किंचित्तेन्यो ददौ किंचि—न्निजगेहेऽप्यरक्षयत् ॥ ए४ ॥ कमलं सलिले यद्व—दंकुरः पृथिवीतले ॥ तस्य गेहे तथा लक्ष्मी—र्ववर्धिष्ट शनैः शनैः ॥ ए५ ॥ अचिरेणापि स प्राप । धनेन धनदोपमां ॥ यः कल्पद्रूनधश्चक्रे । दानादूर्ध्वस्थितानपि ॥ ए६ ॥ प्रासादाः श्रीजिनेंद्राणां । सुधाधवलितोज्ज्वलाः ॥ मूर्तिमंति यशांसीव । कारितास्तेन भूरिशः ॥ ए७ ॥ पात्रापात्रविचारज्ञं । ददानं दानमद्भुतं ॥ तं वीक्ष्य लज्जयेवायं । मेघः श्यामलतां गतः ॥ ए८ ॥ यद्दान निर्जितेनेव । विषादेन विषादनं ॥ चक्रे कल्पद्रुणा येन । तनुनीलास्य वर्ण्यते ॥ एए ॥ स्याद्भाग्यात्स्थिरचित्तवत्स्थिरतरा लक्ष्मीर्विनोपक्रमं । निर्नाग्या अहिवृश्चिकादि च निरीक्षंते निधानेष्वपि ॥ तस्मान्मा कुरुत प्रयासमधुना नाग्यं न वो विद्यते । यस्माद्धस्तगतापि यष्टिरगमत्सा राज्यलक्ष्मीप्रदा ॥ ५०० ॥ एवं द्वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जेन वृद्धेन । सुधावन्मधुरोक्तिनिः ॥ बोधिता उद्धताः स्थानं । जग्मिवांसो निजं निजं ॥ १ ॥ अथावछिन्नगमनै—र्गछंतस्ते त्रयोऽपि हि ॥ सप्तमे दिवसे प्रापुः । श्रीकांचनपुरांतिकं ॥ २ ॥ श्रांता दीर्घस्य मार्गस्य । लंघनेन निरंतरं ॥ एकस्य पादपस्याधः । सुषुवुः सुखनिद्रया ॥ ३ ॥ अपुत्वस्तत्र भूपालो । जगाम यमसद्मनि ॥ सामंतमंत्रिणश्चक्रुः । पंचदिव्याधिवासनां ॥ ४ ॥ राजपुत्रा अहंमन्याः । स्फारशृंगारधारिणः ॥ मोटयंतो निजश्मश्रूं—स्तस्थुरेस्य चतुःपथं ॥ ५ ॥ दैवादस्तं गते पूर्व—नृपे दिनपताविव ॥ तारा इव दिदीपुःस्मः । राजपुत्रा पुरांबरे ॥ ६ ॥ पंच दिव्यानि नव्यानि । राजलोकवृतान्यथ ॥ देवताधिष्टितान्येत—द्भ्रमुः सकलं पुरं ॥ ७ ॥ राज्ययोग्यमपश्यंति । तत्र कंचन मानवं ॥ करकंडुगुणाकृष्टा—नीवाजग्मुर्वनांतरं ॥ ८ ॥ तत्र सुप्तस्य निःशंकं । करकंडोः शिरस्तले ॥ राज्याभिषेकमकरोत्करी कलशढालनात् ॥ ए ॥ हयो हेषारवं चक्रे । छत्रेणोछ्रितमंबरे ॥ अवीजि चामराज्यां नु । दधिवाहननंदनः ॥ १० ॥ स ससंभ्रममुत्तस्थौ । किमेतदिति चिंतयन् ॥ पश्यामि किमिदं स्वप्नं । किं वा प्रकटनाटकं ॥ ११ ॥ इंद्रजालमिदं किं वा । यथावस्थितमेव वा ॥ दे·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वतानुष्ठितां मायां । पश्यामि किमु नेदृशीं ॥ १२ ॥ इत्येवं संशयापन्नः । स यावदवतिष्ठते ॥ तावत्सर्वेऽपि तत्पादौ । नेमुः सामंतमंत्रिणः ॥ १३ ॥ करकंडुममुं प्राज्ञा । जो जजंतु महीपतिं ॥ इत्याकाश प्रदेशस्थ—देवतानां गिरोऽभवत् ॥ १४ ॥ दीप्तिभिर्दीप्यमानेऽस्मि—न्नुदयत्यंशुमालिनि ॥ भट्टैः कोलाहलश्चक्रे । प्रबुद्धैरिव पक्षिभिः ॥ १५ ॥ प्रोत्फुल्लढोल्लमुख्यानि । बधिरीकृतदिङ्मुखं ॥ वादका वादयामासु—र्वादित्राणि तदग्रतः ॥ १६ ॥ अलंकुरुष्व हे स्वामिन् । श्रीकांचनपुरं पुरं ॥ निर्नाथं न पुरं भाति । निर्नेत्रं वदनं यथा ॥ १७ ॥ स्वामिन्नलं विलंबेन । मतंगजमलंकुरु ॥ सामंतैरिति विज्ञप्तः । प्रारुरोह स हस्तिनं ॥ १८ ॥ स नेत्राण्यंबुजानीव । तत्रासीनो व्यकाशयत् ॥ पूर्वाचलमिवारूढ । उदयन् भानुमानिव ॥ १९ ॥ कुंभिकुंभस्थलारूढः । कांतनिर्जितकांचनः ॥ स कांचनश्रियं दध्रे । श्रीकांचनपुरं विशन् ॥ २० ॥ तत्पिता कुत्सिताकारा—श्चांडालोऽज्ञायि बान्धवैः ॥ क्रोधेनाध्मातचेतोभिः । सर्वैः संभूय मंत्रितं ॥ २१ ॥ पशुत्वाद्धियते नैव । विवेकः कोऽपि दंतिनः ॥ विवेकरहिता एते । सामंताः पशुसन्निभाः ॥ २२ ॥ येनैतेषु महीपाल—कलजेष्वत्र सत्स्वपि ॥ चांडालबालकस्या-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

स्य । कृतं राज्याभिषेचनं ॥ २३ ॥ मातंगः स्वोचितं चक्रे । मातंगस्याभिषेचनं ॥ सदृशाः
सदृशेष्वेव । रज्यंते नापरेषु यत् ॥ २४ ॥ अस्माभिः शुचिभिर्नास्य । मलिनस्य प्रवेशनं ॥
दास्यते सति सूर्ये किं । प्रवेष्टुं क्रमते तमः ॥ २५ ॥ एवमालोच्य भूदेवा । भूमिनाथस्य सं-
मुखं ॥ चंडान् दंडान् समुत्पाट्यो—दतिष्ठन् दुष्टचेतसः ॥ २६ ॥ इव सेतु पयःपूरं । तमः-
पूरं च सूर्यवत् ॥ समुद्रमिव मर्यादा । द्विजालिः सैन्यमस्खलत् ॥ २७ ॥ अग्रगास्तस्य योधा
हि । योद्धुमुद्धतवृत्तयः ॥ चिरं युयुधिरे साकं । रंगत्तुंगकरैर्द्विजैः ॥ २८ ॥ ब्रह्महत्याभया-
त्केचि—त्केचिद्भक्तेरभावतः ॥ अथ सर्वेऽपि सुभटा । उदासीना इवाभवन् ॥ २९ ॥ वंश-
यष्टिः स्वकीया सा । दधिवाहनसूनुना । क्रोधेनोत्पाटयामासे । वीर्यविशपटीयसा ॥ ३० ॥
तत्क्षणं तेजसा साभू—ज्ज्वालंती ज्वलनोपमा ॥ भयंकरा नभः पाति । विद्युद्दंडकदंकवत्
॥ ३१ ॥ अनाहता भयादेव । भूदेवा मीलितेक्षणाः ॥ तां दृष्ट्वा मूर्छिताः पेतु—र्निर्जीवा
इव भूतले ॥ ३२ ॥ एवं विप्रानपाकृत्य । जायमाने महोत्सवे ॥ ढोल्लेषु वाद्यमानेषु । गाय-
मानासु गीतिषु ॥ ३३ ॥ दीयमानेषु दानेषु । मालाट्टालादिवर्तिभिः ॥ सर्वैर्विलोक्यमानोऽसौ ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रविवेश पुरांतरा ॥ ३४ ॥ युग्मं ॥ क्रमाद्राजांगणं प्राप्तो । गजेंद्रादवतीर्य सः ॥ सिंहासन-
मलंचक्रे । नन्नोंगणमिवांशुमान् ॥ ३५ ॥ राजेंद्रा अपरे सर्वे । प्रणेमुस्तत्पदांबुजं ॥ आज्ञा
प्रौढप्रतापस्य । प्रससार महीतले ॥ ३६ ॥ शुचित्वमानिभिर्विप्रैः । स्थाने स्थाने मया सह ॥
क्रियते हठ इत्यास्मा–द्दोषाद्राज्ञा द्विजा धृताः ॥ ३७ ॥ चांमालैर्मलिनैः साकं । बलात्कारे-
ण नोजनं ॥ ब्राह्मणाः कारिताः सर्वे । किमसाध्यं बलीयसां ॥ ३७ ॥ चांमालानां द्विजाती-
नां । विवाहास्तु परस्परं ॥ कारितास्तेन यद्राज्ञा—माज्ञा मान्येत मानवैः ॥ ३ए ॥ योजि-
ताः केऽपि नूदेवा । नीचे चांमालकर्मणि ॥ विपरीतं जगत्कर्तुं । क्रमस्तादृगियत्कियत् ॥ ४० ॥
कालांतरे इयं जाता । प्रसिद्धिरस्य भूभुजः ॥ नास्करो मेघछन्नोऽपि । तमोऽसौ नाशयेन्न किं
॥ ४१ ॥ दधिवाहनपुत्रेण । नृपेण करकंमुना ॥ धान्यवाटकवास्तव्या—श्चांमाला ब्राह्मणीकृ-
ताः ॥ ४२ ॥ विधिवत्तेन नूपेन । करस्पृष्टा वसुंधरा ॥ अवर्धिष्ट विशेषेण । पत्येव स्त्रीस्तन-
द्वयी ॥ ४३ ॥ यत्प्रतापप्रदीपेन । दह्यमानोऽप्यहर्निशं ॥ चित्रं न सांजनो जज्ञे । कदापि नु-
वनालयः ॥ ४४ ॥ पराक्रमपराजूत—प्रजूतरिपुभूपतिः ॥ सर्वत्राचिरकालेन । प्रसिद्धिं प्राप

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नूतले ॥ ४५ ॥ वंशयष्टिनिमित्तं य—श्चकार कलहं द्विजः ॥ करकंडुं स शुश्राव । श्रीकां-
चनपुराधिपं ॥ ४६ ॥ सलोजः प्रतिपन्नस्य । ग्रामस्य ग्रहणाय सः ॥ आजगामाजिरामांग—
पद्मावत्यंगजांतिकं ॥ ४७ ॥ विनयं सूचयन् सम्यक् । प्रणम्य पदपंकजं ॥ योजयित्वा करौ
राज्ञो—ऽसावपाठीदिमां स्तुतिं ॥ ४८ ॥ राजंस्त्वद्यशसा कृते त्रिभुवने गोक्षीर गौरप्रने ।
मन्येऽन्येष्वपि संभ्रमं निजपतेराशंकमाना सती ॥ आलिंग्यैव पतिव्रता स्थितवती गौरीश्वरं
सादरं । रोहिण्याप्युपलक्षणाय विहितो लक्ष्मांकितश्चंद्रमाः ॥ ४९ ॥ राजन् कीर्तिनिदान-
दाननिवहं सम्यग्ददानस्य ते । दृष्ट्वैतामवतारतो बहुतमां शोजां धरंतीं धरां ॥ दैवौकेः
किल दानवारिजनमृद्धजाजरादंबर—मध्योदाद्यदि नैतदस्ति किमहो व्योमांबरं कथ्यते
॥ ५० ॥ भूप त्वत्प्रजवप्रतापविजवाझास्वानयं निर्जित—स्त्यक्त्वा भूमितलं जगाम गगनं त-
त्रापि शंकाकुलः ॥ संतापादिव वर्ततेऽनवरतं तातप्यमानस्तनौ । कृत्वा पादसहस्रमाशु ग-
मनाभ्यासं वितन्वन्निव ॥ ५१ ॥ जो जूपाल रणांगणे रिपुगणे व्यापारिता पुष्करं । कुर्वाणो-
ऽस्यनिघातजातवशतः स्फूर्जत्स्फुलिंगाकुलं ॥ शंकां खड्गलतेति ते वितनुते बाणावृतार्कप्रजं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नीत्या । किं तरणिर्ननाश रजनी जज्ञे च तारांकिता ॥ ५२ ॥ इति तं नृपतिं स्तुत्वा । विप्रः प्रह्वो व्यजिज्ञपत् ॥ नखमध्ये विशेद्लोकः । स्वार्थसाधनहेतवे ॥ ५३ ॥ ते संति बहवो ये तू–पकारिण्युपकारिणः ॥ छित्रा एव परं ते ये–ऽपकारिण्युपकारिणः ॥५४॥ दुष्टस्याप्याश्रिताः संतः । संतः संतोषदायिनः ॥ छेत्तुकामस्य किं छायां । न कुर्वंति महीरुहः ॥ ५५ ॥ पयसा शीतलेनापि । ताप्यमानेन तप्यते ॥ परं सत्पुरुषेणेह । क्षणमात्रं नहि क्वचित् ॥५६॥ कोपः संयमते नूनं । प्रणामांतो महात्मनां ॥ तत्क्षमस्व नराधीशा–पराधं निर्मितं मया ॥ ५७ ॥ अभिरामगुणग्राम–ग्राममेकं प्रदेहि मे ॥ प्रतिपन्नस्य वाक्यस्य । महांतो नान्यथाकृतः ॥ ५८ ॥ यत उक्तं–प्रतिपन्नानि महतां । युगांतेऽपि चलंति नो ॥ अगस्तिवचनारूढो । विंध्योऽद्यापि न वर्धते ॥ ५९ ॥ एवं सविनयं वाक्यं । श्रुत्वा पद्मावतीसुतः ॥ प्रसन्नहृदयोऽवादी–दुदारो दानशौंडधीः ॥ ६१ ॥ ग्रामो वा नगरं वापि । यद्रोचते द्विजोत्तम ॥ तद्याचस्व निराशंकं । तुभ्यं दास्यामि याचितं ॥ ६२ ॥ अथ विप्रः स्वचेतसी–रिति चिंतां चकार सः ॥ नायं देशः स्वकीयः स्या–त्तस्मान्न स्वजनोऽत्र मे ॥ ६३॥ स्वदेशवासिनो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नूनं । पक्षिणोऽपि मनोरमाः ॥ न पुनः परदेशीया । बांधवा अपि बंधुराः ॥ ६४ ॥ स्थान-
भ्रष्टमनुष्यस्य । प्रसूनस्येव जायते ॥ विनिपातो न मोक्तव्यं । तस्मात्स्थानं निजं सदा ॥ ६५ ॥
उक्तं च-राजा कुलवधूर्विप्रा-नियोगिमंत्रिणः स्तनौ । स्थानभ्रष्टा न शोभंते । दंताः केशा
नखा नराः ॥ ६६ ॥ तेजस्व्यप्यधिपो न स्या—दात्मवर्गविवर्जितः ॥ ज्योतिष्कनायकश्चंद्रो ।
न पुनर्भानुमान् मतः ॥ ६७ ॥ एकाकिनो हि संतापः । समर्थस्यापि जायते ॥ त्यक्तेन ग्रह-
तारार्द्यैः । किं नादित्येन तप्यते ॥ ६८ ॥ गुणैः सर्वज्ञकल्पोऽपि । सीदत्येको निराश्रयः ॥ अ-
नर्घ्यमपि माणिक्यं । हेमाश्रयमपेक्षते ॥ ६९ ॥ मदीयाः स्वजनाः संति । तथैव भवनं मम
॥ श्रीमच्चंपापुरीदेशे । विद्यते नात्र किंचन ॥ ७० ॥ अनृजुर्द्विज इत्येवं । विचिंत्योवाच भूप-
तिं ॥ महाराज यदि ग्रामं । मह्यं दास्यसि याचितं ॥ ७१ ॥ तदा चंपापुरीदेशे । ग्राममेकं
प्रदेहि मे ॥ ततस्तव प्रसादेन । तत्र स्थास्यामि सौख्यभाक् ॥ ७२ ॥ यद्यप्येष न देशोऽस्ति
। तवाज्ञाप्रतिपालकः ॥ तथापि बलिनां नैव । परदेशा हि कश्चन ॥ ७३ ॥ तत्प्रसीद प्रजा-
नाथ । पूरयस्व मदीप्सितं ॥ असंभाव्यापि यांचा स्या—न्महत्सु न हि निष्फला ॥ ७४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

करकंडुरत्राधिष्ठ । कस्तत्रास्ति महीपतिः ॥ दधिवाहन इत्येवं । वाडवेन प्ररूपितं ॥ ७५ ॥
अथ राज्ञा स्वहस्तेन । लिखित्वा लेखमुत्तमं ॥ दत्वाप्रैषि निजो दूतो । दधिवाहनसंनिधौ
॥ ७६ ॥ स गत्वा लिखितं दत्वे–त्युदारवचनोऽवदत् ॥ करकंडुर्मम स्वामी । नवंतमिति भा-
षते ॥ ७७ ॥ दधिवाहनभूपाल । देहि त्वद्देशमंतरा ॥ मज्जिरा ग्राममेकस्मै । ब्राह्मणाय य-
थेप्सितं ॥ ७८ ॥ पश्चाद्यो रोचते तुभ्यं । ग्रामो वा पुरमेव वा ॥ याचनीयो महीपाल । दा-
स्याम्यहमपि द्रागात् ॥ ७९ ॥ अदत्तुतेऽपि च सामर्थ्ये । न्यायमार्गो न मुच्यते ॥ इति हेतो-
र्मया राजन् । प्रतिदानं प्रदास्यते ॥ ८० ॥ वसुना गृह्यते वस्तु । न्याय एष महीतले ॥ व्य-
वहारस्ततः कार्य–स्त्वयायं शुद्धमिश्रता ॥ ८१ ॥ इति संदेशकं दूत–मुखेनावीवदद्यदा ॥
करकंडुस्तदा राजा । चुकोप दधिवाहनः ॥ ८२ ॥ भृकुटिं चाटयामास । भूपो भालस्थले रुषा
॥ कोदंडचंडप्रोद्दंडै–र्युद्धबुध्ध्यैव मार्गणं ॥ ८३ ॥ स्फुरदोष्ठो बभाणैवं । दधिवाहनभूपतिः ॥
रेरे चांडालपुत्रस्य । कः संसर्गो मया सह ॥ ८४ ॥ उत्तमानां जनैर्हीनै–र्व्यवहारो न पूज्य-
ते ॥ किं काकैः सह संसर्गं । राजहंसाः प्रकुर्वते ॥ ८५ ॥ आत्मानं स न जानाति । करकं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नुस्तव प्रभुः ॥ यदस्मान्भिः श्वपाकः सन् । व्यवहर्तुं समीहते ॥ ७६ ॥ अज्ञातं निर्धनो नूनं । कदाचिल्लभते धनं ॥ तदा तस्याभिमानेन । तृणवन्मन्यते जगत् ॥ ७७ ॥ तथा चोक्तं—अ- वंशपतितो राजा । मूर्खपुत्रो हि पंमितः ॥ अधनेन धनं प्राप्तं । तृणवन्मन्यते जगत् ॥ ७८ ॥ हीना जवंत्यहंमन्या । बलेनाल्पीयसापि हि ॥ महतोऽपि न सामर्थ्या—न्महांतस्त्वभिमानि- नः ॥ ७९ ॥ यतः—वृश्चिको विषलेशेना—प्युटत्युत्पाट्य कंटकं ॥ गर्वं विषभरेणापि । सर्पो नै- वापसर्पति ॥ ८० ॥ मामप्यपरभूपाल—सममेव स मन्यते ॥ बिले बिले न गोधाः स्युः । क- चित्स्युः पन्नगा अपि ॥ ८१ ॥ तद्याहि न हि दास्यामि । ग्रामं कंचन मामकं ॥ लज्जाकर- मिदं दानं । क्षत्रियेषु ददाति कः ॥ ८२ ॥ वसुना गृह्यते वस्तु । व्यवहारोऽयमीदृशः ॥ व- णिजामेव योग्यः स्या—द्वयं तु क्षत्रियाः पुनः ॥ ८३ ॥ आजन्म न मया चक्रे । याश्चाभं- गो हि कुत्रचित् ॥ परं येन परादेशं । विनाहं प्रार्थितो नृणा ॥ ८४ ॥ परं पराङ्मुखा यो मां । यदि किंचन याचते ॥ प्राणानपि ददाम्येव । परं तद्वस्तु न स्वकं ॥ ८५ ॥ तगच्छ रे यथा- यात—मित्युक्तस्तेन भूभुजा ॥ अर्धचंद्रं गले दत्वा । दूतो निर्वासितस्ततः ॥ ८६ ॥ करकं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भोः समीपेऽगा—त्तं वृत्तांतमचीकथत् ॥ दूतः प्रभूतकोपेना—रक्तनेत्रपयोरुहः ॥ ९७ ॥ नि-
शम्य तस्य वाक्यानि । करकंभोरभूत्तनौ ॥ स्वाभाविक्या समं कंडूवा । युद्धकंडूः सहायिनी
॥ ९८ ॥ सर्वांगोद्भवासमासाद्य । सद्यः कोपारुणेक्षणः ॥ सेवकानित्यभाषिष्ट । सज्जसैन्यं वि-
धीयतां ॥ ९९ ॥ एकोऽप्येष महाघरट्टपुटवत्पेष्टुं पटीयानहं । सज्जेनास्मि भुजद्वयेन सकला-
न् माषानिव द्वेषिणः ॥ भो भो भृत्यजना भवद्भिरसितः सज्यैः समैः साह्निभि—र्भाव्यं तत्र न-
रांगणे नरपतिः प्रोवाच सर्वानिति ॥ ६०० ॥ उत्तिष्ठन्नासनात्पूर्वा—चलादिव दिवाकरः ॥
राजापि शुशुभे क्रोधा—ज्ज्वलन्नारक्तदेहभाक् ॥ १ ॥ आदाय खड्गमुख्यानि । शस्त्राणि तं
च दंडकं ॥ निर्जगाम गजारूढो । नगरान्नगरेश्वरः ॥ २ ॥ तदा प्रस्थानवादित्रै—रवादि प्र-
तिशब्दिभिः ॥ भेजू रणरणकतां । रणे शूरा मनस्विनः ॥ ३ ॥ उद्धराः सिंधुरा नैके । दुर्ध-
राकारधारिणः ॥ भूधरं परिवव्रुस्तं । जंगमा इव भूधराः ॥ ४ ॥ खुराघातक्ष्मापीठ—स्फोट-
का घोटकास्तदा ॥ अत्युच्चैःश्रावसोऽभूवन् । भूपसंनिधिवर्तिनः ॥ ५ ॥ महारथा रथारू-
ढाः । प्रौढप्रौढिमधारिणः ॥ रणोत्सवोत्कसर्वांगा । भेजुः पद्मावतीसुतं ॥ ६ ॥ पदातयो म-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हावीर्याः । खक्कखेटकप्राणयः ॥ उच्चलंतो रणोत्साहा-त्प्रसरुः सर्वतोमुखाः ॥ ७ ॥ चतुरंग-
मथो सैन्यं । क्षोणिपीठमचुक्षुनत् ॥ चलत्पृथुलविस्तार-ममर्यादपयोधिवत् ॥ ८ ॥ अपरा
अपि नृपाल-श्रेण्यः सबलवाहनाः ॥ करकंडुबलं नेजु-र्निम्नगा इव सागरं ॥ ए ॥ बलोध्धु-
तरजोव्याजा-द्यशांसि विविधान्ययं ॥ भूयो देशांतरं गच्छन् । ददौ दिग्भ्यो दिशांपतिः ॥१०॥
समुध्धूते रजःपुंजे । रणोत्साहोत्सलहलं ॥ विलोक्याहश्यतां प्राप । भयादिव दिवाकरः ॥११॥
सामदानभेददंडै-रंतरावर्तिभूपतीन् ॥ साधयन्नाययौ चंपा-देशसंधिं स विक्रमी ॥ १२ ॥ त-
दुरूरं बलं दृष्ट्वा । ग्राम्यैरुच्चलितं जनैः ॥ सिंहदर्शनमासाद्य । शृगालैः स्थीयते कथं ॥ १३ ॥
सर्वश्चंपापुरीदेशः । शून्योऽभून्नीतमानसः ॥ उद्भूखलैर्भटैर्भूरि-भूतिरग्राहि लुंटनात् ॥ १४ ॥
करकंडुनराधीशः । पुनः संदेशहारकं ॥ चातुर्यधारकं प्रैषी-द्दधिवाहनसंनिधौ ॥ १५ ॥ स
गत्वोवाच भूपालं । प्रबलं दधिवाहनं ॥ पराक्रमात्कृतं येन । वीरवर्गावगाहनं ॥ १६ ॥ जो
जोः शृणु महाराज । मन्मुखेन मम प्रभुः ॥ त्वद्देशसंधिमायातो । भाषते करकंडुराद् ॥ १७ ॥
मदादेशाद् द्विजायास्मै । ग्राममेकं प्रदेहि भोः ॥ अथवा कुरु संग्राम-मिति कोटिद्वयी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मता ॥ १८ ॥ पुंसां कुलोद्भवानां नो । न चातुर्यविदां नृणां ॥ केवलं बलिनामेव । बलसाध्या वसुंधरा ॥ १९ ॥ शृगाला इव भूपालाः । पालयंति पितुर्भुवं ॥ सिंहा इव परं छिन्नाः । स्वयमार्जितभोजकाः ॥ २० ॥ अयं चांकालबालः सन् । संग्रामं किं करिष्यति ॥ गर्वावेशाद्दिशांनाथे—त्यवज्ञां मा कृथा वृथा ॥ २१ ॥ एकग्रामस्य चेल्लोभं । करिष्यसि तदा तव ॥ चिरस्थायि न पश्यामि । राज्यराष्ट्रादि किंचन ॥ २२ ॥ देशस्यार्थे त्यजेद्ग्रामं । ग्रामस्यार्थे कुलं त्यजेत् ॥ कुलस्यार्थे त्यजेद् गेहं । गेहस्यार्थे त्यजेन्नरं ॥ २३ ॥ प्राणान् देशं च राज्यं च । चेत्ते पालयितुं क्षमः ॥ ग्राम एकस्तदादेय—स्तोषणीयः स भूपतिः ॥ २४ ॥ ग्रामदानेन ते नाथ । संधिं कुरु महाभुजा ॥ विपत्सु तव साहाय्यं । प्रसन्नः स करिष्यति ॥ २५ ॥ स्वतो हीनबलेनापि । विरोधो न सुखश्रिये ॥ नृपेणाधिकवीर्येण । किं वाच्यं करकंडुना ॥ २६ ॥ आक्रमत् क्रमतो भूपान् । स स्वबाहुपराक्रमात् ॥ विचारय विचारज्ञ । संधिं तेन विधीयतां ॥ २७ ॥ एवंविधानि वाक्यानि । श्रुत्वा साटोपकोपवाक् ॥ दधिवाहन आचष्टे । क एष करकंडुराट् ॥ २८ ॥ यदेष मामुदासीन—मागत्यैवमुपस्थितः ॥ तत्प्रसुप्तस्य सिंहस्य । कर्णाग्रेऽकं

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

चकार सः ॥ २९ ॥ मन्ये दूत तव स्वामी । कृतांतेन कटाक्षितः ॥ विजिगीषुर्भुजंगेंद्रं । कि-
यज्जीवति दर्दुरः ॥ ३० ॥ यदेष मम देशस्थ—ग्रामग्रहणमिछति ॥ शेषनागशिरोरत्नं । स्नेक
इव समीहते ॥ ३१ ॥ कदाचिन्मृगतष्णायां । प्राप्यते शीतलं जलं ॥ परं न मामकं वस्तु ।
लप्स्यते स तव प्रभुः ॥ ३२ ॥ कपिकबूलतानेना—लिंगिताशुत्रमिछता ॥ यन्मया सह दुर्मे-
धो । युद्धं मृगयतिस्म सः ॥ ३३ ॥ माद्यन्मदेन मां दृष्ट्वा । गर्जंतं जलदोपमं ॥ मंदधीर-
धिकंमन्य—स्त्वत्प्रभुः शरज्ञायते ॥ ३४ ॥ पूर्वं निर्जत्सितोऽप्येष । पुनः किमिति ज्ञाषते ॥
अथवा न हि मूर्खाणां । प्रत्ययस्ताडनां विना ॥ ३५ ॥ पराजयौषधं दत्वा । छित्वा मानम-
यामयं ॥ एष सुस्थीकरिष्ये तं । भिषग्ज्वर इवातुरं ॥ ३६ ॥ सर्वांगोछ्वसितो राजा । त्रुट-
त्कवचकंचुकः ॥ आदिशत् सैनिका सैन्यं । सज्जं कुर्वंतु सत्वरं ॥ ३७ ॥ मतिचंद्रस्तदा मंत्री ।
नत्वा नृपालमब्रवीत् ॥ अधुना मधुना तुल्यं । मम वाक्यं निशम्यतां ॥ ३८ ॥ दृष्टस्त्वं वि-
क्रमी राजन् । श्रूयते सोऽपि विक्रमी ॥ नानालोकक्षयो भावी । युवयोर्युध्यमानयोः ॥ ३९ ॥
उजयोरिनयोर्बद्ध—मानयोर्युध्यमानयोः ॥ पराजयजयौ नैव । परं वृद्धक्षयो नवेत् ॥ ४० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तन्मुंच समरारंभं । निर्दंभ करुणापर ॥ परमामोदसंपादी । साधीयान् संधिरेव हि ॥ ४१ ॥
दधिवाहनभूपाल—माक्रम्य ग्राममग्रहीत् ॥ इति लोकापवादस्य । भयं कार्यं न किंचन ॥ ४२ ॥
सर्वथा स्वहितं कार्यं । लोकः किं वा करिष्यति ॥ नोपायः कोऽपि तादृक्षो । येन सर्वोऽनुर-
ज्यते ॥ ४३ ॥ एकग्रामकृते नाथ । संग्रामः किं विधीयते ॥ लाभालाभौ विचार्यो यै—र्लभ्ये
कार्ये हि यत्यते ॥ ४४ ॥ उक्तं च—पुष्पैरपि न योधव्यं । किं पुनर्निशितैः शरैः ॥ युद्धे वि-
जयसंदेहः । प्रधानपुरुषक्षयः ॥ ४५ ॥ त्वयापमानितेनापि । न कार्यो रोषविप्लवः ॥ अग्नि-
ना तापितं वापि । दुग्धं मधुरमेव हि ॥ ४६ ॥ नमंति सफला वृक्षा । नमंति गुणिनो जनाः
॥ दुर्जनाः शुष्ककाष्टं च । न नतिं कुरुते क्वचित् ॥ ४७ ॥ इति मंत्री सुधाभाभि—र्गीर्भिर्भूपं
व्यजिज्ञपत् ॥ तावत्तद्देशवास्तव्यै—र्लोकैरागत्य पूत्कृतं ॥ ४७ ॥ महाराजत्वद्देशं । करकंडु
नरेश्वरः ॥ अध्वंसिष्टेव निर्नाथं । मत्तेभ इव काननं ॥ ४९ ॥ ततो भीताः प्रविष्टा स्मो । न-
गरेऽस्मिन् महीपते ॥ ध्वांताराताविवायाते । कायरा इव सद्मसु ॥ ५० ॥ निर्नाथानामिवा-
स्माकं । वस्तूनि सकलान्यपि ॥ मुषाण स नृपो हाहा । स्वामिनि त्वयि सत्यपि ॥ ५१ ॥ क

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिष्ठामः क गच्छामः । किं ब्रूमः किमु कुर्महे ॥ सर्वस्वमपि चास्माकं । तेन भूपेन लुंटितं ॥ ५२ ॥ इति लोकवचो भूपो—रसि रोषं पुपोष च ॥ ज्वलंतं ज्वलनं यद्व—त्प्राज्याज्यक्षेपणं क्षणात् ॥ ५३ ॥ नृपे शिक्षासुधाधारा । मतिचंद्रस्य मंत्रिणः ॥ कुंभस्य परिपूर्णस्यो—परिष्टादिव सावहत् ॥ ५४ ॥ इतः कारयते संधि—मितो देशं च लुंटति ॥ दूत ते मलिनः स्वामी । जातितः कर्मणोऽपि च ॥ ५५ ॥ त्वं दूत इत्यवध्योऽसि । कोपपाटलया दृशा ॥ राज्ञेति भर्त्सितो दूतो । निर्गत्यागात्स्वमास्पदं ॥ ५६ ॥ अथ प्रस्थातुकामोऽसौ । पुर्यां संग्रामवादयत् ॥ सिसिधुः सुभटाः स्फूर्त्या—स्फालयंतो निजान् भुजान् ॥ ५७ ॥ स्थानात्स्थानादथाघातै—र्दीर्घहुंकारकारिभिः ॥ पुरं शूरैश्चलत्पूरै—रकारि तुमुलाकुलं ॥ ५८ ॥ दधिवाहनभूपालो । विपक्षक्षेपदक्षिणः ॥ प्राचालीदावृतः सम्यक् । सेनया चतुरंगया ॥ ५९ ॥ आगमदेशसीमायां । यत्रास्ति करकंडुराट् ॥ शूरसेनं स्वसेनायां । सेनान्यं कुरुतेस्म सः ॥ ६० ॥ करकंडुनरेंद्रोऽपि सेनान्यं सैन्यरक्षकं ॥ आनंदाह्वीटकं दत्वा । जयानंदमतिष्ठपत् ॥ ६१ ॥ सैन्ये संबद्धवद्धे ते । उभे अपि परस्परं ॥ आसन्नमीयतुः क्षुब्धा—विव पूर्वापरांबुधी ॥ ६२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रणत्तूर्याणि वर्याणि । सैन्ययोरुभयोरपि ॥ अन्योन्यं क्षोभकारीणि । वादितानि मुहुर्मुहुः ॥ ६३ ॥ हस्तानुत्पाट्य साटोपं । बप्प बप्पेति वादिनः ॥ उच्चैरूचुस्तदा भट्टा । भटानां बिरुदावलीः ॥ ६४ ॥ अग्रगा अथ योद्धारो । दुर्धरा युद्धमुद्धताः ॥ आरेभिरे महारंभं । प्रेक्षकाणां भयंकरं ॥ ६५ ॥ मुक्तैराकर्णमाकृष्य । गणनातीतमार्गणैः ॥ अभूत्सैन्यद्वयस्यापि । मस्तकोपरि मंडपं ॥ ६६ ॥ आस्फलत्सादिना सादी । निषादी च निषादिना ॥ रथी च रथिना साकं । पदातिश्च पदातिना ॥ ६७ ॥ सामंतेन च सामंतः । सेवकेन च सेवकः ॥ सैन्ययोरुभयोरेवं । न्याययुद्धमजायत ॥ ६८ ॥ युग्मं ॥ बाणैः प्राणहरैर्वेगा—न्मुक्तैः कोदंडदंडतः ॥ घोरांधकारमत्राभू—त्सर्वत्रापि रणांगणे ॥ ६९ ॥ खड्गाखड्ग्यंकुशांकुशि । कुंताकुंति शराशरि ॥ दंडादंडि तथा मुष्टा—मुष्टि दुष्टो रणोऽभवत् ॥ ७० ॥ सुभटालीः करालेषु । करवालेषु सेवते ॥ प्रतिबिंबछलादेत्य । कंप्रकायो रविर्भयात् ॥ ७१ ॥ युध्यमानाः कबंधाद्याः । करिवाजिरथादिषु ॥ मस्तकानि यथा यातं । नलिनीदलनीलया ॥ ७२ ॥ करकंडुनरेंद्रेणो—त्साहितैरुत्कटैर्भटैः ॥ बले चंपापुरीशस्य । सकले व्याकुलीकृते ॥ ७४ ॥ क्रुद्धं स्वसैन्यभंगस्य ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दर्शनाद्दधिवाहनं ॥ उत्तिष्ठंतं नृपं प्रह्वः । सूरसेनो व्यजिज्ञपत् ॥ ६५ ॥ तेन चांडालबालेन ।
समं योध्धुं समुद्यते ॥ त्वयि नो श्लाघ्यता कापि । जयेऽपि च पराजये ॥ ६६ ॥ करिकुंभ-
स्थलस्थायि–मुक्ताफलहरे हरौ ॥ शृगालास्फालनस्तुत्या । निंदैव न पुनः स्तुतिः ॥ ६७ ॥ त-
त्स्वयं तिष्ठ हे स्वामिन् । मामेवात्र समादिश ॥ मया प्रभुप्रसादेन । तस्य शिक्षा करिष्यते
॥ ६८ ॥ यथा नभःस्थितः सूर्यः । करैर्विध्वंसयेत्तमः ॥ तथा स्थानस्थितो राजा । वैरिवर्गं स्व-
सेवकैः ॥ ६९ ॥ दधिवाहन इत्येवं । विज्ञप्तो भूरिभक्तितः ॥ सेनान्ये सूरसेनाय । रणार्थं
बीटकं ददौ ॥ ७० ॥ सूरसेनोऽथ सेनानीः । प्राप्यादेशं निजप्रभोः ॥ स्वयं योध्धुं समुत्तस्थौ
। धनुरास्फालयन् बली ॥ ७१ ॥ स शरासननिर्मुक्तैः । शरैरापूरयन् दिशः ॥ शुशुभे भाद्र-
पदीय—पयोद इव वारिभिः ॥ ७२ ॥ नाददानः संदधन्नो । न च मुंचन् शिलीमुखान् ॥
केवलं प्रहरन्नेवा-- वेदि वेदनयारिभिः ॥ ७३ ॥ वेगवद्रथमासीनो । नान्यस्थानं परिभ्रमन्
॥ एकोऽप्यनेकरूपोऽभू—त्स बाणैः प्राणहारणः ॥ ७४ ॥ परं पराक्रमं दृष्ट्वा । करकंडुभटै-
र्भयात् ॥ नमोऽकारि प्रणश्यद्भि—राहवे तस्य बाहवे ॥ ७५ ॥ सैन्यमालोकयामास । स सु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राद्रिरिवांबुधिं ॥ करकंडुजटा मत्स्या । इव व्याकुलतां ययुः ॥ ७६ ॥ वैरिकासारविक्षोभं । कासरेऽस्मिन् प्रकुर्वति ॥ बभूवुः सुभटास्तीरे । दर्दुरा इव नीरवः ॥ ७७ ॥ यदा न कोऽप्यभूद्वीरः । सूरसेनस्य सन्मुखः ॥ मदात्तदावदत्सोऽपि । तृणवद्गणयन् जगत् ॥ ७८ ॥ मा नैषुनं हनिष्यामि । क्षत्रियोऽहं प्रणश्यतः ॥ तथा कृते मम स्वामी । लज्जते दधिवाहनः ॥ ७९ ॥ चांमालः करकंडुराहवकलां बाल्ये न योऽन्यस्तवा—नज्ञानः समरेऽधुना कथमसौ युद्धार्थमाहूयते ॥ निःसत्वोंत्यजसेवकः किमु जयानंदः स आकार्यते । तस्मात्संप्रति मे रणांगणरसं कः पूरयिष्यत्यहो ॥ ८० ॥ स्मरति न मृदुदेहां गेहिनीं नापि गेहं । धनकनकसमूहं यः स्वचित्ते न धत्ते ॥ मरणमभिलषेद्यो जीवितव्यान्निराशः । स समरभुवमेतां मत्पुरस्तात्समेतु ॥ ८१ ॥ गर्जंतमिति साटोपं । सेनान्यं जितकाशिनं ॥ श्रुत्वा कोपाज्जयानंद । उत्तस्थौ रणकर्मणे ॥ ८२ ॥ सूरसेनं बभाषे स । बहु मा ब्रूहि पौरुषं ॥ क्षत्रिया न हि वाक्शूराः । शूराः किंतु रणांगणे ॥ ८३ ॥ इत्युक्त्वा सोऽचलद्युद्ध-सज्जीभूतवपू रुषा ॥ सहंतेऽरिपराभूतिं । पौरुषान्न हि पूरुषाः ॥ ८४ ॥ ववर्ष शरधाराभिः । स भाद्रपदमेघवत् ॥ द्विधापि दुर्दिनं

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

जज्ञे । वैरिवर्गांबरांतरे ॥ ९५ ॥ न सादी न निषादी च । न पदाती रथी न च ॥ सूरसेनं विना शूरो । नाभूत्कश्चन सन्मुखः ॥ ९६ ॥ सूरसेनजयानंदौ । नदंतौ सिंहनादतः ॥ वनसिंहाविवोन्मत्ता—वागमाते रणांगणं ॥ ९७ ॥ उभावपि महाबाहू । उभावपि महौजसौ ॥ उभावपि महामर्षा—द्विविधायुधवर्षिणौ ॥ ९८ ॥ युध्यमानावुभौ दृष्ट्वा । नभःस्थितदिवौकसः ॥ न स्थातुं शेकिरे गंतुं । भीतिकौतुहलाकुलाः ॥ ९९ ॥ युगलकं ॥ वेणीदंडः प्रचंडः किमयमकृपणः स्यात्कृतांतस्य किंवा । स्फूर्जत्प्रत्यर्थिपृथ्वीपतिविनतिभवं दुर्यशो मूर्तमेतत् ॥ किंवा कोपाग्निधूमः किमियमसिलतेत्याद्यमाशंकमानै—र्मेने वैमानिकौघैरुभयसुभटयोरीक्ष्यमाणैः कृपाणैः ॥ ७० ॥ उभयो रथचारिभि—श्चकंपे क्षोणिमंडलं ॥ चुक्षुभे सागरेणापि । कंपितं पर्वतैरपि ॥ १ ॥ कारं कारं टणत्कारान् । मोचं मोचं शिलीमुखान् ॥ युयुधाते तथा किंचि—द्यथा भीतं सुरैरपि ॥ २ ॥ खड्गेन खड्गमास्फाल्य । सुभटाभ्यां स्फुलिंगकैः ॥ शराच्छादितमार्तंडं । नभस्तारांकितं कृतं ॥ ३ ॥ एवमादिप्रकारेण । द्वयोरास्फाल्यतोरभूत् ॥ कृतिर्नैकतरस्यापि । दृढयोर्वज्रगोलवत् ॥ ४ ॥ अजेयमपरैः शस्त्रै-स्तं ज्ञात्वा वैरिणं रणे ॥ अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वाशीर्देवतादत्तां । शूरसेनस्तदा गदां ॥ ५ ॥ निर्दयं गदया हत्वा । ज्वालामालाकरालया ॥
शूरसेनो जयानंदं । भूमीपीठमलीलुठत् ॥ ६ ॥ पतितस्यापि घाताय । स प्राणहरणोद्यतः ॥
गदामुत्पाटयन् दृष्ट्वा । हक्कितः करकंडुना ॥ ७ ॥ किमेतत्कुरुषे पाप । क्षत्रियाजात रेऽध-
म ॥ पतिता न हि हंतव्या । उत्तमैर्वीरमानिभिः ॥ ८ ॥ इति निर्भर्त्सितः शूर—सेनोऽवो-
चद्रे जड ॥ किं प्रत्ययो न जातस्ते । सेनानीसैन्यवीक्षणात् ॥ ९ ॥ किं ब्रूषे रे श्वपाकात्र ।
पराक्रमविवर्जित ॥ श्मशानं विद्यते नेदं । क्षत्रियाणां रणो ह्ययं ॥ १० ॥ यद्यंतकगृहं गत्वा—
तिथीभवितुमिच्छसि ॥ तदागच्छ त्वमप्यत्र । पूरयामि मनोरथं ॥ ११ ॥ प्रत्युत्तरमनुक्त्वैव ।
करकंडुनरेश्वरः ॥ अचीचटद्धनुर्बाणौ । विशिष्य तस्य सन्मुखं ॥ १२ ॥ एकेन तेन बाणेन ।
स तत्कोदंडमच्छिदत् ॥ द्वितीयेनाथ बाणेना—ध्वंसिष्ट रथसारथी ॥ १३ ॥ लीलयैव स भू-
पीठे । शूरसेनमपातयत् ॥ महांतो नैव जल्पंति । कुर्वैव दर्शयंति यत् ॥ १४ ॥ पदातीभूय
संक्रुद्धः । शूरसेनोऽभ्यधावत ॥ गदामुत्पाट्य हस्ताभ्यां । करकंडुनृपंप्रति ॥ १५ ॥ कदाचि-
ल्लभ्यते रत्नं । पतितं सागरांतरे ॥ परं पुरुषरत्नं नो । हतं कथन दृश्यते ॥ १६ ॥ इदं पुरुष-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

रत्नं त—न्मा विनश्यतु सांप्रतं ॥ इत्यायतिं चिंतयन् दीर्घ—मतिः स करुणापरः ॥ १७ ॥
रथादुत्तीर्य वीर्याढ्यः । शूरसेनस्य तां गदां ॥ स तूर्णं चूर्णयामास । स्वेन दंडेन केवलं
॥ १८ ॥ त्रिभिर्विशेषकं ॥ गदां चूर्णमयीं दृष्ट्वा । भयोऽेकवशंवदः ॥ दुःस्वापनोदनसखीं ।
मूर्छां लेभे स सैन्यपः ॥ १९ ॥ उपाचरन्नरेशस्तं । वारिचंदनवीजनैः ॥ महांत उपकुर्वंति ।
दुःस्थावस्थानरीनपि ॥ २० ॥ द्विषं व्यावृत्तचैतन्यः । सैन्यपः स्वोपचारकं ॥ दृष्ट्वा मानध-
नो मेने । जीवितान्मरणं वरं ॥ २१ ॥ अंतरिक्षमिवातार-मतारमिव लोचनं ॥ कासारमिव
निर्नीरं । निःशाखमिव शाखिनं ॥ २२ ॥ चंद्रं निश्चंद्रिकमिव । निर्भृत्यमिव भूभुजं ॥ भुजं-
गमिव निर्दंष्ट्र—मंगवन्नतभूषणं ॥ २३ ॥ निस्तोरणमिव द्वारं । निर्दंतमिव दंतिनं ॥ निरस्त्रं
शूरसेनं तं । वीक्ष्येषज्जहसुर्जनाः ॥ २४ ॥ त्रिभिर्विशेषकं ॥ ह्रिया नम्रमुखः पश्यन् । विवि-
क्षुरिव भूतलं ॥ अनश्यज्जीवमादाय । सेनानीः सेनया सह ॥ २५ ॥ जयानंदः समुत्तस्थौ ।
सज्जीभूतः क्षणांतरे ॥ अभूज्जयजयारावः । करकंबुबलेऽखिले ॥ २६ ॥ करकंबौ महाशूरे ।
स्वयं योध्धुं समुद्यते ॥ भयादिव दिवाधीशो । निलीनः पश्चिमांबुधौ ॥ २७ ॥ प्रससारांधका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रौघौ । विवेकी करकंडुराट् ॥ निवार्य संयतो भृत्यान् । स्कंधावारमवीविशत् ॥ २७ ॥ दधिवाहनराजोऽथ । क्रुद्धो भृकुटीभीषणः ॥ तदैव योध्धुमुत्तस्थौ । दंतैर्दंतछदे दशन् ॥ २९ ॥ स्वामिन् रात्रिरियं जाते—त्यामुक्त्वा मंत्रिभिर्नृपः ॥ सुस्थीकृतो यथास्थानं । सोऽपि सैन्यं न्यवेशयत् ॥ ३० ॥ प्रातःकालेऽथ संजाते । रणत्तूर्यादिपूर्वकं ॥ उभे अपि महासैन्ये । आरेभाते रणांगणं ॥ ३१ ॥ दर्शयैतेषु चांफालः । करकंडुः स को भवेत् ॥ दधिवाहनराजेन । पृष्ट एकः पुमानिति ॥ ३२ ॥ स प्राह साहसाधारो । ज्वलदंकस्फुरत्करः ॥ यो धुन्वन् वैरिणो वृक्षा—नागछन्नस्ति हस्तिवत् ॥ ३३ ॥ स्फूर्त्याकृत्या शरीरस्य । वर्णेन च महौजसा ॥ तवैव सदृशो योऽस्ति । करकंडुमुवैहि तं ॥ ३४ ॥ निशम्येति नराधीशः । श्रीकांचनपुराधिपं ॥ विलोक्योद्धतयोद्धार—मिति चेतस्याचिंतयत् ॥ ३५ ॥ यत्राकृतिस्तत्र गुणा भवंति । यस्मिन् गुणास्तस्य कुलं प्रधानं ॥ तस्मादयं क्षत्रिय एव कश्चि—त्स्फूर्त्या तथा स्यान्न पुनः श्वपाकः ॥ ३६ ॥ विमृशन्निति साश्चर्यं । श्रीमच्चंपापुरीश्वरः ॥ करकंडुं समायांत—मत्यासन्नं समैक्षत ॥ ३७ ॥ तस्य दर्शनमात्रेण । दक्षिणेनास्य चक्षुषा ॥ स्फुरितं तत्क्षणं दक्षि—णेष्टसंगम-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सूचकं ॥ ३८ ॥ सांप्रतं दक्षिणं चक्षुः । स्फुरितं केन हेतुना ॥ उत्कटो दृश्यते वैरी । कुत्रा-
त्राभीष्टसंगमः ॥ ३९ ॥ तदिदं निष्फलं नून—मथवा नात्र संशयः ॥ अनेके प्रत्यया जाता
। येनैतस्य पुरा मम ॥ ४० ॥ एवं विचिंतयन् राजा । नृपेण करकंडुना ॥ सह संग्राममारे-
भे । सहसा साहसालयः ॥ ४१ ॥ त्रिभिर्विशेषकं ॥ श्रीकांचनपुरेशस्य । दर्शनादमृतादिव ॥
दधिवाहननृपस्यो—पशाम्यत्कोपपावकः ॥ ४२ ॥ अन्योन्यं पितृपुत्रत्व—प्रेमप्राग्भारपूरितौ ॥
युध्यमानावुभौ बाणान् । साशंकं मुंचतःस्म तौ ॥ ४३ ॥ चंपेशस्तत्र जानाति । यदेतस्य सु-
तेजसः ॥ निजांगजवदुत्संग—मारोप्याश्लेषमादधे ॥ ४४ ॥ करकंडुश्च जानाति । विनयेन न-
माम्यहं ॥ तातस्येवास्य पत्पद्मं । युध्येऽहं किमनेन हि ॥ ४५ ॥ इत्यन्योन्योल्लसत्प्रेम—कलि-
तावपि लीलया ॥ अयुध्येतां तथा किंचि—द्यथाश्चर्यमिवाभवत् ॥ ४६ ॥ चिरात्पद्मावतीजा-
त—श्चंपेशचापमच्छिदत् ॥ खड्गादीन्यपि शस्त्राणि । खंडशोऽन्यान्यखंडयत् ॥ ४७ ॥ अहो शौ-
र्यमहो वीर्य—महो रूपमहो महः ॥ अहो माहात्म्यमेतस्य । जगदाश्चर्यकारणं ॥ ४८ ॥ अ-
स्याग्रतो न जेतव्यं । पलायनमितो वरं ॥ एतद्विमृश्य संग्रामा—त्प्राणशद्दधिवाहनः ॥ ४९ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नंष्ट्वा प्राप्तः पुरीं चंपां । दुर्गरोधं चकार सः ॥ स्वसैन्यैः करकंडुश्च । तं कोट्टं पर्यवेष्टयत् ॥ ५० ॥ कपिशीर्षस्थितानेक–सुन्नटैः सह दुःसहः ॥ संग्रामो जायते नित्य–मन्योन्यं नृपयोस्तयोः ॥ ५१ ॥ अस्मिन्नवसरे पद्मा–वती व्रतवती सती ॥ अश्रौषीज्जनचक्रेज्यो । विग्रहं पितृपुत्रयोः ॥ ५२ ॥ विज्ञप्य सकलं बाल–त्यामाद्यं निजचेष्टितं ॥ सागान्महत्तरादेशा–न्निधिवत्सैन्यसन्निधौ ॥ ५३ ॥ करकंडूवतिके सागा—त्तस्याः सन्मुखमुत्थितः ॥ स पादयोर्लुठन्मौलि—रिति प्रांजलिरन्यधात् ॥ ५४ ॥ धन्योऽहं कृतपुण्योऽहं । न्नाग्यवानहमेव हि ॥ मद्गृहे नगवत्या य––त्कृतं पादावधारणं ॥ ५५ ॥ अद्य मे सफले नेत्रे । अद्य मे सफलं शिरः ॥ अद्य मे सफला वाणी । यत्त्वं दृष्ट्वा नता नुता ॥ ५६ ॥ नेत्राज्यां प्रमदामृतेन न्नरितं देहेन रोमांचितं । शीर्षेणोत्सुकितं ममोत्तमनमस्कारक्रियायां तथा ॥ चित्तेनोच्छ्वसितं सितं गुणगणं स्तोतुं गिरा कांक्षितं ॥ हर्षाद्वैतमिवाभवद्भगवति त्वद्दर्शनात्सांप्रतं ॥ ५७ ॥ न्नवती नगवत्यस्ति । सर्वजीवेषु वत्सला ॥ सर्वकाले विशेषेणा–वात्स्यान्मयि कृपापरा ॥५८॥ निषीदात्र प्रसीद त्वं । वदागमनकारणं ॥ अमंदानंदसंदोह–कंदकंदलनांबुदं ॥ ५९ ॥ नगव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्याह हे वत्स । कुलीन क्षत्रियोत्तम ॥ पित्रैष सह संग्रामः । किमारब्धस्त्वयाधुना ॥ ६० ॥
सविस्मयः स वक्तिस्म । प्रसादसदनाशये ॥ जगदे जगदेकार्थ्यैं । भगवत्या किमीदृशं ॥ ६१ ॥
पितायं मम चांडाल–स्तत्पादयुगपंकजं ॥ देवस्येवास्य सेवेऽहं । विरोधः क्वास्ति तेन मे ॥६२॥
साध्वी पुनर्बभाणैवं । वत्स नायं पिता तव ॥ किंतु माता त्वदीयाहं । पिता तु दधिवाहनः
॥ ६३ ॥ सा दोहदात्समारभ्य । गजेंद्रहरणादिकं ॥ श्मशानत्यागपर्यंतं । सर्वं वृत्तांतमभ्य-
धात् ॥ ६४ ॥ आहूतः सोऽपि चांडालः । पृष्टश्च करकंडुना ॥ अनेकान् शपथान् दत्वा । स
सत्यं प्रोक्तवांस्ततः ॥ ६५ ॥ पितुर्नामांकितां मुद्रां । रत्नाढ्यं रत्नकंबलं ॥ आनीय दर्शयामा-
स । स तस्य पुरतस्तदा ॥ ६६ ॥ ज्ञातोदंतो महानंद–पूरपूरितमानसः ॥ तस्या मातुः पदां-
भोजे । स ननाम मुहुर्मुहुः ॥ ६७ ॥ वत्सैनं विग्रहं मुंच । पद्मावत्येति भाषिते ॥ स गर्वप-
र्वतारूढः । प्रांजलिः संस्तदावदत् ॥ ६८ ॥ क्षत्रियैर्नैव गण्यंते । पितृभ्रात्रादयो रणे ॥ तत्कथं
सांप्रतं युद्धं । सह पित्रा त्यजाम्यहं ॥ ६९ ॥ तथा कृते कथं तात–पादैरेव न लज्ज्यते ॥
तदुपेत्य न नंस्यामि । श्रीतातानपि सांप्रतं ॥ ७० ॥ हे मातस्तावकादेश–पालको बालको

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

ह्ययं ॥ तथापि त्रपयैवाहं । न कुर्वाणोऽस्मि ते वचः ॥ ७१ ॥ निशम्य तस्य वाक्यानि । म-
हासत्येति चिंतितं ॥ ऋद्धिमान् यौवनोन्मादी । स्वयं नंस्यति न ह्ययं ॥ ७२ ॥ उक्तं च—
यौवनं धनसंपत्तिः । प्रभुत्वमविवेकिता ॥ एकैकमप्यनर्थाय । किं पुनर्यत्रिसंगमः ॥ ७३ ॥
तथा च—दानानुसारिणी कीर्तिः । स्फुर्तिर्वित्तानुसारिणी ॥ वयोऽनुसारिणी बुद्धिः । सि-
द्धिर्भाग्यानुसारिणी ॥ ७४ ॥ कुशाग्रीयमतिर्दक्षः । प्रपन्नो दधिवाहनः ॥ वर्तते यौवनातीत-
स्तस्य पार्श्वे व्रजामि तत् ॥ ७५ ॥ ज्ञातोदंतः स एतस्य । हर्षात्सन्मुखमेष्यति ॥ पश्चादेषोऽ-
पि तस्यांह्री । कुलीनो नमसिष्यति ॥ ७६ ॥ विमृश्येति समुत्थाय । धर्मलाभं प्रदाय सा ॥
गता चंपापुरीलोकै—र्दृष्टा दृष्टचरा चिरात् ॥ ७७ ॥ पद्मावती समायाते—त्याचख्यौ कश्चि-
त्सुकः ॥ राजांतःपुरनारीणां । पुरतः परया मुदा ॥ ७८ ॥ निशम्यास्तोकशोकास्ता—श्चेतस्ये-
तदचिंतयन् ॥ हागतं स्वामिनो मानं । स्त्रीरत्नं चेत्तदागतं ॥ ७९ ॥ अथ राजांगणायातं ।
संयतीवेषधारिणीं ॥ दृष्ट्वा पद्मावतीं सुस्थी—बभूवुर्भूपवल्लभाः ॥ ८० ॥ प्रणेमुस्तत्पदांभो-
जे । राज्ञ्यो भक्तिभरान्विताः ॥ सत्वरो नरनाथोऽपि । समायातस्तदंतिकं ॥ ८१ ॥ प्रणम्या-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रबदानंदा—द्राजा रोमांचकंचुकः ॥ महासत्यधुना गर्ज्ञो । मामकीनः क्व विद्यते ॥ ७२ ॥ अ-
द्य यावद् द्वयं चित्ते । शल्यवच्छल्यतिस्म मे ॥ एको जवतीविरहो । द्वितीयो गर्ज एवः सः ॥
॥ ७३ ॥ यस्यावतारतो मातु-रुत्तमो दोहदोऽजवत् ॥ जविता जाग्यवान् गाढं । स नूनं नं-
दनो मम ॥ ७४ ॥ राजीवेषु विकासः क्व । विना राजीवबांधवं ॥ कोत्तमो दोहदो मातु-र्जा-
ग्यवंतं सुतं विना ॥ ७५ ॥ एवं पृष्टा नरेंद्रेण । बजाषेऽथ महासती ॥ करकंडुरयं राजा । स
गर्जो द्वारि संस्थितः ॥ ७६ ॥ सिक्तोऽमृतजरेणेव । वचसा तेन जूपतिः ॥ महासत्यपि वृत्तां-
तं । सर्वं सौवमचीकथत् ॥ ७७ ॥ राजा गजेंद्रमारुह्य । कृत्वा च रणवारणं ॥ प्रतस्थे सप-
रीवारो । निजनंदनसन्मुखः ॥ ७८ ॥ अथ राजानमायांतं । प्रेक्ष्य संतोषिताशयः ॥ करकं-
डुर्नरेंद्रोऽपि । तस्य सन्मुखमागमत् ॥ ८१ ॥ गजेंद्रादवतीर्यायों । जूमीपीठे लुठन् लुठन् ॥
आगत्य विनयात्तात—पादपीठं नमोऽकरोत् ॥ ८२ ॥ पादौ प्रमार्जयामास । कोटितैर्निजमू-
र्धजैः ॥ तत्पादौ कालयामास । श्रवद्भिः प्रमदाश्रुभिः ॥ ८३ ॥ सुतमुत्थाप्य हस्ताज्यां । ल-
ज्जया प्रणताननं ॥ आलिलिंगोच्चलत्प्रेम्णा । पिता हर्षाश्रुलोचनः ॥ ८४ ॥ निपत्य पादयो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तातं । करकंडुर्व्यजिज्ञपत् ॥ हे हे तात तितिक्षस्व—पराध्यं निर्मितं मया ॥ ९५ ॥ क-
दाचिदपराध्यंति । कुपुत्रीभूय पुत्रकाः ॥ कृतेष्वप्यपराधेषु । तातस्तातः स एव हि ॥ ९६ ॥
सुते कृतापराधेऽपि । तातः प्रीत इवांबुधेः ॥ दोषाकरः स्पृशन् पादै—रप्युल्लासकरः शशी ॥
॥ ९७ ॥ पिताह सहसाश्लिष्यन् । स्नेहसंश्लिष्टया गिरा ॥ अयं तवापराधोऽपि । नंदनानं-
दनो मम ॥ ९८ ॥ इत्युदीर्य महावीर्यं । चुचुंब निजमंगजं ॥ गजमारुह्य राजेंद्रः । स्वांकमा-
रोपयत्सुतं ॥ ९९ ॥ नाना मंगलगीतगाननिवहैः संतोष्यमानश्रुतिः । प्रेक्ष्यप्रेक्षणकक्षणे-
क्षणचरच्चक्षुर्द्वयव्यापृथिः ॥ उत्संगोपरि संस्थितांगजवपुः प्रेम्णा कराभ्यां स्पृशन् । पौरो-
त्तंभिततोरणां नरपतिश्चंपापुरीं प्राविशत् ॥ ८०० ॥ आगत्य सिंहासनसंस्थितस्य । चिंतेति
चित्ते समभून्नृपस्य ॥ स्वभावतो जर्जरमस्थिरं य—दग्रस्तं पुनस्तज्जरया वपुर्मे ॥ १ ॥ शरीर-
शोभा सुमनोवनोपमं । गतं समस्तं मम यौवनं वयः ॥ कृतः कृतार्थो न हि मानवो भवो।
हा हाद्य यावत्स मुधैव हारितः ॥ २ ॥ उद्धुरस्कंधरा एते । राज्यभारधुरंधराः ॥ करकंडुस-
माः पुत्रा । ममाभूवन्ननेकशः ॥ ३ ॥ तस्मात्सद्गुरुसंयोगः । सांप्रतं जायते यदि ॥ इदं राज्यं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राज्यं परित्यज्य । प्रव्रज्याराज्यमाददे ॥ ४ ॥ एवं यावत्समारूढो । मनोरथरथं नृपः ॥ व-
नपालः समागत्य । तावदेवं व्यजिज्ञपत् ॥ ५ ॥ श्रीधर्मघोषसूरींद्रा । इव चंद्रा अवातरन् ॥
वने व्योम्नीव ताराभिः । साधुराजिभिरावृता ॥ ६ ॥ इत्याकर्ण्य नराधीश–स्तोषितः पारि-
तोषिकं ॥ तस्मै सर्वांगाभरणा—दिकं दानं ददौ मुदा ॥ ७ ॥ सपुत्रः सपरीवार । उद्यानम-
चलन्नृपः ॥ चिंतयन्निति सानंदं । सिद्धो मम मनोरथः ॥ ८ ॥ दूराद्गजेंद्रादवतीर्य भक्तितो
। भूमीपतिर्भूमितले लुठन् लुठन् ॥ आगत्य वारत्रितयं प्रदक्षिणां । दत्वा गुरोरंह्रियुगं नमो-
ऽकरोत् ॥९॥ श्रीधर्मघोषसूरींद्रः । प्रारेभे धर्मदेशनां ॥ भो भो भव्या भवांभोधि–रपारोऽयं दु-
रुत्तरः ॥ १० ॥ तत्र कर्ममहावाते—रितश्चेत् त्रिजगज्जनः ॥ मोहावर्ते पतेत्तर्हि । स विद-
ध्यादधोगतिं ॥ ११ ॥ मोहव्याघ्रो भवाटव्यां । ग्रसते शीघ्रमंगिनः ॥ आरोहति परं यो नो
। जिनधर्मतरुं गुरुं ॥ १२ ॥ राज्यलक्ष्मीः समस्तेयं । चपला गजकर्णवत् ॥ संध्यारागानुकारं
च । जीवानां जीवितं खलु ॥ १३ ॥ निजसद्मनि पद्मापि । याहोरात्रं न तिष्ठति ॥ सा क-
थं परगेहेषु । श्रीः स्थिरत्वं करिष्यति ॥ १४ ॥ सुखैककांक्षिणो जीवाः । सुखं तु सुकृताद्भ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेत् ॥ तत्तदेव विधातव्यं । प्रयत्नेन विचक्षणैः ॥ १५ ॥ जीवोऽयमुद्यमी याद्द—गर्थोपार्जन-
हेतवे ॥ तादृक्चेद्धर्मकार्याय । तदा किं नास्य सिध्यति ॥ १६ ॥ अर्थमूलो गृहावासः । स
त्वार्थोऽनर्थकारणं ॥ सर्वसंग्या परित्यागः । कर्तव्यस्तेन हेतुना ॥ १७ ॥ अर्थेन दृष्टमात्रेण ।
जीवो भवति लोभवान् ॥ लाभेन गणयेन्नैव । सुहृदो न च बांधवान् ॥ १८ ॥ अर्थस्यान-
र्थमूलत्वे । कथ्यमानाधुना कथा ॥ चित्तेन सावधानेन । भो भो सभ्या निशम्यतां ॥ १९ ॥

श्रीवसंतपुरं नाम । पुरमासीन्महत्तमं ॥ कृतारिमर्दनो राजा । तत्राभूदरिमर्दनः ॥२०॥
राज्यकार्यविधौ धुर्यो—ऽभिधानाद्बुद्धिसागरः ॥ बुद्धिसागरभूतोऽभू—न्मंत्री तस्य महीपतेः
॥ २१ ॥ बभूव गुणसाराख्यो । हितो राज्ञि पुरोहितः ॥ प्रशस्तः सेवहस्तोऽभू—न्महासेना-
भिधोऽपि च ॥ २२ ॥ सप्रभायां सभायां ते । प्रभाते पुरुषोत्तमाः ॥ चत्वारस्तस्थुरागत्य । पु-
रुषार्था इवांगिनः ॥ २३ ॥ भवतां मंदिरेष्वद्य । स्वयंभूवदनेष्विव ॥ चंगा रंगकरै रंगैः । सुव-
र्णरुचिरोचिताः ॥ २४ ॥ इव वेदा अनिर्वेदा—श्चत्वारो जज्ञिरेंगजाः ॥ भृत्यास्तान् वर्धया-
मासुः । सानंदमिति वादिनः ॥२५॥ युग्मं ॥ अथ राजा हृदा हृष्टः । सचिवादीनदोऽवदत् ॥

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

समकालममी जाता । वर्धतां मम मंदिरे ॥ २६ ॥ एवमस्तु महाराज । सर्वैरित्युदिते सति ॥ पुत्रस्येव नृपोऽन्येषां । जन्मोत्सवमचीकरत् ॥ २७ ॥ राजांगणं समानीय । चतुर्णां सदृशादरात् ॥ राज्ञा पृथक्पृथग्धात्र्यः । प्रपालनकृते कृताः ॥ २८ ॥ महाराजकरस्पर्शा—च्छिशवः परमोदकाः ॥ शनैः शनैर्वृद्धिमापुः । सागरा जागरा इव ॥ २९ ॥ पाठिताः पाठशालायां । कलाभ्यासं च कारिताः ॥ शस्त्रशास्त्रैकचतुराः । क्रमाद्यौवनमाययुः ॥ ३० ॥ तेजस्विनो महावीर्याः । प्रीतिमंतः परस्परं ॥ एवमालोचयामासुः । संभूयैव सहोदराः ॥ ३१ ॥ निःसत्वा इव किं कालं । गमयामः पितुर्गृहे ॥ भ्रमामो वसुधामध्ये—ऽर्जयामः स्वभुजैः श्रियः ॥ ३२ ॥ तातेनोपार्जितं वित्तं । भुज्यते सत्ववर्जितैः ॥ सत्ववंतो भुवं भ्रांत्वा । स्वयमर्जितभोजकाः ॥ ॥ ३३ ॥ आलोक्यते जनविचित्रचरित्रश्चित्रं । विज्ञायते सुजनदुर्जनयोर्विशेषः ॥ संलभ्यते निजबलाबलयोर्विवेकः । बंभ्रम्यते सकल एव महीतले तत् ॥ ३४ ॥ एवमालोच्य चत्वारो—ऽनापृच्छ्यैव महीपतिं ॥ खड्गैककृतसाहाय्याः । प्रदोषे निर्ययुः पुरात् ॥ ३५ ॥ श्रीपतिर्नृपतेः सूनु—र्मंत्रिणश्च महामतिः ॥ मन्मथः सेठहस्तस्यां—गदाख्यश्च पुरोधसः ॥ ३६ ॥ इति

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नाम्ना प्रसिद्धास्ते । महासाहसिनः क्रमात् ॥ पितुर्देशं परित्यज्य । परदेशं समासदन् ॥३७॥ अन्यदा तेषु गच्छत्सु । चतुर्ष्वपि महाटवीं ॥ अस्तं जगामोष्णधाम । दीपवन्मार्गदीपकः ॥ ॥ ३८ ॥ मार्गामार्गमजानंतो । निर्ज्ञाना इव मानवाः ॥ विटस्येव वटस्याधो । निवासं चक्रिरे निशि ॥ ३९ ॥ घुर्घुरंति महाव्याघ्राः । फुच्चक्रुश्च फणीश्वराः ॥ चक्रुरट्टट्टहास्यानि । भूतप्रेतादयस्तदा ॥ ४० ॥ चतुर्भिर्मंत्रितं तत्र । काननेऽत्र विजीषणे ॥ ये सुप्तास्ते विगुप्ता हि । श्रेयो जागरणं ततः ॥ ४१ ॥ उक्तं च—उद्यमे नास्ति दारिद्र्यं । जपतो नास्ति पातकं ॥ मौनेन कलहो नास्ति । नास्ति जागरतो भयं ॥ ४२ ॥ चत्वारः स्मो वयं रात्रे—श्चत्वारः प्रहरा अपि ॥ एकैकं प्रहरं याव—ज्जाग्रत्वेकैक एव तत् ॥ ४३ ॥ इत्यालोच्यापरे सुप्ताः । पुरोधःसुत एककः ॥ प्रथमे प्रहरे जाग्र—न्नस्थात्खड्गसहायकः ॥ ४४ ॥ अपरेषां समस्तानां । घोरा निद्रा यदागता ॥ तदोच्चैरिति शब्दोऽभू—द्वटोपरि परिस्फुटं ॥ ४५ ॥ अनर्थवेष्टितोऽस्त्यर्थः । पन्नगैरिव चंदनं ॥ यदि त्वं कथयस्याशु । पतामि त्वत्पुरस्तदा ॥ ४६ ॥ इत्याकर्ण्यागदोऽध्याय—त्कस्येदं शब्दितं किल ॥ हुं देवतानुभावोऽयं । तेनेदं बुध्यते मया ॥ ४७ ॥ क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्चित्कांचनरत्नादि—रूपार्थोऽस्ति महानिह ॥ देवताधिष्ठितः स्पष्टं । परं सोऽनर्थवेष्टितः ॥
॥ ४८ ॥ तत्तेनार्थेन किं साध्यं । योऽस्त्यनर्थेन वेष्टितः ॥ तेन स्वर्णेन किं कार्यं । येन कर्णस्त्रु-
टेत्पुनः ॥ ४९ ॥ एवमायतिमालोच्य । मा पतेति निवार्य तां ॥ प्रथमं प्रहरं स्थित्वा । सुष्वा-
प स्वयमंगदः ॥ ५० ॥ अथ यामे द्वितीयेऽस्मिन् । महामतिरजागरीत् ॥ खड्गसाहाय्यकस्त-
स्थौ । सुप्तेष्वन्येषु त्रिष्वपि ॥ ५१ ॥ पुनर्वाणी तथैवानू—चिंतयित्वा तथैव च ॥ वारयित्वा
तथैवार्थं । स्वावधिं सोऽप्यपूरयत् ॥ ५२ ॥ अथ मन्मथमुत्थाप्य । निद्रां चक्रे महामतिः ॥ ता-
दृगेवाभवत्सर्वं । तस्मिन् जाग्रति मन्मथे ॥ ५३ ॥ चतुर्थे प्रहरे जाते । श्रीपतिं नृपतेः सुतं
॥ उत्थाप्य मन्मथो जज्ञे । निद्रामुद्रितलोचनः ॥ ५४ ॥ जाग्रन् श्रीपतिरश्रौषी—दस्त्यर्थोऽन-
र्थवेष्टितः ॥ पतामि भवतादेशः । पतेति यदि दीयते ॥ ५५ ॥ वटमूर्धन्यमुं शब्द—माकर्ण्या-
यमचिंतयेत् ॥ अर्थाः सर्वेऽप्यनर्थेन । वेष्टिता एव संत्यमी ॥ ५६ ॥ अनर्थभीरवो नार्थान् ।
परं निःसाहसा नराः ॥ संग्रामे जयलक्ष्मीव—त्प्राप्नुवंति कदाचन ॥ ५७ ॥ विदार्यानर्थसं-
दोहान् । कुंभिकुंभस्थलानिव ॥ गृह्णंति मौक्तिकान्यर्थान् । सिंहा इव ससाहसाः ॥ ५८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एवं विमृश्य सोऽवादी—त्साहसी कत्रगोत्रभूः ॥ त्नो अर्थ कांचनीभूय । ममाग्रे पत सांप्रतं ॥
॥ ५९ ॥ इत्येवमुक्तमात्रेण । सुवर्ण पुरुषो महान् ॥ कुमाराग्रेऽपतत्तूर्णं । दीपवद्दिव्यदीधितिः
॥ ६० ॥ तस्य प्रपातघातेना—परे जागरितास्त्रयः ॥ किमुदंकः किमुद्दंकः । पतितोऽथ दिवश्च्यु-
तः ॥ ६१ ॥ इति संभ्रांतनेत्रास्ते । संत्रस्तहरिणा इव ॥ सुवर्णपुरुषं साक्षाद् । दृष्ट्वा मुमुदिरे
हृदि ॥ ६२ ॥ सर्वेषां ग्रहणाकांक्षा । पृथक् पृथगजायत ॥ हृद्गुहायां लोजसिंहो—ऽनर्थमूलं
समाविशत् ॥ ६३ ॥ एनमर्थ समादाय । व्रजामो निजमंदिरं ॥ चिंतामणिमपि प्राप्या—न्यतो
भ्राम्यति कोऽपि किं ॥ ६४ ॥ बांधवान्यधिकैर्मित्रै—र्मंत्रयित्वा परस्परं ॥ चैलेऽनुस्वगृहं श्रोत
—स्विनीनीरैरिवांबुधिं ॥ ६५ ॥ प्रलंबदेहं गुरुज्ञारगेहं । नैकस्तमुत्पाटयितुं पटीयान् ॥ उत्पा-
टितस्तैः सकलैर्मिलित्वा । किंचिल्लघूभूत इवार्थलोजात् ॥६६॥ बुभुक्षा कुक्षिमध्येता—नदशद्-
वृश्चिकोपमा ॥ ततो व्याकुलीता जाता । न लजंते धृतिं क्वचित् ॥ ६७ ॥ महापुरपुराभ्यर्णे
तं सुवर्णमयं नरं ॥ न्यवीविशन्नमी नावं । तीरे नीरनिधेरिव ॥ ६८ ॥ एकः पुरोधसः सूनु—
र्द्वितीयः सचिवात्मजः ॥ जोजनानयनायैतौ । नियुक्तौ नगरांतरे ॥ ६९ ॥ मंत्रितं गच्छता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मंत्रि–पुत्रेणेति दुरात्मना ॥ श्रीपतिर्नृपतेः सूनुः । सर्वेष्वस्मासु साहसी ॥ ७० ॥ तेनैव निज-धैर्येण । सुवर्णपुरुषोऽर्जितः ॥ तस्मादस्माभिरेतस्य । विनाशो लभ्यते कुतः ॥ ७१ ॥ यः शूरः स हि सर्वस्वं । गृह्णाति हठतोऽपि च ॥ बृहद्भानोरहः काले । भानुर्भानून् हरेन्न किं ॥७२॥ तदेषोऽपि महाशूरः । सर्वस्वमपि लास्यति ॥ अस्ति मैत्र्यधुना तेन । परं सा न स्थिराभवत् ॥७३॥ अस्मिन् जीवति नास्माभि–र्लप्स्यते हेममानवः ॥ सति सिंहे शृगालः किं । भक्ष्यं भक्षयितुं क्षमः ॥७४॥ तस्य व्यापादनं बुद्ध्या । कुर्वेऽहं मन्मथस्य च ॥ यतो देहबलाद्बुद्धि–बलं कोटिगुणं स्मृतं ॥ ७५ ॥ इति चिंतातुरं प्रेक्ष्य । पुरोहितसुतोऽवदत् ॥ का चिंता भवतो जाता । ममाग्रे वद बांधव ॥ ७६ ॥ कथंचित्कथयामास । स्वाभिप्रायं स दुर्मतिः ॥ अंगदोऽप्याह हे मित्र । मंत्रितं साधु साध्विदं ॥ ७७ ॥ किं नाम क्रियते मित्रै—रेका श्रीरेव युज्यते ॥ यस्याः प्रभावतो विश्वं । मित्रमेवाखिलं भवेत् ॥७८॥ दारिद्र्यभाजः श्रुतभाषिणोऽपि । क्षणादमित्रत्वमुपैति मित्रं ॥ लक्ष्मीवतो दुर्वचसोऽपि चित्रं । भजंत्यमित्रा अपि मित्रभावं ॥ ७९ ॥ श्रियाश्रितत्वेन जनार्दनोऽपि च । प्रगीयते यत्पुरुषोत्तमो जनैः ॥ विभूतिदेहो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जनशंकरोऽप्यहो । इहांगिभिः स्थाणुरिति प्रकथ्यते ॥ ८० ॥ अविद्यमानानपि मूलतो गु-
णान् । वदंति लोका धनिनः प्रियंवदाः ॥ श्रितः श्रिया सत्पुरुषेषु गण्यते । त्यक्तस्तया कापु-
रुषोऽवगण्यते ॥ ८१ ॥ अमूलमंत्रं गतयंत्रतंत्रं । लक्ष्मीरियं कार्मणमद्वितीयं ॥ यस्याः प्रभा-
वेण जनाः समस्ता । अवश्यमेवाशु वशीभवंति ॥ ८२ ॥ आजन्मतो बांधवतुल्ययोरपि । पं-
चत्वमापादयितुं तयोर्द्वयोः ॥ किंचित्प्रपंचं रचयाशु घातकं । लक्ष्मीकृते किं क्रियते न पात-
कं ॥ ८३ ॥ अंगदेनैवमुदिते । मुदितोऽभून्महामतिः ॥ पापाः पापोपदेशेन । दुष्यंति क्षिति-
मंडले ॥ ८४ ॥ भद्रावत्केवलं नाम्ना । स महामतिरल्पधीः ॥ भोज्येन सह कूटात्मा । का-
लकूटं गृहीतवान् ॥ ८५ ॥ एकस्य सदने गत्वा । कारयित्वा च भोजनं ॥ भुक्तवंतावुभौ त-
त्र । पुरोधःसचिवात्मजौ ॥ ८६ ॥ पाचयित्वान्यमाहारं । विषं प्रक्षिप्य तत्र च ॥ आदाय च
लमाहारं । निर्गतौ नगरात्ततः ॥ ८७ ॥ अत्रांतरे बहिःस्थेन । चिंतितं नृपसूनुना ॥ सुवर्ण-
पुरुषो धैर्या—न्मयैवायमुपार्जितः ॥ ८८ ॥ अधुना धनिका जाता । इंहो सर्वेऽपि पार्श्वगाः ॥
दारिद्र्यांबुधिमग्नो हि । किं जल्पामि करोमि किं ॥ ८९ ॥ आः ज्ञातमधुनैवैनं । कृत्वा सा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ह्याय्यकं स्वकं ॥ बलाद्व्यापादनं कुर्यां । पुरांतर्गतयोस्तयोः ॥ ९० ॥ एनं विनाशयिष्यामि । पश्चाद्ध्वनि कुत्रचित् ॥ एकाकिनार्जिता लक्ष्मी-र्मयैकेनैव भोक्ष्यते ॥ ९१ ॥ विचिंत्येति स मायावी । मन्मथं प्राह सांजसं ॥ हे मित्र मनसो वार्तां । वदामि यदि मन्यसे ॥ ९२ ॥ अगोचरं न ते किंचि—त्करवाणि कदाप्यहं ॥ तवैव मेऽस्ति विश्वासो । जीवितादपि वल्ल-भ ॥ ९३ ॥ सुवर्णपुरुषस्यास्य । विभागे विहिते सति ॥ शृणु मित्र चतुर्थांश-स्तव भागे स-मेष्यति ॥ ९४ ॥ आवां व्यापादयावश्चे—न्नगरांतर्गतावुभौ ॥ एकीभूय मुदावाभ्यां । भोक्ष्य-ते विभवस्ततः ॥ ९५ ॥ जल्पतमिति भूपाल—नंदनं मन्मथो जगौ ॥ यन्मित्र रुचितं तु-भ्यं । तदेव मम संमतं ॥ ९६ ॥ अत्रांतरे समायातौ । पुरोधः सचिवात्मजौ ॥ विषयुक्तान्न-संपूर्णां । दधानौ स्थालिकां करे ॥ ९७ ॥ भोः पश्यंत्वनयोर्लौल्यं । मित्ररूपेण वैरिणोः ॥ स्व-यं भुक्त्वा समायातौ । पश्चिमे प्रहरेऽधुना ॥ ९८ ॥ एवं कपटकोपेना-क्रोश्यंतावरुणेक्षणौ ॥ उत्थितौ खड्गमाकृष्य । नृपनंदनमन्मथौ ॥ ९९ ॥ युग्मं ॥ भूभागे इव दीप्यमानदिनकृद्दीपो सुदीप्रत्विषा । पक्षौ श्रोणिभृतामिवामरपती तीक्ष्णेन दंभोलिना ॥ राजस्यादकृपौ कृपाणल-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तथा दात्रेण कालिंगव—च्छीर्षे मंत्रिपुरोधसोस्तनययोस्तौ छेदयामासतुः ॥ ९०० ॥ विषसंपृक्त-
मन्नं त—न्मन्मथः श्रीपतिस्तथा ॥ बुभुक्षितावभुक्तातां । जग्मतुर्यमसद्मनि ॥ १ ॥ एवंप्रका-
रतो हत्वा । चतुरश्चतुरानपि ॥ सोऽर्थोऽनर्थममुं कृत्वो—ड्डीय स्थानं निजं ययौ ॥ २ ॥ त-
स्मात्सर्वोऽप्ययं राज—न्नर्थोऽनर्थैककारणं ॥ पंडितास्तं परित्यज्य । प्रव्रज्याराज्यमाश्रिताः ॥ ३ ॥
निपीयेति गुरोर्वाचं । वैराग्यापन्नमानसः ॥ राजा प्रव्रजितुमना । गुरुमापृच्छ्य भक्तितः ॥ ४ ॥
आगत्य नगरीं चंपां । निजे राज्ये बलादपि ॥ अनिच्छंतं सुतं स्वीयं । करकंडुमतिष्ठपत् ॥ ५ ॥
नानाविधे धवलमंगलगीतगाने । चंपाचतुःपथपथादिषु जायमाने ॥ दीक्षामनेकविधनागरि-
कादिलोकैः । साकं नृपो भगवतां सविधौ प्रपेदे ॥ ६ ॥ प्रणम्य तातं व्रतमाश्रितं यतिं । स-
दश्रुनेत्रः करकंडुभूपतिः ॥ आगत्य राज्यं निजकं च पैतृकं । प्रपालयामास पितुः पथानुगः
॥ ७ ॥ स प्रतापी यशस्वी च । प्रकृत्या गोकुलप्रियः ॥ अन्यदा गोकुलं प्राप । गवां दर्शन-
हेतवे ॥ ८ ॥ कोमलोज्ज्वलसुस्निग्ध—रोमराजिविराजितं ॥ सौम्याकारं सोमरूपं । स्फुरत्कां-
तिकरंबितं ॥ ९ ॥ कन्यकास्तनवद्वृत्तो—च्चशृंगविभूषितं ॥ घटितं ब्रह्मणेनेव । मंडितं शु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवकर्णैः ॥ १० ॥ एकं गोवत्समालोक्य । लोकलोचनहर्षतः ॥ गोपालानाह भूपाल–श्चुंब-न्नुत्पाट्य तन्मुखं ॥ ११ ॥ त्रिभिर्विशेषकं ॥ भो गोपाला न दोग्धव्या । मातास्य सुभगाकृ-तेः ॥ यथारुच्येष पातव्यो–ऽन्यासामपि गवां पयः ॥ १२ ॥ राजादेशममुं प्राप्य । राजपुत्र-मिवादरात् ॥ गोपालाः पालयामासु—स्तं वत्सं वत्सलाशयाः ॥ १३ ॥ गर्जन्नन्यान् बलीब-र्दा—श्चंडान् षंडांश्च मर्दयन् ॥ ककुद्मान् पिङ्गलच्छायः । स्थूलकायो निरामयः ॥ १४ ॥ सु-तीक्ष्णशृङ्गः शुभ्रांगो । गोष्ठांगणविभूषणं ॥ स एव वृषभीभूतो । राज्ञान्येद्युर्विलोकितः ॥१५॥ युग्मं ॥ जातो मनसि संतोषः । प्रोक्तं तेषां पुरः पुनः ॥ भो गोपाः साधु साध्वेष । भवद्भिः प्रतिपालितः ॥ १६ ॥ इति स्तुत्वा नृपो दत्त्वा । दानं तेभ्यः प्रमोदभाक् ॥ आनयन्नगरांत-स्तं । वृषभं पुलवत्स्पृशन् ॥ १७ ॥ स्वकीयेनैव हस्तेन । सौवर्णं शृंखलं गले ॥ अबध्नाद् घुर्घु-रांश्चापि । सौवर्णांश्चरणादिषु ॥ १८ ॥ लोकान् सर्वान् समाहूय । भूपतिः प्राह भो जनाः ॥ सर्वत्रास्खलितः सन्मे । षंडोऽयं विचरिष्यति ॥ १९ ॥ वर्जयिष्यति योंऽगुल्या–प्येतं स्वेच्छा-विहारिणं ॥ निग्राह्यः स मया नूनं । सान्योऽपि क्रूरचौरवत् ॥ २० ॥ चतुरशीतिचतुःपथसं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ढितां । गुरुघृतादिकवस्तुपरंपरां ॥ अथ सुखादपि संचरतीछया । प्रकुरुते न हि कोऽपि निवारणां ॥ २१ ॥

कियत्यपि गते काले । स एव वृषन्नोऽन्नवत् ॥ जराजर्जरितततनू । रोगोरगनिपीडितः ॥ ॥ २२ ॥ अपश्यन्नगराधीश—स्तं संरुं नगरांतरे ॥ व्याकुलो गोकुलं गत्वा—पश्यदेकं जरहवं ॥ २३ ॥ नूपो गोपानुवाचैवं । कुत्र मे पुत्रसन्निन्नः ॥ इन्नवत्क्रीडति स्वैरं । सांप्रतं वृषन्नोत्तमः ॥२४॥ तैरवाचि महाराज । जराजर्जरितोऽधुना ॥ स एवैतादृशीं ताव—दवस्थां प्राप डुःस्थितः ॥ २५ ॥ युद्धंगणस्स मज्के । ढिक्कियसद्देण जस्स नठंति ॥ दित्तावि दरियवसहा । सुतिरकसिंगा समत्थावि ॥ २६ ॥ पोराणियगयदप्पो । गलंतनयणो चलंतदिसमुक्हो ॥ सो चेव इमो वसहो । पडुइ परिघट्टणं सहइ ॥ २७ ॥ गलितोरुककुद्देशं । स्फूटीनूतास्थिपंजरं ॥ गलद्वालाकरालास्यं । वायसैर्व्याकुलीकृतं ॥ २८ ॥ अनेकव्रणविन्राम्य—न्मक्षिकाकुलसंकुलं ॥ जरद्ववं तमालोक्य । राजा वैराग्यमासदत् ॥ २९ ॥ युग्मं ॥ विषादापन्नचित्तेन । नूपेन प्रन्नावितं ॥ असारः खलु संसारः । खलप्रीतिवदस्थिरः ॥ ३० ॥ विद्युल्लतेव जीवायु—यौवनं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जलबिंदुवत् ॥ आतपाक्रांतासिंहस्य । लोलावच्चपलं बलं ॥ ३१ ॥ एवं वैराग्यमापन्नं । स्वयं लोचं विधाय च ॥ प्रत्येकबुद्धः संजातः । करकंडुनरेश्वरः ॥ ३२ ॥ संजातजातिस्मरणः । स्मृतपूर्वभवो भवात् ॥ विरक्तो मोहनिर्मुक्तः । स्वयं दीक्षां गृहीतवान् ॥ ३३ ॥ देवतादत्तलिंगेन । निःसंगेन महात्मना ॥ विजहे पृथिवीपीठे । राजर्षिकरकंडुना ॥ ३४ ॥ सयं सुजायं सुविभत्तसिंगं । दठूण गावं खलु गुठमज्झे ॥ रिद्धिं अरिद्धिं समुपेहियाणं । कलिंगरायाविसमिक्ख धम्मं ॥ ३५ ॥ इति श्रीप्रत्येकबुद्धचरित्रे करकंडुवर्णनो नाम प्रथमः प्रस्तावः समाप्तः.

॥ अथ द्वितीयः प्रस्तावः प्रारभ्यते ॥

अथाद्वितीयस्य गुणैर्द्वितीय–प्रत्येकबुद्धद्विमुखोत्तमर्षेः ॥ वक्ष्ये चरित्रं सुतरां पवित्र–मेनोलताया लवने लवित्रं ॥१॥ समस्तरत्नादिखनिप्रधानः । समस्ति सुग्रामविराजमानः ॥ धान्यैर्धनैर्भूषितभूप्रदेशः । पंचालदेशः शुभसन्निवेशः ॥ २ ॥ अधिष्ठितं यन्न पुरंदरेण । न दानवारिप्रजया समेतं ॥ अप्यूर्ध्वलोकं यदधश्चकार । तत्तत्र कांपिल्यपुरं बभूव ॥ ३ ॥ जयाभि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धस्तत्र बभूव भूपः । शुभ्रप्रभो यस्य यशोमरालः ॥ रिपुप्रियासांजननेत्रवारि–सरस्सु नित्यं कृतखेलनोऽपि ॥ ४ ॥ गुणमालाभिधानास्य । भूपतेः पट्टपत्न्यभूत् ॥ गुणमालां दधानापि । या नात्माश्रयदोषभाक् ॥ ५ ॥ एको दूतोऽन्यदा नाना–देशमालोक्य संसदि ॥ समागतो नरेंद्रेण । पृष्ट एवं कृतादरः ॥ ६ ॥ इतो दूत प्रभूतेषु । भ्रांतोऽसि नृपसद्मसु ॥ आश्चर्यकारि किं किंचि–त्तत्र दृष्टं त्वया नवा ॥ ७ ॥ तेनोक्तं चित्रकारिण्यो । विचित्रचित्रचित्रिताः ॥ चित्रशाला मया राजन् । दृष्टा अन्यमहीभुजां ॥ ८ ॥ ताभिर्विना न ते धामा–भिराममपि भासते ॥ शोभनांजनरेखाभि–र्मृगाक्ष्या इव लोचनं ॥ ए ॥ इत्याकर्ण्य नृपो नाना–जनानाहूय तत्क्षणं ॥ चित्रशालानिवेशाय । भूमिशुद्धिमकारयत् ॥ १० ॥ अथ क्ष्मां खनतां तेषां । ज्योतिर्ज्योतितदिक्तटः ॥ मुकुटः प्रकटो जज्ञे । रत्नराजिविराजितः ॥ ११ ॥ तैः समादाय साश्चर्यैः । स भूपाय समर्पितः ॥ सोऽप्युत्सवैर्नवैर्दिव्यं । भव्यरीत्या तमर्चयत् ॥ १२ ॥ शिरस्यारोपयामास । तत्प्रभावादसौ नृपः ॥ द्विमुखो दृश्यते तत्र । मुख्यस्य प्रतिबिंबितं ॥ १३ ॥ ततो द्विमुख इत्याख्या । ख्याताभूज्जयभूभुजः ॥ प्रतापश्चांकुशानोऽभू–द्वैरिगंभीरवेदिषु ॥१४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्रान्यदा समायातो । मुनिर्ज्ञानदुमावनिः ॥ ज्ञानाकरो नरेंद्रेण । वने गत्वा नमस्कृतः ॥ ॥ १५ ॥ पृष्टश्च देशनाप्रांते । भगवन्नेष भासुरः ॥ सुराणामसुराणां वा । किरीट इति मे मतिः ॥ १६ ॥ परं देवस्य कस्यैष । विशेषाच्च कुतो भुवि ॥ प्रयातस्तत्स्वरूपं मे । निवेदय विदांस्पद ॥ १७ ॥ ततस्तपोधनः प्राह । कृतसंशयशोधनः ॥ यशोधनधराधीश । शृणूदंतममुं समं ॥ १८ ॥ तथाहि—

नगरी ताम्रलिप्तीति । विद्यतेऽत्र गरीयसी ॥ धर्माब्जिजन्याम्रलिप्तस्तत्र । ताम्रलिः श्रेष्ठिराभ्भूत् ॥ १९ ॥ सलौकिकेन वैराग्य—रंगेणादाय तापसं ॥ व्रतं तस्थौ पुरोपांते । तप्यमानस्तपोधनं ॥ २० ॥ पुरुषाहारमानं स । भैक्ष्यमादाय पत्तनात् ॥ गत्वा तपोवने भागां—श्चतुरः कुरुते सदा ॥ २१ ॥ तत्रैकं जलचारिभ्यः । स्थलचारिषु चापरं ॥ तृतीयं व्योमचारिभ्यो । दत्ते भागं स तापसः ॥ २२ ॥ एकविंशतिवारं स्वं । भागं प्रक्षाल्य वारिणा ॥ षष्टिवर्षसहस्राणि । स भुंजानस्तपोऽकरोत् ॥ २३ ॥ कुशास्त्रस्तत्सुतोऽसौ । प्रांते जीवदयापरान् ॥ ईर्यासमितिसंयुक्तान् । ददर्श मुनिपुंगवान् ॥ २४ ॥ धन्या एते तपस्तथ्यं । सर्वजीवदयापरं ॥ एषा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेव मया हाहा । मौढ्यान्नाचीर्णमीदृशं ॥ २५ ॥ इत्येवं चिंतयन्नेवं । संपूर्णायुर्विपद्य सः ॥
उत्पेदे प्रतिपातालं । चमरेंद्रोऽसुरेश्वरः ॥ २६ ॥ रत्नसिंहासनासीनो । मंत्रिवृंदपरिवृतः ॥
नानानागांगनावीज्य-मानचामरकंबरः ॥ २७ ॥ ऊर्ध्वधृतछत्ररोचिष्णुः । सुदीप्तांगस्तपोबलात् ॥
स प्रयुक्तावधिज्ञान । ऊर्ध्वलोकमलोकत ॥ २८ ॥ पश्यन्नूर्ध्वं देवलोके । सुधर्मासंसदि स्थि-
तं ॥ सुरेंद्रं स्वशिरोन्यस्त-पादं ज्ञानेन दृष्टवान् ॥ २९ ॥ रोषवांश्चिंतयामास । क एष मम
मस्तके ॥ न्यस्तपादः स्वस्थचित्तो । मुमूर्षुर्मूर्खधीः स्थितः ॥ ३० ॥ तदितः सांप्रतं गत्वा । द-
र्शयित्वा स्वविक्रमं ॥ दूरीकरोम्यमुं तस्मात् । पातयाम्यथवासनात् ॥ ३१ ॥ स सन्नाध्यक्ष-
माचख्यौ । स्वाज्ञिप्रायं रुषातुरः ॥ अथासुराः सन्नामुख्या । मतिमंतो बन्नाषिरे ॥ ३२ ॥ दे-
वेंद्र कालतोऽनंता । स्थितिरेषास्ति शाश्वती ॥ सौधर्मेंद्रपदौ स्यातां । चमरेंद्रशिरःस्थितौ ॥
॥ ३३ ॥ चमरेंद्रः पुनः प्राह । चमरेंद्राः पुरातनाः ॥ सर्वेऽपि निर्बला जाताः । सोढवंतो य-
दीदृशं ॥ ३४ ॥ परं पराक्रमधरं । क्रमेणाक्रम्य मामयं ॥ कीदृशं लन्नते देवा-स्तल्लोकध्वं कु-
तूहलं ॥ ३५ ॥ द्वात्रिंशल्लक्षसंख्यानां । विमानानामधीश्वरैः ॥ लक्षैश्चतुरशीत्या च । देहर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत्येक चरित्रं ९४

क्षापरायणैः ॥ ३६ ॥ चतुर्भिरधिकाशीत्या । सहस्रैरिंद्रसंनिभैः ॥ सुरैः सप्तमहानीकैः । शतानि नाकिनायकैः ॥ ३७ ॥ अहर्निशं सेव्यमानं । द्वारबद्धात्रमुप्रियं ॥ श्रितमुच्चैःश्रवोश्वेनाखंडिताङ्गं त्रिविष्टपे ॥ ३८ ॥ भूतलाखिलपाताल–विमर्दक्रमविक्रमं ॥ सौधर्मेंद्रं सुखार्थीकः । शुद्धबुद्धिर्विरोधयेत् ॥ ३९ ॥ चतुर्भिः कलापकं ॥ यस्योपरि स रुष्टः सन् । वज्रं मुंचति दारुणं ॥ स देवो दानवो वापि । षण्मासानाक्रंदकृद्भवेत् ॥ ४० ॥ इत्येवं तेषु जल्पत्सु । ज्ञातव्यं सांप्रतं बलं ॥ चमरेंद्रो वदन्नेवं । वार्यमाणोऽपि निर्ययौ ॥ ४१ ॥ क्षणान्निर्गत्य पातालाद्भूतलाच्चोपरि व्रजन् ॥ सभां क्षोभयितुं दैवि । रूपं चक्रे महत्तरं ॥ ४२ ॥ स्वाभाविका अलंकारा—श्चमरेंद्रस्य देहतः ॥ निपेतुः सकलाभूमौ । केयूरमुकुटादयः ॥ ४३ ॥ लक्षयोजनमानं स । श्यामं क्रूरतराकृतिः ॥ रूपं विकृत्य सौधर्म—सभायां समुपस्थितः ॥ ४४ ॥ तिलोत्तमादिपात्रेषु । नृत्यं कुर्वत्सु लीलया ॥ हूहूतुंबरुमुख्येषु । गायत्सु मधुरस्वरं ॥ ४५ ॥ दिव्येषु वाद्यमानेषु । वादित्रेषु सुरेषु च ॥ चित्रालिखितवृत्त्यैव । कुतूहलविलोकिषु ॥ ४६ ॥ अकस्मादेत्य दैत्योऽसौ । साक्षादंजनपुंजवत् ॥ श्रीसुधर्मासभास्तंभं । ताडयामास पाणिना ॥ ४७ ॥

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

त्रिर्निर्विशेषकं ॥ तत्ताहृश्याभिघातेन । रूपेण क्षोभकारिणा ॥ किमेतदिति सातंका । कांदिशीका सभाभवत् ॥ ४७ ॥ ब्रह्मांडस्फोट एषोऽभू–त्किंचोत्पाद्य जनाचलः ॥ अत्र केनापि निःक्षिप्त । इत्याशंकापराः सुराः ॥ ४९ ॥ प्रपलाय ततः स्थाना–च्चेलुः सद्भ्रांतचेतसः ॥ देव नो रक्ष रक्षेत्या–स्येक एवारवोऽजनि ॥ ५० ॥ जनिताखिलवैत्रासं । दुरालोकं दुरासदं ॥ तं वीक्ष्यावधिनाद्राक्षी–त्कोऽयमस्तीति देवराट् ॥ ५१ ॥ ज्ञातव्यतिकरः स्फार–मत्सरः सोऽमरेश्वरः ॥ प्राह रे चमरेंद्रोऽसौ । मां पातयितुमागतः ॥ ५२ ॥ क्षणमात्रमथ स्थेयं । वदन्नेवं स्वपाणिना ॥ ज्वालामालाकरालं स्वं । दंभोल्यस्त्रं मुमोच सः ॥ ५३ ॥ श्रुतप्रभावं मंत्रिभ्यो । दृष्ट्वा तत्ताहृशाकृति ॥ आपतद्वज्रमालोक्या–नश्यद्भीतोऽसुरेश्वरः ॥ ५४ ॥ महता तेन रूपेण । पलायितुमनीश्वरः ॥ अल्पमल्पं वपुश्चक्रे । तावद्यावदभूदलिः ॥ ५५ ॥ स नश्यन् भूतलं प्राप्तः । पश्यन् पृष्टे बिभीषणं ॥ वज्रं स कांदिशीकः सन् । शरण्यं समलोकत ॥ ५६ ॥ वीरं पर्वतवद्धीरं । कायोत्सर्गस्थितं प्रभुं ॥ विधाय शरणं कूर्मा–कारः पादतलेऽविशत् ॥५७॥ तत्पृष्टमत्यजद्वज्रं । तत्रायातं जिनेशितुः ॥ प्रभावाच्च निहंतुं त–मक्षमं परितोऽभ्रमत् ॥५८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथैंद्रोऽप्यपरावृत्तं । चिराद् ज्ञात्वा स्वमायुधं ॥ प्रयुक्तावधिविज्ञानो । ज्ञातव्यतिकरोऽजनि ॥ ५९ ॥ हाहा साधार्मिकावज्ञां । कुर्वेदेतत्स्वमाबुधे ॥ संवृत्य क्षमयामीति । चिंतयामास वासवः ॥ ६० ॥ ततः सत्वरमुत्थाय । प्रस्थाय जिनसंनिधौ ॥ गत्वा नत्वा प्रभुं भक्त्या । वज्रं प्रत्याददे हरिः ॥ ६१ ॥ ऊचे च चमरेंद्रेतो । बहिरागच्छ निर्भयः ॥ साधार्मिकोऽसि संजातः । श्रीवीरश्रयणाश्रयात् ॥ ६२ ॥ श्रुत्वेति चमराधीशो । निहत्य जिनपांहितः ॥ कृतस्वाभाविकाकारः । श्रीवीरं भक्तितोऽनमत् ॥ ६३ ॥ महता स्पर्धमानं तं । ज्ञात्वा स्वामिनमाकुलः ॥ चमरेंद्रपरीवारो । अमंस्तत्रागमत्तदा ॥ ६४ ॥ उल्लसन्महतीभक्ति–र्यथाशक्ति जिनेशितुः ॥ पुरस्तादकरोन्नाट्यं । साकं परिकरेण सः ॥ ६५ ॥ अथासुरांगना नाना–नृत्यांते मधुरस्वरं ॥ श्रीमद्वीरजिनेंद्रस्य । गुणान् गायितुमुद्यताः ॥ ६६ ॥ जय हेमसमानशरीर वीर । जय मेरुमहीधरसारधीर ॥ जय पातकरेणुमहासमीर । जय दुःखदवानलमेघनीर ॥ ६७ ॥ जय जंतुशरण्य वरेण्यपुण्य । जय मानवदानवदेवकार्य ॥ जय गांगतरंगयशोऽभिराम । जय कामविभंजनधारधाम ॥ ६८ ॥ जय मेरुमहागिरिकंपनेश । जय पादपवित्रितभूप्रदेश ॥ जय निर्जय-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जर्जरन्नावकार । जय खंम्भितपंम्भितमानन्नार। ॥६९॥ जय सोढविमूढ दृढोपसर्ग । जय सेवकवर्ग-कृतापवर्ग ॥ जय गौरगुणावलिवर्धमान जय देवजयापरवर्धमान ॥७०॥ इत्यादिस्तुतिन्निः स्तुत्वा । भावयित्वा च न्नावनां ॥ विरतास्वसुरस्त्रीषु । श्रीवीरं तौ प्रणेमतुः ॥७१॥ अन्योन्यजातसौहार्दौ । परिवारसमन्वितौ ॥ सौधर्मेंद्रचमरेंद्रौ । स्वं स्वं सद्म समापतुः ॥ ७२ ॥ अथ ये चमरेंद्रस्य । गछतस्त्रिदिवंप्रति ॥ न्रष्टा आसन्नलंकाराः । किरीटस्तेष्विहापतत् ॥ ७३ ॥ विदूरतरपातालं। जगामेति न्नुवोंतरे ॥ सप्रन्नावोऽयमिति नो । विना न्नाग्यं स्फुटोऽन्नवत् ॥ ७४ ॥ सांप्रतं तव राजेंद्र । न्नाग्यादाविरन्नूदयं ॥ अथैतस्य प्रन्नावेण । त्वमजेय्योऽसि न्नून्नुजां ॥ ७५ ॥ श्रुत्वेति द्विमुखो राजा । प्रणम्य मुनिपुंगवं ॥ आजगाम निजं धाम । प्रमोदन्नरमेदुरः ॥ ७६ ॥ कालेन चित्रशालां स । चित्रकारकपूरुषैः ॥ समाप्य शोन्नने घस्रे । प्राविशत्तत्र न्नूपतिः ॥ ॥ ७७ ॥ अथान्यदा महाराज्ञीं । गुणमालां विषादिनीं ॥ विछायवदनां दृष्ट्वा । किमीदृगिति पृष्टवान् ॥ ७८ ॥ सा प्राह प्रिय ते राज्य–प्रसादादस्ति मे सुखं ॥ सुता अप्यद्न्नुताः सप्त । सप्तसप्तिसमौजसः ॥ ७९ ॥ परमेकापि नो पुत्री । पवित्रीकरणक्षमा ॥ विवाहाद्युत्सवारंन्ने ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीमाता निजवेश्मनः ॥ ८० ॥ विहस्याथ नृपः प्राह । परगेहविभूषया ॥ पुत्र्या स्वगेहशोषिण्या । प्रिये किं नाम साध्यते ॥ ८१ ॥ जायते सह दैन्येन । वर्धते वरचिंतया ॥ भवेत्कुलकलंकाय । याल्पदोषेण दूषिता ॥ ८२ ॥ गुणमालाह नैकांता—त्सुता कुलकलंककृत् ॥ सरस्वतीव कापि स्या—त्कुलोन्नतिविधायिनी ॥ ८३ ॥ तथाहि—

श्रीवर्धनपुरे राजा । जयवर्धन इत्यभूत् ॥ बुद्धिवर्धननामा च । मंत्री तस्य प्रशस्यधीः ॥ ॥ ८४ ॥ जायाजायत सद्बुद्धि—र्मंत्रिणो बुद्धिसुंदरी ॥ तत्कुक्षिकमलोद्भूता । पुत्रिका भूत्सरस्वती ॥ ८५ ॥ समस्ताभ्यस्तविद्यां तां । सुतामुद्भिन्नयौवनां ॥ विवाहयितुमारेभे । पितात्यंतं महोत्सवं ॥ ८६ ॥ समस्तनगरोद्दच्छ—तोरणै रत्नभूषिभिः ॥ पुरीं रत्नमयीं कृत्वा । परमाडंबरं व्यधात् ॥ ८७ ॥ आकार्य सकलं लोक—मेकेन श्रेष्ठिसूनुना ॥ सुतां व्यवाहयत्स्वीयां । ददद्दानमुदारधीः ॥ ८८ ॥ अथो भोजयितुं भूपं । मंत्र्यामंत्रयितुं ययौ ॥ तावदूचे सुता तात । नाकार्योऽत्र नृपस्त्वया ॥ ८९ ॥ राज्ञामाडंबरं दृष्ट्वा । चक्षुश्चलति लाभतः ॥ विसृज्याडंबरं सर्वं । भोज्य आकार्य भूपतिः ॥ ९० ॥ स तथापि महत्त्वेच्छु—स्तदैवाकारयन्नृपं ॥ सोऽपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्तादृशं दृष्ट्वा । विमानसदृशं गृहं ॥ ९१ ॥ सर्वस्वमप्यदो मंत्री । दत्ते भुंक्ते ममैव हि ॥ ए-
वं च जितचित्तोऽपि । किंचिद्भुक्त्वा गृहं ययौ ॥ ९२ ॥ वैवाहिकविधिं सर्वां । स समाप्य
सभां ययौ ॥ छले पातयितुं राजा । दंडनार्थीत्यभाषत ॥ ९३ ॥ कः कृतज्ञः कृतघ्नः कः ।
को मूढः को विचक्षणः ॥ मंत्रिन्नेतत्स्फुटं ब्रूहि । निग्राह्योऽस्यन्यथा पुनः ॥ ९४ ॥ विचार्य
कथयिष्यामि । स्वामिन्निति निवेद्य सः ॥ प्राप सद्मो विना स्फूर्त्या । मनसोऽर्त्या निपीडितः
॥ ९५ ॥ भोजनावसरेऽतीते–ऽप्यनुत्तिष्ठति चिंतया ॥ ताते सरस्वती पुत्री । समागत्येत्यभा-
षत ॥ ९६ ॥ तात जातमहं मन्ये । छलं त्वयि नरेशितुः ॥ यतश्चिन्तातुराकारं । वदनं तव
वीक्ष्यते ॥ ९७ ॥ मंत्रिणोक्तं ततः सर्वं । स्वरूपं तत्पुरस्तया ॥ उक्तं तात नृपाहूतिः । पूर्व-
मेव निवारिता ॥ ९८ ॥ परं भवंतु निश्चिन्ता । भवंतः प्रातरुत्तरं ॥ वचसोऽस्य प्रदास्यामि ।
सम्यक्कुर्वन्तु भोजनं ॥ ९९ ॥ अथ निश्चिन्तचित्तोऽसौ । भोजनं विधिवद्व्यधात् ॥ प्रातः
सुतां सहादाय । नरराजसभां ययौ ॥ १०० ॥ अन्नपिण्डीप्रदानेन । लोभितं श्वानमेककं ॥
सहादाय ययौ बाला–कारयद्रजकं तथा ॥ १ ॥ राज्ञा निवेदितं मंत्रिन् । पृष्टमर्थं समर्थय ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऊचे मंत्री महाराज । दास्यत्यस्य सुतोत्तरं ॥ २ ॥ एवमस्त्विति राज्ञोक्ते । भूपमाह सरस्वती ॥ देवीकर्णय दक्षोऽयं । रजको मूढधीः पुनः ॥ ३ ॥ ममायं जनकः सोऽयं । कृतज्ञः कुर्कुरः पुनः ॥ कृतघ्नश्च महाराज । इत्युक्ते स चमत्कृतः ॥ ४ ॥ युग्मं ॥ ऊचे कथमिदं वत्से । प्राह सा शृणु भूपते ॥ रजकोऽयमनेकेषा–मादत्ते वसनावलीः ॥ ५ ॥ पुनः प्रक्षाल्य सर्वेभ्यः । स्वं स्वं दत्ते किलांशुकं ॥ अतोऽयं रजको दक्षो । मूढधीर्मत्पिता पुनः ॥ ६ ॥ वस्तून्यादाय लोकेभ्यो । याचित्वा निजमंदिरे ॥ परमाडंबरं चक्रे । सुतुबद्धविणोऽपि यः ॥ ७ ॥ अल्पपिएडीप्रदानेनं । मन्यमानो महत्तरं ॥ उपकारं समभ्येति । कृतज्ञस्तेन कुर्कुरः ॥ ८ ॥ राज्यकार्यविधौ सज्ञा–चित्तेऽस्मिन्मम तातके ॥ कुविकल्पं मुधा कुर्वन् । कृतघ्नस्तु नराधिपः ॥ ९ ॥ सरस्वत्या इति वाक्यं । युक्तं श्रुत्वा नरेश्वरः ॥ संतुष्टो मंत्रिणं पुत्र्या । समं दानादतोषयत् ॥ १० ॥ तस्मै व्यापारजारं च । पूर्वस्मादधिकं ददौ ॥ तदेवं देव काचित्स्या–त्कुलौन्नत्यकरी सुता ॥ ११ ॥ सा च मे नास्ति कापीति । चिंता चेतसि वर्तते ॥ तत्प्रसीद प्रज्ञो पुत्र्यु–त्पत्त्युपायं समादिश ॥ १२ ॥ अथ द्विमुखराजेन । जणितं देवि तद्ध्रुवं ॥ प्रज्ञावसदनं देवं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मदनाख्यं त्वमर्चय ॥ १३ ॥ इत्थं नाथ करिष्यामि । प्रतिपद्येति सा तथा ॥ कुर्वाणा तत्प्रभावेण । गर्भवत्यचिरादभूत् ॥ १४ ॥ स्वप्नेऽपश्यदसौ सारां । पारिजातस्य मंजरीं ॥ निर्जरामिव सद्रूपां । कालेनाजनयत्सुतां ॥ १५ ॥ अतः प्रतिष्ठितं नाम । तस्या मदनमंजरी ॥ पितृभ्यामुत्सवैर्भव्यैः । पुत्रजन्मोत्सवाधिकैः ॥ १६ ॥ अथ सा पंचधात्रीभिः । पाल्यमाना प्रवर्धते ॥ नरेंद्रमंदिरे मरौ । कल्पद्रोरिव मंजरी ॥ १७ ॥ अथ द्विमुखराजस्य । सभां संदेशहारकः ॥ आगान्मालवदेशेश—चंद्रप्रद्योतभूभुजः ॥ १८ ॥ उवाच स महाराज । प्रेषितोऽहं त्वदंतिके ॥ चंद्रप्रद्योतभूपेन । तेनादिष्टं तवास्त्यदः ॥ १९ ॥ मुकुटोऽयं त्वया प्रेष्यः । शेषार्थकुशलेच्छुना ॥ मच्छीर्ष एव भात्येष । स्वर्णे रत्नमिवोत्तमं ॥ २० ॥ श्रुत्वेति द्विमुखो राजा । विहस्याह ससाहसः ॥ ददाम्येतत्तवेशाय । स चेद्दत्ते मदर्थितं ॥ २१ ॥ किमर्थयसि तद्ब्रूहि । । दूतेनेति निवेदिते ॥ राजाह तर्हि ते स्वामी । दत्तां वस्तुचतुष्टयं ॥ २२ ॥ हस्तिराजोऽनलगिरि—रग्निभूतिस्तथा रथः ॥ लोहजंघाभिधो दूतः । शिवादेवीति दीयतां ॥ २३ ॥ दूतः प्राह महाराज । चंद्रप्रद्योतभूभुजः ॥ राज्यसर्वस्वमप्येत—त्तत्कथं ते प्रयच्छति ॥ २४ ॥ उक्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्विमुखराज्ञापि । प्रज्ञावविज्ञवालयः ॥ राज्यसर्वस्वमप्येष । मुकुटः कथमर्प्यते ॥ २५ ॥ तेनो-
क्तं नृप चौराणां । राज्ञां चाधिक्यशालिनां ॥ बलिनां च निजं वस्तु । कोऽपि दत्ते किमिच्छ-
या ॥२६॥ यस्य गर्जद्गजघटा–हेमघंटातणिद्वरा ॥ विशालहस्तिशालायां । मेघमालेव लोक्यते
॥ २७ ॥ यस्यैकदिनमात्रेण । शतयोजनलंघकः ॥ साक्षादैरावणाकारो । द्वारेऽनलगिरिर्गजः
॥ २८ ॥ प्रद्योतनप्रतापेन । चंडप्रद्योतभूभुजा ॥ क्षणं कटाक्षितः कोऽपि । स्थातुं नास्ति
क्षमः क्षितौ ॥ २९ ॥ यं सानीकं शतानीकः । श्रुत्वायांतं भयातुरः ॥ रात्रौ विशूचिकां प्रा-
प्य । गतवान् यमसद्मनि ॥ ३० ॥ उत्पत्तिक्यादिबुद्धीनां । निधिः श्रेणिकसंभवः ॥ बध्ध्वा-
भयकुमारोऽपि । येनानीतः स्ववेश्मनि ॥ ३१ ॥ विहस्य द्विमुखक्ष्माप–मंत्र्यूचे मतिसागरः ॥
संति द्यूतावदातास्ते । स्वामिनः कामिनो घनाः ॥ ३२ ॥ अभ्यस्तश्राद्धधर्माभि–र्वेश्याभिर्ध-
र्मकैतवात् ॥ छलयित्वा किलानीत—स्तेनाभयकुमारराट् ॥ ३३ ॥ परं तत्र स्फुटीकृत्य । बु-
द्धिकौशलमात्मनः ॥ स्वं विमोच्य स्वयमसौ । प्रतिज्ञां तत्पुरोऽकरोत् ॥ ३४ ॥ अहं छलादी-
लाधीश । छद्मनानायितस्त्वया ॥ मध्याह्नेऽहं सफूत्कार–मुज्जयिन्याश्चतुःपथे ॥ ३५ ॥ भवंतं

श्री. कै. आ. कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यदि बध्वेतो । नये तर्हि मतिर्मम ॥ एवं निर्जयचेतस्कः । सप्रतिज्ञोऽजयो ययौ ॥ ३६ ॥
स्वतातश्रेणिकक्ष्माप–समीपे स कियच्चिरं ॥ विलंब्य परमं सार्थं । विधाय प्राचलत्पुरात् ॥३७॥
क्रमेणोज्जयिनीं प्राप । वस्तुस्तोमसमन्वितः ॥ कृतरूपपरावर्तो । दधावजयकाभिधां ॥ ३८ ॥
तत्र तिष्ठन् जनं सर्वं । तोषयन् क्रयविक्रयैः ॥ प्रासादसन्निधौ राज्ञो । निजस्थानं विनिर्ममे ॥
॥ ३९ ॥ चंद्रप्रद्योतनामानं । स्वभृत्यं ग्रहिलाकृतिं ॥ कृत्वा चतुःपथे नित्यं । पुरोद्गमकार-
यत् ॥ ४० ॥ अजांश्चि घृतजांकानि । शस्तवस्तून्यपातयत् ॥ उद्गमकरोन्नित्यं । स भृत्यो ग्र-
हिलाकृतिः ॥ ४१ ॥ श्रेष्ठिनोऽजयकाख्यस्य । दाक्षिण्येन न तं जनाः ॥ निघ्नंतिस्म किंतु गत्वो
–पालंभं श्रेष्ठिनो ददुः ॥ ४२ ॥ सोऽपि स्वयं समागत्य । बध्ध्वारोप्य निजे रथे ॥ अरेऽहं चं-
द्रप्रद्योतो । बद्धो नीयेऽधुनामुना ॥ ४३ ॥ पार्श्वस्थिनो जनाः सर्वे । रे रे धावत धावत ॥ फू-
त्कुर्वंतं तमादाय । स ययौ नगराद्बहिः ॥ ४४ ॥ इत्येतत्कुरुते नित्यं । मध्याह्नेऽजयकः सुधीः
॥ अथ पण्यांगनायुग्मं । सहानीतं शुभाकृति ॥ ४५ ॥ दर्शयित्वा निजं रूपं । चंद्रप्रद्योतभू-
पतिं ॥ विमोह्य विभ्रमैः सारैः । प्राविशन्निजवेश्मनि ॥ ४६ ॥ तयोः पार्श्वे निजां दूतीं । प्रै-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रीत्कामातुरो नृपः ॥ ऊचे सा युवयोरस्य । संगं नृपतिरीहते ॥ ४७ ॥ तदायातं नरेन्द्रस्य । मंदिरेऽस्ति रहोऽधुना ॥ ताभ्यामुक्तं कुलस्त्रीणां । युक्ता नान्यगृहे गतिः ॥ ४८ ॥ एकाकी नृप एवात्र । कल्ये मध्यंदिने किल ॥ आयातु येन नः स्वामी । तदा याति गृहाद्बहिः ॥ ॥ ४९ ॥ सुक्त्वा लोकेषु सुप्तेषु । तदा निर्व्यजनं नवेत् ॥ दूती श्रुत्वेति गत्वा च । राज्ञः सर्वं न्यवेदयत् ॥ ५० ॥ उक्तं पण्यांगनाभ्यां च । स्वरूपमनयोप्रतः ॥ समग्रां सोऽपि सामग्रीं । चक्रे तद्बंधनोचितां ॥ ५१ ॥ तत्र नृपतिरेकाकी । पटाछादितमस्तकः ॥ आगात्ताव-ज्झटिति तं । बध्ध्वा निजरथेऽक्षिपत् ॥ ५२ ॥ अनयः प्राचलद्धथो । उज्जयिन्याश्चतुःपथे ॥ ॥ अरेऽहं चंडप्रद्योतो । बद्धो नीयेऽधुनामुना ॥ ५३ ॥ इत्यादिकृतपूत्कारं । नीयते ग्रहिलो ह्ययं ॥ उपेक्षितमिति जनै-स्तमादायाभयो ययौ ॥ ५४ ॥ अथाभयकुमारेण । नीत्वा राजगृहे पुरे ॥ श्रीश्रेणिकनरेंद्राय । स प्रद्योतनृपोऽर्पितः ॥ ५५ ॥ सोऽपि प्राह महाराज । किं कर्तव्यं तवाधुना ॥ स ऊचे स्वगृहप्राप्त-स्यातिथेर्यद्विधीयते ॥ ५६ ॥ श्रुत्वेति श्रेणिकक्ष्मापः । परिणाय्य निजांगजां ॥ अमुचत्स्वपुरं प्राप्य । तस्थौ प्रद्योतराट् सुखं ॥ ५७ ॥ कियत्यपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गते काले । सुसुमारपुरेशितुः ॥ धुंधुमारनरेंद्रस्य । श्रुत्वांगारवतीं सुतां ॥ ५८ ॥ सुरूपां याचतेस्मासौ । चंडप्रद्योतभूपतिः ॥ स्त्रीलोल इति नो तस्मै । धुंधुमारनृपो ददौ ॥ ५९ ॥ प्रद्योतः कुपितस्वांतः । सैन्येन महतान्वितः ॥ प्राचलत्सोऽपि राजेंद्रः । किंचिद्व्याकुलतां ययौ ॥ ६० ॥ एको मंत्री निमित्तज्ञः । शब्दग्रहणहेतवे ॥ प्रेषितो नगरस्यांतः । स गत्वात्रासयच्छिशून् ॥ ६१ ॥ तेऽपि भीतास्ततस्त्रस्ता । गता देवकुलांतरे ॥ कृपया तत्र वार्तर्षि–र्मा बिभीतेति तानवक् ॥ ६२ ॥ तं सुंदरतरं शब्दं । मंत्र्यादाय समाययौ ॥ प्रद्योतेन समं युद्धं । धुंधुमारनृपो व्यधात् ॥ ६३ ॥ भंक्त्वाखिलं बलं तेन । बद्धः प्रद्योतभूपतिः ॥ आनीतश्च निजं वेश्म । किं विधेयं तवाधुना ॥ ६४ ॥ इत्युक्तः प्राह त्वद्देशमा–तिथेर्यद्वा विधीयते ॥ अतस्तेन प्रसन्नेन । तामंगारवतीं सुतां ॥ ६५ ॥ परिणाय्य विमुक्तोऽसौ । निजं धाम समागमत् ॥ एवं भूत तवेशस्या–वदाताः संत्यनेकशः ॥ ६६ ॥ अथोदायनराजेन । न्यस्ता शीर्षेऽक्षरावली ॥ दासीपतिरिति स्पष्टा । तस्येत्येतन्निशम्यतां ॥ ६७ ॥ अस्ति वीतभयं नाम । पुरं वीतभयं सदा ॥ तस्योदायनभूपोऽस्ति । तत्प्रियाभूत्प्रभावती ॥ ६८ ॥ विद्युन्मालिकृतां

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

सप्त–हस्तप्रमानां मनोहरां ॥ चांदनीं वीरतीर्थेश—प्रतिमां स ह्यपूजयत् ॥ ६ए ॥ प्रतिपाल्य निजमायु–र्जगाम त्रिदशालयं ॥ तद्दासी कुब्जिकानाम्नी । प्रतिमामार्चयत्ततः ॥ ७० ॥ तत्रान्यदा समायातो । विद्यासिद्धो विशुद्धधीः ॥ श्राद्धस्तां प्रतिमां भक्त्या । पूजयंस्तत्र तस्थिवान् ॥ ७१ ॥ मंदीभूतस्तया दास्या । श्राद्धः शुश्रुषितश्चिरं ॥ प्रसन्नः सोऽप्यदात्तस्यै । गुटिकां दिव्यरूपदां ॥ ७२ ॥ तस्याः प्रभावतः साभू—द्दिव्यरूपा सुरीसमा ॥ कदाचिच्चंडप्रद्योत–स्तामश्रौषीच्छुभाकृतिं ॥ ७३ ॥ स चंचलमनास्तस्या । आमंत्रणकृते निजां ॥ दूतीं प्रैषीदियं गत्वा । नृपसंदेशमभ्यधात् ॥ ७४ ॥ ऊचे सा भाग्यमेवैत–न्मम चेरस भवेत्पतिः ॥ परं नाहं समभ्येम्ये–तया प्रतिमया विना ॥ ७५ ॥ चंडप्रद्योतभूपश्चे—त्स्वयमादातुमेष्यति ॥ तदाहमागमिष्यामि । नेष्यति प्रतिमां यदि ॥ ७६ ॥ श्रुत्वेति सा ततो गत्वा । प्रद्योतस्य न्यवेदयत् ॥ प्रतिमां चांदनीं सोऽपि । कारयामास तादृशीं ॥ ७७ ॥ तामारोप्यानलगिरौ । गजेंद्रे प्राचलन्नृपः ॥ रात्रौ वीतभयंडग्रे । प्राप्तो दास्या सहामिलत् ॥ ७८ ॥ आदाय प्रतिमां जीव—त्स्वामिनस्तां पुरातनीं ॥ नव्यां तत्र तथा मुक्त्वा । समं दास्या ययौ नृपः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ७ए ॥ माल्यम्लानेरदैवीं तां । प्रतिमां ज्ञातवान् प्रगे ॥ गंधेनस्यागमं चात्म–गजानां क्षोन्नदर्शनात् ॥ ७० ॥ दास्याश्चादर्शनात्त्र्येक–लोलं प्रद्योतभूपतिं ॥ ज्ञात्वोदायनराट् क्रु-द्ध—श्चातुरंगबलोऽचलत् ॥ ७१ ॥ आगान्मालवदेशस्य । संनिधौ तावता नृपः ॥ प्रद्योतो निर्ययौ जङ्के । द्वयोर्युद्धं बिन्नीषणं ॥७२॥ कृत्वा रथन्नामिं सद्यो । न्रमयित्वा रिपोर्गजं ॥ ल-घुहस्ततयाविध्य–त्सूचीमुखशिलीमुखैः ॥ ७३ ॥ गजेऽनलगिरौ विद्ध–चरणे पतिते रणे ॥ जत्पत्योदायनो राजा । पतंतं तमुपाददे ॥ ७४ ॥ बध्ध्वारोप्य रथे स्वीये । स स्वस्थानं समा-ययौ ॥ प्रद्योतस्याथ निर्नाथं । सैन्यं नष्टं गतं क्वचित् ॥ ७६ ॥ शिलीमुखमुखेनैष । रोषात्प्र-द्योतभूपतेः ॥ शीर्षेऽक्षरावलीं न्यस्य–दासीपतिरितीदृशीं ॥ ७४ ॥ प्रविश्योज्जयिनीमध्ये । प्रतिमां लातुमुद्यते ॥ तस्मिन् सा नाचलत्स्थाना–च्चालितापि घनैर्जनैः ॥ ७५ ॥ उपोषित-स्थितमथो । नरेंद्रं निशि देवता ॥ ऊचे मा नय मां तत्र । न्नविता यदुपद्रवः ॥ ७६ ॥ अथो निःसृत्य भूपालः । प्राचलत्स्वपुरंप्रति ॥ वर्षाकालः समायातो । मार्गन्नंगैककारणं ॥ ॥ ७७ ॥ निवेश्य नगरं नव्यं । श्रीमद्दशपुरान्निधं ॥ दशन्निः सह भूपालै—रुदायननृपः स्थ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तः ॥ ८८ ॥ आगारपर्युषणापर्व । सर्वधार्मिकहर्षकृत् ॥ विधायोपोषितं राजा । पौषधव्रतमग्रहीत् ॥ ८९ ॥ सूपकारैरथो बद्धं । चंडप्रद्योतभूपतिं ॥ प्रत्यूचे भूप किं कार्यं । भवद्योग्यं नु भोजनं ॥ ९० ॥ तेनोक्तमद्य किं प्रश्न । उदायननराधिपः ॥ यद्भोक्ष्यते समं तेन । भुक्तिः कार्या मयापि हि ॥ ९१ ॥ अद्य पर्युषणापर्व । तेनोदायनभूपतिः ॥ उपवासं व्यधादेवं । तैरुक्ते स नृपो जगौ ॥ ९२ ॥ मा विषादिप्रयोगो मे । जायतेऽद्येति शंकितः ॥ अस्माकमुपवासोऽद्य । श्रावकाः किमु नो वयं ॥ ९३ ॥ सूपकारो वचस्तस्यो–दायनाय न्यवेदयत् ॥ मया साधर्मिकस्यास्य । धिगवज्ञा विनिर्ममे ॥ ९४ ॥ विचिंत्येति समाहूय । प्रद्योतं मस्तकोपरि ॥ बध्ध्वा स्वर्णमयं पट्टं । क्षमयित्वा मुमोच सः ॥ ९५ ॥ उज्जयिन्यामसौ प्राप्तो । निजं राज्यमपालयत् ॥ वर्षाकाले व्यतीतेऽथो–दायनः स्वं पुरं ययौ ॥ ९६ ॥ एवमादिप्रकारेण । स्थाने स्थाने नराधिपैः ॥ विखंडिताभिमानोऽपि । प्रद्योतो द्योतते कथं ॥ ९७ ॥ अथो दूत त्वया वार्यः । स्वस्वामी परवस्तुषु ॥ साभिलाषो वध्यमानो । वधं प्राप्स्यति कुत्रचित् ॥ ९८ ॥ बंदिभावे पुनः स्थातुं । तवेशस्यास्ति चेन्मनः ॥ तदा सद्यः समायातु । संनद्ध सह सेनया ॥ ९९ ॥ सोपहासमिति प्रो-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

के । बुद्धिसागरमंत्रिणा ॥ सुकरं वदतस्तेऽदो । दुःकरं तु भविष्यति ॥ १०० ॥ द्विमुख-
स्यास्य भूपस्य । तस्मिन्नत्र समागते ॥ एवं वदन् भर्त्सितोऽन्यै—र्जनैर्दूतः स निर्ययौ ॥
॥ १ ॥ चंडप्रद्योतभूपस्य । स आगत्य न्यवेदयत् ॥ द्विगुणीकृत्य वृत्तांतं । प्रकोपमुददीपयत्
॥२॥ अथो विजययात्रायै । प्रतस्थे नरनायकः ॥ पुर्यां प्रयाणढक्कायां । वादितायां मुहुर्मुहुः
॥ ३ ॥ वेगवंतोऽनिलसमा । गरीयांसो गिरींद्रवत् ॥ गजा अनिलगिर्याद्या । द्विलक्षाः प्रा-
चलंस्ततः ॥ ४ ॥ पुंभिर्महारथैर्युक्ता । महांतोऽथ रथोत्तमाः ॥ जाता द्विलक्षसंख्याकाः ।
प्रद्योतस्यानुगामिनः ॥ ५ ॥ पंचाशल्लक्षसंख्याका । अश्वा विश्वाधिपानुगाः ॥ अभूवन् भूरि-
तेजस्का । उच्चैरुच्चैःश्रवःसमाः ॥ ८ ॥ संग्रामाग्रेसराः साराः । खड्गखेटकपाणयः ॥ पदातयो-
ऽग्रगास्तस्य । बभूवुः सप्तकोटयः ॥ ९ ॥ एवं स चतुरंगेण । बलेन कलितोऽचलत् ॥ उद्-
भ्रांत इव पाथोधि—रचलामपि चालयन् ॥ १० ॥ अपरा अपि भूपाल—श्रेण्यः सबलवाह-
नाः ॥ प्रद्योतसैन्यमाजग्मु—र्निम्नगा इव सागरं ॥ ११ ॥ संधौ पंचालदेशस्य । भूपालेऽस्मि-
न्नुपस्थिते ॥ संनह्यासह्यतेजस्कौ । द्विमुखोऽभिमुखं ययौ ॥ १२ ॥ गर्जंति रणतूर्याणि । सै-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्ययोरुन्नयोरपि ॥ शब्दाद्वैतमिवाकार्षु-र्विश्वं तद्ध्वनिपूरितं ॥ १३ ॥ तत्सैन्ययुगमारेन्ने । न्नीरुलोकन्नयंकरं ॥ संग्रामारंन्नसंरंन्नं । धीरांगिप्रमदप्रदं ॥ १४ ॥ आस्फलत्सादिना सादी । विषादी च विषादिना ॥ रथी च रथिना साकं । पदातिश्च पदातिना ॥ १५ ॥ चीत्कारतो रथोऽलक्षि । गजो घंटारवात्तथा ॥ रजोंधकारे स्वस्वामि-कीर्तनात्स्वः परो न्नटः ॥ १६ ॥ शस्त्रन्निन्नेन्नन्नूनृद्दन्यो । व्यूढा रुधिरवाहिनी ॥ प्रौढे तस्या बन्नूः पूरे । शिरांसि नालिकेरवत् ॥ ॥ १७ ॥ चिक्लिदे रुधिरामर्दा-त्पतत्सिंधुरसंकरैः ॥ स्थलीन्नूते रथपंथा । दुर्गमो नितरामभूत् ॥ १८ ॥ अत्यंतप्रचुरत्वेन । चंन्द्रप्रद्योतसैनिकाः ॥ उत्कटानपि द्विमुख-सुन्नटांश्चक्रुराकुलान् ॥ १९ ॥ अथोत्तस्थौ स्वयं राजा । द्विमुखोऽन्निमुखागतान् ॥ अरीन् पराङ्मुखीकुर्वन् । शिलीमुखसुवर्षणैः ॥२०॥ वेगवद्रथमासीनो-ऽन्यान्यस्थानं परिन्नमन् ॥ एकोऽप्यनेकरूपोऽभूत् । स प्राणप्रतिहारणः ॥२१॥ शत्रून् संत्रासयन्नाशु । सरित्पूर इवाशुगः ॥ केनाप्यस्खलितो मार्गे । प्राप प्रद्योतसंनिधिं ॥ २२ ॥ तं राहुवद्रथारूढं । प्रौढं स्वर्गमनोद्यतं ॥ प्रद्योतन इवालोक्य । प्रद्योतः कंपमासदत् ॥२३॥ द्विमुखोऽन्निमुखे शत्रो-र्द्विगुणीन्नूतविग्रहं ॥ विग्रहं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विदधे बाण–श्रेणीर्वर्षन्नमर्षतः ॥२४॥ शरधाराधोरणीभि–र्जर्जरं तस्य कुंजरं ॥ विधाय किरणं दत्वा–रोहत्तं सोऽनलागिरिं ॥२५॥ हत्वा हस्तिपकान् सर्वान् । बध्ध्वा प्रद्योतभूपतिं ॥ क्षिप्त्वा कक्षापुटे भूयः ।करिणः सारथं ययौ ॥२६॥ भूयः संनाशयन् वैरि–नरान् परमविक्रमः ॥ सैन्यं निजं समायातः । स समं जयमंगलैः ॥२७॥ निर्नाथमथ तत्सैन्यं । प्रद्योतस्य दिशो दश ॥ महद्-प्यगमद्भग्नं । हतं सैन्यमनायकं ॥२८॥ वाद्येषु वाद्यमानेषु । गीयमानासु गीतिषु ॥ दीयमानेषु दानेषु । भवत्सु प्रोत्सवेषु च ॥ २९ ॥ श्रीकांपील्यपुरं प्राप । पौरोत्तंभिततोरणं ॥ द्विमुखस्तं सहादाय । शृण्वन् जयजयारवं ॥ ३० ॥ युग्मं ॥ तत्रासौ विदधे तस्य । प्रतिपत्तिं महत्तरां ॥ महांत उपकुर्वंति । कृत्वा मानाभिमर्दनं ॥ ३१ ॥ स्वभावादपि सद्रूपां । यौवनात्तु विशेषतः ॥ संचरंतीं गृहे साक्षा–ल्लक्ष्मीं मूर्तिमतीमिव ॥ ३२ ॥ निर्जरीनिर्जयकरीं । सौभाग्यतरुमंजरीं ॥ स प्रद्योतोऽन्यदाऽद्राक्षी–त्कन्यां मदनमंजरीं ॥ ३३ ॥ युग्मं ॥ स एवं चिंतयामास । म-दनातुरमानसः ॥ एषा लेखांगनाश्रीका । लभ्यते यदि वल्लभा ॥ ३४ ॥ तदा बंधनमप्येत–त्स्यात्सुखैकनिबंधनं ॥ विनानया मया प्राणा । ध्रियंतेऽथ वृथैव तत् ॥ ३५ ॥ युग्मं ॥ या-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च्यमानामिमां राजा । शीलोल इति दोषतः ॥ न दास्यति बलं किंचि-न्न चलत्येव मेऽधुना ॥ ३६ ॥ इति चिंताचितावह्नि-दह्यमानमना घनं ॥ विछायवदनः क्षीण-क्षीणदेहः सदान्न-वत् ॥ ३७ ॥ युग्मं ॥ द्विमुखस्तं तथा दृष्ट्वा । पृष्टवान् दुःखकारणं ॥ प्रद्योतोऽपि कथंचित्तं । स्वाभिप्रायं न्यवेदयत् ॥ ३८ ॥ अथ राजा प्रसन्नस्तु । पुत्रीपाणिग्रहोचितां ॥ सामग्रीं कारयामास । सम्यग्राममचिरादपि ॥ ३९ ॥ महेन महता सोऽपि । परिणाय्य निजांगजां ॥ गजादिदानसन्मानै-र्जामातरमतोषयत् ॥ ४० ॥ अत्यंतं तेन सत्कृत्य । चंडप्रद्योतभूपतिः ॥ विसृष्टः प्राप्तवान् राज्य-मुज्जयिन्यामपालयत् ॥ ४१ ॥ द्विमुखक्षितिपालस्य । श्रीकांपील्यमहापुरे ॥ प्रतिपालयतो राज्यं । वत्सरा ऐयरुर्घनाः ॥ ४२ ॥ अथान्यदा समायातः । शरत्कालस्तदा जनाः ॥ आरेभिरे महीयांसं । सम्यगिंद्रमहोत्सवं ॥ ४३ ॥ राजा पौरजनैः साक-मिंद्रस्तंभमदंभहृत् ॥ आरोप्य कारयामास । प्रतिष्ठां सत्तमैर्द्विजैः ॥ ४४ ॥ सुकोमलैः पट्टकूलैः । परितः कृतवेष्टनः ॥ शुभाकारैरलंकारैः । सोऽलंकृतस्ततो बभौ ॥ ४५ ॥ नाट्यगीतप्रबंधेन । सुगंधेन च वस्तुना ॥ कर्पूरमाल्यमुख्येन । तत्पूजामकरोज्जनः ॥ ४६ ॥ अपूजयत्स्व-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

थं राजा । नानोपायनपाणिभिः ॥ प्राणिभिः सह चक्रे च । विश्वाश्चर्यकृदुत्सवं ॥ ४७ ॥ स एवाथ गते काले । पतितः पृथिवीतले ॥ लोकैः कृतपदामृष्टि–र्दृष्टो द्विमुखभूभुजा ॥ ४८ ॥ सोऽथ वैराग्यतोऽध्याय–त्संसारासारतामिमां ॥ धिग् ऋद्धयः समस्तास्ता । ह्येतस्येवास्थिराः किल ॥ ४९ ॥ संपदश्चेद्भवंत्येताः । परिणामसुखप्रदाः ॥ नाकरिष्यंस्तदेतासां । त्यागं तीर्थकरादयः ॥५०॥ एवं विभावयन्नेव । प्राप्य प्रत्येकबुद्धतां ॥ द्विमुखो देवतादत्त–लिंगो दीक्षां प्रपन्नवान् ॥ ५१ ॥ उक्तं च–जा इंदकेउं समलंकियंतं । दठुं पडंतं पविलुप्पमाणं ॥ रिद्धिं अरिद्धिं समुपेहिआणं । पंचालरायावि समिक्ख धम्मं ॥ ५२ ॥ वैराग्यं प्रतिपन्नमानसमतिः संजातजातिस्मृतिः । संभूतोत्तमपूर्वजन्मजनितस्वाध्यायशुद्धस्मृतिः ॥ मायामोहमदप्रमादरहितः साधुक्रियासंगतो । राजर्षिर्द्विमुखो वने विहृतवान् प्रत्येकबुद्धश्चिरं ॥५३॥ इति श्रीप्रत्येकबुद्धचरिते द्विमुखराजर्षिवर्णनो नाम द्वितीयः प्रस्तावः संपूर्णः. ॥ श्रीरस्तु ॥

---

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ अथ तृतीयः प्रस्तावः प्रारभ्यते ॥

फणिमणिकिरणालिद्योतिताशाविभागो । विततदुरितवृक्षोन्मूलने मत्तनागः ॥ प्रमद-कुमुदखंडोल्लासने चारुचंद्रो । दिशतु शिवसुखं मे पार्श्वनाथो जिनेंद्रः ॥ १ ॥ सिद्धार्थादपि संभूतो । यः प्रभूतपराक्रमः ॥ अकंपयन्मेरुमपि । श्रीवीरः स शिवाय वः ॥२॥ इतो नमिन-रेंद्रस्य । चरित्रं कीर्तयिष्यते ॥ भवांतरेभ्य आरभ्य । भो भो सभ्या विभाव्यतां ॥ ३ ॥ मं-गलस्थालवद्भाति । नक्षत्राक्षतभूषितः ॥ जंबूद्वीपः सुपर्वाद्रि—नालिकेरविराजितः ॥ ४ ॥ भ-रतक्षेत्रमत्रास्ति । क्षेत्रवद्धर्मशस्यभृत् ॥ क्षितिप्रतिष्टितं नाम । पुरं तत्राभवत्परं ॥ ५ ॥ त-स्मिन् दृढरथो राजा । बिडोजा इव ताविषे ॥ सुंदर्या सुरसुंदर्या । सह क्रीडां करोति सः ॥ ॥ ६ ॥ समुद्रदत्तसंज्ञोऽथ । तत्र श्रेष्टयुत्तमोऽवसत् ॥ तद्भार्याभूत्समुद्रश्रीः । सलावण्या समु-द्रवत् ॥ ६ ॥ तयोर्भुंजानयोः सौख्यं । गुणिनावंगजावुभौ ॥ गुणचंद्रो गुणधर । इतिसंज्ञौ ब-भूवतुः ॥ ७ ॥ कलाकलापकुशलौ । मातापित्रोर्मनोरथैः ॥ सहैव जग्मतुर्वृद्धिं । प्रीतिमंतौ प-रस्परं ॥ ८ ॥ बहिर्गतोऽन्यदा दान—शौंडो गुणधरोऽशृणोत् ॥ श्रवणप्रीणकं श्लोक—मित्येकं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मागधाननात् ॥ ए ॥ अपूर्वः कोऽपि दाता त्वं । चिरं नंद ददासि यः ॥ अविद्यमानम-
प्यात्म—न्यमानं मानमार्थिने ॥ १० ॥ तस्मै संतुष्टचित्तः सन् । गुणी गुणधरो ददौ ॥ दीना-
राणां पंचशतीं । दानं मानपुरस्सरं ॥ १० ॥ पुत्रदानमिदं बुध्ध्वा । श्रेष्टी रुष्टमना मनाक् ॥
आकार्य तर्जयामास । शिक्षायै निजमंगजं ॥ ११ ॥ रे दुष्ट धृष्ट जवता । समस्तमपि माम-
कं ॥ कष्टादुपार्जितं वित्तं । नूनं निर्गमयिष्यते ॥ १२ ॥ धनमेवं ददानोऽपि । शोजते स्वजु-
जार्जितं ॥ परकीयं ददानस्य । तव पीमा न काचन ॥ १३ ॥ जदश्रुनेत्रः पुत्रोऽथ । पतित्वा
तातपादयोः ॥ अवादीत्कृतमज्ञाना—दपराधं क्षमस्व मे ॥ १४ ॥ पुनर्नैवं करिष्यामि । तत-
स्तातः पुनर्जगौ ॥ वत्स प्रदीयते दानं । परं परिमितं हि तत् ॥ १५ ॥ नत्वा गुणधरः प्राह
। परदेशाय तात मां ॥ आदिशाहं यथा तत्र । गत्वा श्रियमुपानये ॥ १६ ॥ जवाच सह-
साश्लिष्य । गलन्नेत्रजलः पिता ॥ मा गच्छ वत्स कुत्रापि । शिक्षार्थमिदमुच्यते ॥ १७ ॥ त-
थापि मनसोऽमर्षा—द्धजन्यां निःसृतः सुतः ॥ तेजस्वी तुरगः किंवा । तर्जनं सहते क्वचित्
॥ १० ॥ सह सार्थेन केनापि । गच्छन् प्राप महाटवीं ॥ यावत्तन्मध्यमागच्छत् । स सार्थोऽर्थ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निकेतनं ॥ १९ ॥ तावज्झटिति निद्राणानां । महाधाटी समुत्थिता ॥ कोदंडदंडीनिर्मुक्त—कां-
डखंडितविग्रहा ॥ २० ॥ उत्कटाः सुभटाः पेतुः । सार्थस्तैर्लुटितस्ततः ॥ बध्ध्वा नीता नि-
जां पल्लीं । नरा गुणधरादयः ॥ २१ ॥ दत्वा द्रव्यं जनाः सर्वे । स्वजनैर्मोचिता गताः ॥ स्व-
स्थानं परमेकाकी । तस्थौ गुणधरस्ततः ॥ २२ ॥ ताताज्ञाभंगवृक्षस्य । स्यादेष कुसुमोद्गमः
चिंतयन्निति निःक्षितः । कारागारे वसत्यसौ ॥ २३ ॥ भुंजानोऽतिकदन्नानि । सहमानः परा-
भवान् ॥ कष्टेन गमयन् कालं । स चित्तांतराचिंतयत् ॥ २४ ॥ विज्ञापितेऽथ तातस्य । ह-
स्येऽहं स्वजनैरिति ॥ अहो विदेशं गत्वायं । साध्वीं श्रियमुपार्जयत् ॥२५॥ उपायं चिंतयन्न-
न्यं । स कारागाररक्षितुः ॥ दृष्टवान् कुष्टरोगेण । व्याप्तं सर्वांगमंगजं ॥ २६ ॥ ऊचे गुणधरः
किं नो । त्वया पुत्रोऽप्युपेक्ष्यते ॥ व्याधिना बाध्यमानोऽसा—वुदासीनैर्जनैरिव ॥ २७ ॥ तेनो-
क्तं विहितान्यस्यौ—षधानि विविधान्यपि ॥ परं कोऽपि गुणो नास्य । संजातो जातकस्य मे
॥ २८ ॥ यदि त्वं वेत्सि किंचिज्ज्ञो । तदेतं प्रगुणीकुरु ॥ तेनोक्तमौषधं वेद्मि । कुष्टहृद् दृष्टप्र-
त्ययं ॥ २९ ॥ श्रीफलं फलिनीकंद—इत्याद्यैरौषधैर्युतः ॥ क्वाथः पीतो हरेत्कुष्टं । पुष्टं च कु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रुते वपुः ॥३०॥ तेनोक्तमेवमेतस्य । परं पुरुषसत्तम ॥ औषधान्यनभिज्ञत्वा-न्नाहं मेलयितुं
क्षमः ॥ ३१ ॥ अथो गुणधरेणोचे । सांप्रतं चेच्चिकित्स्यते ॥ तदाद्याप्यस्ति साध्योऽसौ । प-
श्चाद्यास्यत्यसाध्यतां ॥ ३२ ॥ तत् श्रुत्वा स्वगृहं प्राप्तः । स गेहिन्येति भाषितः ॥ अद्य त्वं
वीक्ष्यसे कस्मा-द्विच्छायवदनच्छविः ॥ ३३ ॥ तेन सर्वोऽपि वृत्तांत-स्तस्या अग्रे निवेदितः ॥
विमृश्य क्षणमाख्यायि । प्रियया प्रियया गिरा ॥ ३४ ॥ दिनमेकममुं मुंच । मेलयत्यौषधं
यथा ॥ पश्चात्पुनरपि क्षेप्यः । कारांतरुपकार्यपि ॥ ३५ ॥ अथ तं प्रेषयामास । स्वकीयजन-
संगतं ॥ औषधानि समानेतुं । कारागारस्य रक्षकः ॥ ३६ ॥ बच्चाभ्र सुचिरं गृह्णन् । यानि
तान्यौषधानि सः ॥ तावद्यावत्तमिस्रागा-त्तमिस्रकुलसंकुला ॥ ३७ ॥ सुप्तावेकत्रतो यात्र—
न्निद्रया मुद्रितो जनः ॥ स तावद्गागुरामुक्त-मृगवत्प्रपलायितः ॥ ३८ ॥ अचिरेणापि का-
लेन । दूरं गुणधरोऽगमत् ॥ जनोऽपीतस्ततः पश्यन् । विलक्षश्च स्वमास्पदं ॥ ३९ ॥ पुरं सु-
रपुरं प्राप । स सुरालयभूषितं ॥ भद्रस्य श्रेष्ठिनो हट्टे । गत्वा गुणधरः स्थितः ॥ ४० ॥ ह-
ट्टसत्कानि कार्याणि । स्वयं चक्रे स पुत्रवत् ॥ तुष्टेन श्रेष्ठिना नीतो । निमंत्र्य निजमंदिरं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४१ ॥ स्नानभोजनतांबूल-मुख्यां गुणधरस्य सः ॥ अकरोत्प्रतिपत्तिं य—त्सर्वत्र स्वर्णम-
र्प्यते ॥ ४२ ॥ त्रिंशद्दीनारमात्रं स्वं । मासे मासे समर्पयन् ॥ अरक्षत्स्वसमीपे तं । श्रेष्टी
सुतमिवादरात् ॥ ४३ ॥ अथो चतुर्षु मासेषु । व्यतीतेषु बभाण सः ॥ ताताऽज्ञातकुलस्या-
पि । त्वया मे निर्ममेन किं ॥ ४४ ॥ अत्राणस्य मम त्राणं । विहितं भवता बत ॥ इयंति
दिवसान्यत्र । सुखस्थां त्वत्प्रसादतः ॥ ४५ ॥ त्वं सन्मार्गतरुश्चाहं । पथिको यामि सांप्रतं
॥ भद्रश्रेष्टीति विज्ञप्तः । कथंचित्तं विसृष्टवान् ॥ ४६ ॥ तेन द्रव्येण वस्तूनि । गृहीत्वा च-
लितस्ततः ॥ संप्राप्तो विजयपुरं । वाणिज्यं तत्र सोऽकरोत् ॥ ४७ ॥ तत्रैको वणिगेकांते ।
कांत्युत्करकरंबितं ॥ तस्याग्रे दर्शयामास । रत्नमेकं महागुणं ॥ ४८ ॥ तद् दृष्ट्वा चिंतितं तेन
। विषभूतादिदोषहृत् ॥ क्षुद्रोपद्रवदारिद्र्य—विद्रावणविचक्षणं ॥ ४९ ॥ इदं चेल्लभ्यते रत्नं
। तदान्यत्किं विलोक्यते ॥ एतदीयमिदं कस्मा—दुपायल्लप्स्यते मया ॥ ५० ॥ इति चिंतातुरः
सोऽभू—द्विछायवदनछविः ॥ सुतमूर्छितवत्तस्थौ । निश्चेष्टोऽस्पष्टकष्टभृत् ॥ ५१ ॥ तं तथाविध-
मालोक्य । सशंकहृदयो वणिक् ॥ उवाच भोः किमेवं त्वं । चिंतातुर इवेक्ष्यसे ॥ ५२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेनोक्तं नास्ति मे चिंता । ततो वणिगभाषत ॥ वद मित्रास्य रत्नस्य । गुणान् दोषांश्च द-
क्षिण ॥ ५३ ॥ प्रस्तावे कथयिष्यामि । तेनैवमुदिते सति ॥ सादरं पृष्टवान् येन । पीडाकु-
भ्रमस्फुटं ॥ ५४ ॥ अत्रांतरे हयो हेषा-रवं कुर्वन् बिभीषणः ॥ संक्षोभितपुरस्तत्रै-वाग-
तोऽतर्किंतागतिः ॥ ५५ ॥ तद्देशवर्तिनो लोका । नष्टा गुणधरोऽपि च ॥ तद्रत्नग्रहणोपायां-
श्चिंतयामास भूरिशः ॥ ५६ ॥ ततो वणिग्गृहं गत्वा । तद्दासीं पृष्टवानिति ॥ त्वत्स्वामिना च
यल्लब्धं । तद्रत्नं वेत्सि किं न वा ॥ ५७ ॥ तयावाचि मम स्वामी । भिल्लपल्लीं गतोऽभवत्
॥ इदं मौल्येन पल्लीश-भिल्लपार्श्वाद्गृहीतवान् ॥ ५८ ॥ तीक्ष्णबुद्धिर्निशम्येति । लब्धो-
पायः कियत्यपि ॥ गते काले मिषं कृत्वा । स तद्गृहमुपाययौ ॥ ५९ ॥ दत्तासनः स एकां-
ते । नीत्वा गुणधरं जगौ ॥ पूर्वपृष्टं ममार्थं भोः । कथयावसरोऽस्त्ययं ॥ ६० ॥ ऊचे गुणधरे-
णैवं । शुद्धबुद्धिभिरंगिभिः ॥ आदरादत्तवस्तूनां । गुणो दोषश्च नोच्यते ॥ ६१ ॥ धनित्वं
निर्धनत्वं वा । सुखं वा दुःखमेव वा ॥ यत्प्राप्यं जायते यस्य । संयोगस्तस्य तादृशः ॥ ६२ ॥
गंभीरार्थमिदं वाक्यं । युंजानं तं वणिग्जगौ ॥ अस्पष्टं वचनं किं त्व-मुन्मत्त इव भाषसे ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६३ ॥ सदोषं चेदिदं वेत्सि । स्फुटं तत्किं न कथ्यते ॥ भ्रियते मौलिवन्मौलौ । किं ब-हिरतिभास्वरः ॥ ६४ ॥ अथो गुणधरो मौनं । क्षणं स्थित्वा बलादिव ॥ भाषितोऽभाषता-स्माभि-रयुक्तं न हि कथ्यते ॥६५॥ प्राणिपीडा भवेद्येन । परो येन च पीड्यते ॥ आत्मा च पतति क्लेशे । न तज्जल्पंति पंडिताः ॥ ६६ ॥ तथापि कथ्यते किंचि-त्त्वदत्याग्रहतो म-या ॥ वह्निवद्धियते दीप्र-मिदं स्वस्थानहानिकृत् ॥ ६७ ॥ एतस्यैव प्रभावेण । प्राप्तोऽ-स्म्येतादृशीं दशां ॥ यतो मम पिता पूर्वं । कुतश्चिदिदमाप्तवान् ॥ ६८ ॥ इदं प्रदीपवद्दीप्रं । दृष्ट्वा मम पिताभवत् ॥ विमोहितोऽतियत्नेन । स्वपार्श्वे रक्षतिस्म सः ॥ ६९ ॥ एतदागम-नाशंहा-द्विभवः प्रपलायितः ॥ चांडालागमनाद्रुद्ध-श्रोत्रीयब्राह्मणो यथा ॥ ७० ॥ दारि-द्र्यपीडितस्तातः । प्राहिणोन्मां सशंबलं ॥ विदेशाय करे दत्वा । रत्नं विक्रयहेतवे ॥ ७१ ॥ प्रस्थाय यावदायातः । सह सार्थेन संचरन् ॥ अटव्यामुत्कटा धाटी । भिल्लानां तावदु-त्थिता ॥ ७२ ॥ तया हता भटाः केचि-द्दुद्रुवु अन्येऽथ मानवाः ॥ इदं च रत्नमग्राहि । ब-द्ध्वा नीतोऽहमप्यहो ॥ ७३ ॥ तर्जनक्षुत्पिपासादि । तत्रातंत्रतया मया ॥ सोढमेतत्प्रभावे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ण । नष्टास्मि त्रुटितोऽधुना ॥ ७४ ॥ अस्मिन्मम समीपस्थे । समाधिर्नैकदाप्यभूत् ॥ गते पु-
नर्महाव्याधा—विव जातं सुखं सखे ॥ ७५ ॥ तदेतत्त्वत्समीपस्थं । दृष्ट्वा दोषजरं स्मरन् ॥
जयन्नीतो जवत्पृष्टो । विज्ञायवदनोऽजवं ॥ ७६ ॥ वणिजोक्तं त्वया सत्यं । महाजाग प्ररूपि-
तं ॥ यस्मादेतन्मया तस्मा—देव जिह्वाडुपाददे ॥ ७७ ॥ सदोषेण सुरूपेणा-प्येतेन किमु
साध्यते ॥ सौवर्णी त्रुरिका तत्कि—मुदरे क्षिप्यते क्वचित् ॥ ७७ ॥ तत्त्वमेव गृहीत्वैत—द्विक्री-
णीष्व पुरांतरे ॥ मह्यं द्रव्यं प्रदातव्यं । यावदेतेन लज्यते ॥ ७ए ॥ तेनोक्तं न करस्पर्श—मा-
त्रमस्य करोम्यहं ॥ कपिकबूलतां ज्ञात्वा । स्पृश्यते किं सुखेप्सुना ॥ ७० ॥ तथाप्यनिष्ठत इव
। तस्मै रत्नमदाद्वणिग् ॥ जुगुप्सवानवक्रुर्षो—त्कर्षवानप्युवाच सः ॥ ७१ ॥ नैतन्निर्लक्षणं द-
क्षो । ग्रहीष्यति गृही क्षितौ ॥ तथापि तेजसा मुग्धो । गृह्णात्वेतत्तु कश्चन ॥ ७२ ॥ इत्युक्त्वा
तद्गृहं त्यक्त्वा । भ्रांत्वा च नगरांतरे ॥ पंचाशन्निजदीनारा—नानीय वणिजे ददौ ॥ ७३ ॥
दृष्ट्वा तान् सोऽपि संतुष्ट—स्तुष्टाव श्रेष्ठिनंदनं ॥ अहो गुणधरोऽसि त्वं । नामतो गुणतोऽपि च
॥ ७४ ॥ कियन्मूल्यं समानीतं । निर्मूल्यस्यापि वस्तुनः ॥ धिषणा तावकी ताव—द्वाणिज्ये- १२२

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्वतिदक्षिणा ॥ ७५ ॥ ऊचे गुणधरेणाथो । ईषद्धसितपूर्वकं ॥ क्रियते किं त्वद्वाक्या—द्धराकः कोऽपि वंचितः ॥ ७६ ॥ इति बुद्ध्वा तदादाय । रत्नं यत्नेन पालयन् ॥ कियतो वासरांस्तत्रै—ष्ातिवाहितवानसौ ॥ ७७ ॥ अयत्नं रत्नलाभेन । परमामोदमेदुरः ॥ तस्यैव वणिजो गेहे । सोऽतिष्टदतिसुष्टुधीः ॥ ७८ ॥ कपटं प्रकटं मा मे । कदाचिदिह जायतां ॥ इत्याशंकाकुलोऽचाली—देकाकी स पुरात्ततः ॥ ७९ ॥ मार्गे गच्छन्नरण्यांतः । सोऽश्रृणोत्करुणस्वरं ॥ हाहा नाथाद्य कस्मान्मे । प्रतिवाक्यं ददासि न ॥ ९० ॥ रे दैव प्राणनाथं मे । हरताहं हता न किं ॥ अरे हृदय दैवेन । निर्दयेन हृते प्रिये ॥ ९१ ॥ तवाह्लादकरे रेरे । झटिति स्फुटितं न किं ॥ तन्मन्ये दृढमेताद्द—ग्वज्रेण घटितं ह्यसि ॥ ९२ ॥ युग्मं ॥ अशोकवृक्ष त्वमशोक एतां । बिभर्ष्यभिख्यां नियतं मुधैव ॥ जाता यतोऽहं त्वदधःस्थितापि । शोकाकुला दैवहता हताशा ॥ ९३ ॥ अस्ति सत्पुरुषः कोऽपि । परोपकरणोद्यतः ॥ संजीवयति यो दुःस्था—वस्थमेतं मम प्रियं ॥ ९४ ॥ उत्संगे प्रियमारोप्ये—त्येवमादिविलापिनीं ॥ अद्राक्षीत्कामिनीमेकां । काननांतः कृपापरः ॥ ९५ ॥ षड्भिः कुलकं ॥ रुदतीं सुदतीमेतां । दृष्ट्वैव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तरवः समे ॥ सितपुष्पमिषाज्जाता । गलदश्रुजला इव ॥ ए६ ॥ तेन पृष्टा महारण्ये । जद्रे किमिति रोदिषि ॥ आह सा वायुवेगोऽयं । विद्याधरनरेश्वरः ॥ ए७ ॥ मत्प्रियो मयका साकं । क्रीडार्थं मलयाचलं ॥ प्रति प्रस्थाय खिन्नात्मा । क्षणमत्रावतीर्णवान् ॥ ए८ ॥ क्षणमात्रं च सुप्तोऽयं । विश्रामाय मया समं ॥ तावत्कृष्णेन सर्पेण । दष्टो दुष्टेन केनचित् ॥ एए ॥ उपचाराः कृता नैके । मया विषहराः परं ॥ सर्वेऽपि निष्फला जाताः । प्रभातोन्नतमेघवत् ॥ ॥ १०० ॥ अहो सत्पुरुषोऽसि त्वं । यदि जानासि किंचन ॥ तदैतं प्रगुणं कृत्वा । प्राणजिक्षां प्रदेहि मे ॥ १ ॥ पानीयमानीय सरोवरांतरा-त्प्रक्षाल्य रत्नं निजमद्भुतप्रजं ॥ आसिंचदंगानि स तस्य सांजसं । विद्याधरस्तत्क्षणमाप चेतनां ॥ २ ॥ निद्राछेदादिवोत्तस्थौ । किमेतदिति जावयन् ॥ सहर्षा तत्प्रिया सर्वं । वृत्तांतं तं न्यवेदयत् ॥ ३ ॥ सोऽपि प्रांजलिराचख्यौ । जीवितव्यप्रदायिनः ॥ कथं प्रत्युपकाराय । प्रत्यलोऽहं जवामि ते ॥ ४ ॥ जीमूतस्त्रिजगंति जीवयति तत्किं किंचनापीहते । किं भानुः प्रतिजासयंश्च जुवनं किंचित्प्रतीछत्यसौ ॥ चंद्रश्चंडिकयाखिलं क्षितितलं प्रीणाति मुक्तस्पृहः । प्रायः प्रत्युपकारकारणनिराकांक्षा जवं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्युत्तमाः ॥ ५ ॥ निरीहोऽपि गृहाणेति । जल्पंस्तं बहु मानयन् ॥ विद्याधराधिपो विद्यां ।
प्रददौ बहुरूपिणीं ॥६॥ वायुवेगः प्रियायुक्तो । गगनाध्वनि सोऽचलत् ॥ इतरोऽपि रत्नविद्या
—कलितश्चलितोऽग्रतः ॥ ७ ॥ लक्ष्मीपुरपुरं प्राप्तो । वेश्याकामलतागृहे ॥ भुंजानो विषयाने-
ष । वासरानत्यवाहयत् ॥ ८ ॥ दत्तं पूर्वार्जितं वित्तं । सर्वं तस्यै मणिं विना ॥ अन्येद्युर्या-
चितं किंचि—त्तया नादादभावतः ॥ ९ ॥ कुट्टिन्या चिंतितं वित्तं । नास्य पार्श्वेऽस्ति किंचन ॥
अधुना याचितं चापि । नार्पयामास यद्धनं ॥ १० ॥ चंद्रश्चंद्रिकया हीनो । धनेन रहितः
पुमान् ॥ पत्रैश्च विकलो वृक्षो । विच्छाय इव दृश्यते ॥ ११ ॥ परमद्यापि सच्छाय—काय एष
निरीक्ष्यते ॥ तच्छोधयामि सर्वांग—मवशिष्टमुपाददे ॥ १२ ॥ कुट्टिनी चिंतयित्वेति । सुतं
गुणधरं निशि ॥ शोधयित्वाग्रहीद्रत्नं । यत्नेनापि सुरक्षितं ॥ १३ ॥ तत्स्थाने कर्करं क्षिप्त्वा
। कृतकार्याथ सास्वपत् ॥ उन्निद्रः सोऽपि तद्रत्न—मपश्यन् व्याकुलोऽभवत् ॥ १४ ॥ सोऽ-
चिंतयत्सज्ञोऽन्नेय—मक्का मे रत्नमग्रहीत् ॥ परमेतस्य पापस्य । दर्शयाम्यचिरात्फलं ॥ १५ ॥
धैर्यमेवं समालंब्य । सोत्कर्षामर्षवानपि ॥ पूर्ववत्सुप्रसन्नास्य—स्तद्दिनं तु व्यतीतवान् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १६ ॥ विचक्षणानामिदमेव लक्षणं । यल्लक्षणीया न भवंति कस्यचित् ॥ अत्यंतरुष्टा अपि निष्टुराक्षरं । वदंति वाक्यं न हि येन कुत्रचित् ॥ १७ ॥ स कामलतया साकं । रजन्यां वासमंदिरे ॥ सुष्वापापश्चिमे यामे । बोधितो रत्नचिंतया ॥ १८ ॥ रत्नोपायान् स्मरन् विद्यां । सस्मार बहुरूपिणीं ॥ सिंहरूपं तया कृत्वा । गृहद्वारि स्थितो नदन् ॥ १९ ॥ प्रबुद्धा तध्ध्वनिं श्रुत्वा । दृष्ट्वा कामलताथ तं ॥ करालं लंबलांगूलं । भीता संमूर्छितापतत् ॥ २० ॥ अथो प्रभाते संजाते । सुताऽनागमशंकिता ॥ अक्का तच्छुद्धये प्राप्ता । द्वितीयां गृहभूमिकां ॥ ॥ २१ ॥ निश्रेणीसंस्थितैवैषा । दृष्ट्वा सिंहं स्खलत्पदा ॥ तथाऽपतद्यथा सर्वे । पतिता वदनाद्रदाः ॥ २२ ॥ सा किंचिदविचार्यैव । तथैव रुधिरारुणा ॥ समागात् श्वासपूर्णास्या—ऽरिमर्दननृपांतिके ॥ २३ ॥ स्खलत्पदा बभाणैवं । रक्ष रक्ष क्षितीश मां ॥ पंचाननेन मत्पुत्री । पंचत्वं प्रापिता प्रभो ॥ २४ ॥ सर्वं कथय वृत्तांतं । मा भैषीर्भव सुस्थिता ॥ राज्ञेत्याश्वासिता साख्यत् । सर्वं सिंहभवं भयं ॥ २५ ॥ चचाल भूप उत्थाय । कौतुकाकुलमानसः ॥ आगत्य तद्गृहे सिंहं । मंदिरोपरि दृष्टवान् ॥ २६ ॥ अरण्यवासिनो जीवाः । संभवंत्यपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नो पुरे ॥ विशेषेण कथं सिंह । आरोहत्युत्तरां भुवं ॥ २७ ॥ परं कृत्रिमरुपोऽयं । कोऽपि कोपातुरोऽभवत् ॥ विमृश्येति महीपालः । पृष्टवान् कुट्टिनीमिति ॥ २८ ॥ भुजंगः संवसन् कोऽस्ति । सांप्रतं तव मंदिरे ॥ साह देशांतरायातो । नरो गुणधराभिधः ॥ २९ ॥ राज्ञोक्तं विप्रियं किंचि-त्तया तस्य कृतं किमु ॥ आह सा न मया किंचि-च्चेतसापि विचिंतितं ॥ ३० ॥ ततो गुणधरोऽवोचत् । सिंहरूपो मनुष्यवत् ॥ रेरे कुट्टिनि पापिष्टे । कनिष्टे दुष्टचेष्टिते ॥ ३१ ॥ अमूल्यं रत्नमेतादृक् । हृत्वापि त्वया मम ॥ विप्रियं विहितं नो चे-त्तदान्यत्किं करिष्यसि ॥ ३२ ॥ साधिक्षेपमिदं वाक्यं । श्रुत्वा नृपतिरब्रवीत् ॥ कपटं रे ममाग्रेऽपि । स्फुटयिष्यति राक्षसि ॥ ३३ ॥ गृहीतं यत्त्वया रत्नं । तद्दत्वा प्रणता भव ॥ क्षमयस्व स्वयं येन । स्वभावस्थो भवत्यसौ ॥ ३४ ॥ भीषणीभूय भूपेन । भूयस्तर्जितया तया ॥ भीतया रत्नमानीय । तस्याग्रे तन्निवेशितं ॥ ३५ ॥ अग्रतो रत्नमालोक्य । लोकविस्मयकारकं ॥ स्वभावावस्थितो जज्ञे । विद्यां गुणधरः स्मरन् ॥ ३६ ॥ आगतो दैवयोगेन । गुणचंद्रो विलोक्य तं ॥ मनःकुमुदचंद्रोऽयं । भ्राता मम किमुत्तमः ॥ ३७ ॥ अथवा तत्समाकारो । विपश्चित्कश्चिद-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्त्यसौ ॥ इत्येवं संशयापन्नः । क्षणं तस्थौ सविस्मयः ॥ ३८ ॥ तावद्गुणधरो वीक्ष्य । बृह-
द्भ्रातरमग्रतः ॥ आलिलिंग समागत्य । सहसा स्निग्धमुग्धदृक् ॥ ३९ ॥ रोमांचकंचुकः प्रोचे
। गुणचंद्र कथं भवान् ॥ इयतीं भुवमायातः । कथयस्व कथां तव ॥ ४० ॥ तेन सर्वोऽपि
वृत्तांतो–ऽनुजकेन प्ररूपितः ॥ सर्वेऽपि विस्मिता जाताः । श्रुत्वा तद्बुद्धिकौशलं ॥ ४१ ॥ रा-
जा च राजलोकोऽपि । भ्रातरौ तावुभावपि ॥ सर्वेषामभवद्धर्षो । मुक्त्वैकं कुट्टिनीमनः ॥
॥ ४२ ॥ राज्ञादिष्टं जना भो भो । एषा प्रच्छन्नतस्करी ॥ छित्वा नाशां च कर्णौ च । वेश्या
निर्वास्यतामितः ॥ ४३ ॥ ततो गुणधरो भूपं । विज्ञप्यात्यंतमाग्रहात् ॥ कुट्टिनीं मोचयामा-
स । दीने संतो हि वत्सलाः ॥ ४४ ॥ भ्राता चेद्गुणचंद्रस्य । तन्मे मान्योऽसि सर्वथा ॥ इ-
त्युक्त्वा भूभुजानीतो । निजं गुणधरो गृहं ॥ ४५ ॥ सभायामासने दत्वा । निवेश्य भ्रातरावु-
भौ ॥ ऊचे भूपो महाभाग । गुणचंद्रगुणान् शृणु ॥ ४६ ॥ यदेतत्सांप्रतं राज्यं । क्रियते भु-
ज्यते च यत् ॥ तत्सर्वं हि भवद्भ्रातृ–गुणचंद्रप्रसादतः ॥ ४७ ॥ यतः–अपाहरन्मां विपरी-
तशिक्षितो । हयो महावायुवदुग्रवेगवान् ॥ निन्येऽटवीं खिन्नकरोऽमुचं यदा । स्थितः स

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्रैव पपात मूर्छितः ॥ ४७ ॥ अहं तृष्णातुरो भ्राम्य—न्नाप्तवान् सलिलं क्वचित् ॥ गवेष्यमाणं नो किंचित् । प्रायशः प्राप्यतेंगिभिः ॥ ४९ ॥ एकस्य पादपस्याधो—ऽपतं मूर्छितवद्यदा ॥ तावत्तत्रैष आयातो । गुणचंद्रः कुतश्चन ॥ ५० ॥ दुःस्थितं मामयं दृष्ट्वा । सकृपः शीतलं जलं ॥ आनीय पाययामासा—नवं सज्जवपुर्यथा ॥ ५१ ॥ परिपक्वाम्रवृक्षादेः । पेशलानि फलान्ययं ॥ अर्पयामास सप्रीतिं । कारयामास भोजनं ॥ ५२ ॥ पृष्टलग्नं समायातं । सैन्यं दैन्यविवर्जितं ॥ अभ्यर्थ्येह समानीतो । गुणचंद्रो मया सह ॥ ५३ ॥ पृष्टः किमभिधानोऽसि । कुतः कुत्र च यास्यसि ॥ भुवं भ्राम्यसि केनैवं । ततोऽनेन प्ररूपितं ॥ ५४ ॥ क्षितिप्रतिष्टितान्नाम्नो । नगरात् श्रेष्टिनः सुतः ॥ अहं समुद्रदत्तस्य । गुणचंद्राभिधोऽधुना ॥ ५५ ॥ भ्रातुर्गुणधराख्यस्य । शुद्ध्यै भुवमभ्रमं ॥ अथ मुंच यथेके तं । ग्रामारण्यपुरादिषु ॥ ५६ ॥ जायसे दुःखहेतुर्मे । रक्षस्त्वं सुखकार्यपि ॥ तावन्मया पुनः प्रोक्तं । सुस्थीभव महामते ॥ ॥ ५७ ॥ त्रिभिर्विशेषकं ॥ शोधयिष्यामि ते बंधुं । प्रेष्य प्रेष्यान्निजान् भुवि ॥ भ्रातरं मेलयिष्यामि । करिष्यामि सुखं तत्र ॥५८॥ इत्याश्वास्य नरान् दत्वा । परिचर्याकरान् वरान् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ प्रदाय पृथगावासं । निवासं तत्र कारितः ॥ ५९ ॥ नैमित्तिकेन पृष्टेन । ज्ञानगर्भेण ज-
ल्पितं ॥ मासांतेऽत्रान्यरूपेण । बांधवोऽस्य मिलिष्यति ॥ ६० ॥ इति देशांतरान्वीक्षा–परि-
क्लेशो न कारितः ॥ गणयन् गमयामास । कथंचिद्वासरानयं ॥ ६१ ॥ अथो त्वयि स्फुटी-
भूते । पूर्णमेतन्मनोरथैः ॥ प्रतिज्ञयापि चास्माकं । भवन्मेलनसंज्ञया ॥ ६२ ॥ नत्वा गुणधरो-
ऽवोच–दल्पाः संत्युपकारिणः ॥ कृतज्ञा द्वित्रिचत्वारो–ऽधिकज्ञः केवलं भवान् ॥ ६३ ॥ उप-
कारे कृतेऽल्पेऽपि । महांतो बहुमन्वते ॥ इत्याकर्ण्य नृपो दानं । तुष्टोऽदात्पारितोषिकं ॥६४॥
विसृष्टोऽसौ नृपेणाप । गुणचंद्रस्य मंदिरं ॥ तेनापि स्नानभोज्यादि–भक्तिस्तस्य विनिर्ममे ॥
॥ ६५ ॥ उक्तं चावसरे वत्स । गम्यते तातमंदिरे ॥ आवयोर्विरहेणैष । खिद्यते हृद्यतीव
यत् ॥ ६६ ॥ यदासि निःसृतो रात्रौ । प्रातस्तातः पुनः पुनः ॥ विलोकयन्नपश्यंस्त्वां । स गाढं
व्याकुलोऽभवत् ॥ ६७ ॥ आहारं नैव गृह्णाति । निद्रां न लभते पिता ॥ जनन्यापि प रित्य-
क्तं । वराक्या भोजनादिकं ॥ ६८ ॥ दुःस्थावस्थाविति प्रेक्ष्य । पितरौ प्रोक्तवानहं ॥ वह्नौ
विशामि वर्षांते । भ्रातरं नानयामि येत् ॥ ६९ ॥ मा कोप्सीस्त्वं कृते क्वार–मित्येवं वदतो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तयोः ॥ निर्गतोऽहं ततोऽभ्राम्यं । पृथिव्यां त्वां विलोकयन् ॥ ७० ॥ मया ग्रामे पुरेऽरण्ये ।
त्वं भ्रमतापि नेक्षितः ॥ सांप्रतं पुण्ययोगेन । मिलितः कौतुकं दिशन् ॥ ७१ ॥ तदितो गम्य-
ते तात-पद्पीठं प्रणम्यते ॥ पित्रोश्च क्रियते हर्षः । स्वजनः परितोष्यते ॥ ७२ ॥ एवं गुण-
धरः श्रुत्वा । बृहद्भ्रातुर्वचः पितुः ॥ मिलनोत्कंठितो जातः । सायं गोरिव तर्णकः ॥ ७३ ॥
सत्कृत्याश्वरथद्रव्यैः । सेवकादि प्रदाय च ॥ विज्ञप्तो भूमिपालोऽथ । कथंचित्तौ विसृष्टवान्
॥ ७४ ॥ चेलतुस्तौ पुरात्तस्मात् । कृत्वा सार्थं निजं नवं ॥ अजस्रं च प्रयाणेन । प्राप्तौ श्री-
पुरसन्निधौ ॥ ७५ ॥ मनोरमण उद्याने । स्थितौ भोजनहेतवे ॥ रसवत्यो रसोपेताः । सर्वा-
श्च प्रगुणीकृताः ॥ ७६ ॥ तयोर्भाग्यादिवाकृष्टो । मासक्षपणपारणे ॥ चारणर्षिः समायातो ।
मायामोहविवर्जितः ॥ ७७ ॥ ताभ्यां रोमांचितांगाभ्यां । शुद्धान्नं प्रतिलाभितः ॥ सोऽपि
चित्तं च वित्तं च । शुद्धं ज्ञात्वा समाददे ॥ ७८ ॥ धर्मलाभं प्रदायायं । पारणं कृत-
वान् क्वचित् ॥ तौ च प्रचल्य संप्राप्तौ । क्रमेण निजपत्तनं ॥ ७९ ॥ पिता वर्धापनं
चक्रे । सर्वत्र नगरांतरे ॥ हर्षाश्रुसिक्तसर्वांगौ । पितरौ तौ प्रणेमतुः ॥ ८० ॥ मिलि-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तौ च महीजर्तुः । पृष्टौ च सकलां कथां ॥ उक्के च गुणचंड्रेण । वृत्तांते विस्मितं जनैः ॥
॥ ७१ ॥ मीमांसमानौ वरशास्त्रतत्वं । दानं ददानौ यशसो निदानं ॥ शाशंसमानौ कुलधर्म-
रत्नं । लक्ष्मीकृते तौ कुरुतःस्म यत्नं ॥ ७२ ॥ अचिरेणापि कालेन । धनेन धनदोपमां ॥ ले-
जाते राजमान्यौ च । संजातौ पूज्यपूजकौ ॥ ७३ ॥ गुणश्रीर्गुणचंद्रस्य । जार्या गुणधरस्य च
॥ जज्ञे गुणमतीनाम्नी । शीलशोजाप्रजावती ॥ ७४ ॥ सजायामुपविष्टेष्व—न्येद्युर्गुणधरादिषु
॥ अतर्कितः समायात—श्चारणश्रमणोंबरात् ॥ ७५ ॥ ससंज्रमं समुत्थाया—सनं दत्वा नि-
वेश्य तं ॥ ववंदे नृपतिः सर्व—सजाजनयुतो मुनिं ॥ ७६ ॥ धर्मलाजं प्रदायाह । मुनिर्धन्यो-
ऽसि भूपते ॥ यस्य वासे वसंत्येते । नरा गुणधरादयः ॥ ७७ ॥ मम कुष्टाहिदष्टस्य । नामि-
लिष्यदयं यदि ॥ प्रव्रज्याराज्यमीदृक्कं । नालप्स्येऽहं तदा खलु ॥ ७८ ॥ स एव वायुवेगोऽहं
। विद्याधरनरेश्वरः ॥ गांधर्वगीतनगरे । प्राप्तो वैराग्यमाप्तवान् ॥ ७९ ॥ जीवितव्यं क्षणाद्या-
ति । जीवस्य जलबिंदुवत् ॥ यौवनं च तटध्वंसि—नदीपूरसहोदरं ॥ ८० ॥ इंदिरेंदीवरा-
द्याधि—मंदिरादि च जंगुरं ॥ विमृश्येति सुतं राज्ये । संस्थाप्य व्रतमाददे ॥ ८१ ॥ अन्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तैंड्विविधशिक्ष—स्तपः कुर्वन् सुदुस्तपं ॥ अवापमवधिज्ञानं । गुरुसेवापरायणः ॥ ए२ ॥
ज्ञात्वा गुणधरं ताव—दात्मीयमुपकारिणं ॥ गुरुमापृच्छ्य धर्मार्थ—बोधनार्थमिहागमं ॥ ए३॥
जो जो जव्यजना मनागपि मनः कृत्वैकतानं निजं । यूयं संशृणुतोच्यमानमधुना तत्वं मया
किंचन ॥ रत्नद्वीपमिवाप्य मानवजवं संसारसिंधौ चिरात् । मिथ्यात्वादिकपर्दसंग्रहपरा नि-
र्मात मा निःफलं ॥ ए४ ॥ देवा जिनेंद्रा गुरवो मुनींद्रा । धर्मो जिनेंद्रप्रतिपादितश्च ॥ एत-
त्त्रयं यः कुरुते स्वचित्ते । लोकत्रयाधिपतिर्जवेत्सः ॥ ए५ ॥ इत्यादिदेशनां श्रुत्वा । प्रबुद्धा
सकला सजा ॥ कैश्चिद्भागवती दीक्षा । जाग्यवद्भिः समाददे ॥ ए६ ॥ राज्ञा च गुणचंद्रेण
। तथा गुणधरेण च ॥ अतैर्द्वादशजिर्युक्तं । श्रीसम्यक्त्वमुपाददे ॥ ए७ ॥ सर्वैरेतदुपात्तं स्वं
। पालनीयं दृढाशयैः ॥ इत्युक्त्वा दीक्षितैः साकं । विजहारावनौ मुनिः ॥ ए८ ॥ कुरुतेऽथ नृ-
पो धर्म—मुन्नयन् जिनशासनं ॥ तथैव सकलो लोको । जिनधर्मरतोऽजवत् ॥ एए ॥ प्रातः
श्रीजिनमंदिरेषु सकलो लोको जिनान् वंदते । मध्याह्ने परिधाय धौतवसनान्यज्यर्चयत्यन्व-
हं ॥ षोढावश्यककर्म कर्मनिकुरं निर्माति निमायक—स्तस्मिन् धर्मपरायणे नरपतौ जज्ञे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जनो धार्मिकः ॥ १०० ॥ अग्निशर्माभिधो राज—मान्यः पूर्वपुरोहितः ॥ सनासमक्षमाच-
ख्यौ । नास्तिको नृपतेः पुरः ॥ १ ॥ राजन् सर्वज्ञधर्मादि । नास्ति किंचित्खपुष्पवत् ॥ प्र-
माणपंचकेनापि । येनैतन्न प्रमीयते ॥ २ ॥ राज्ञोक्तं किमसंबद्धं । भाषसे सुकृतादिकं ॥ अ-
नुमानागमाभ्यां वा—र्थापत्तेरवगम्यते ॥ ३ ॥ तेनोक्तमप्रत्यक्षत्वा—त्प्रतीतिस्तत्र नोचिता
॥ तर्हि पूर्वजसत्तायां । युज्यते सा न ते द्विज ॥ ४ ॥ इत्यादिवचनै राजा । तं तथा निरलो-
ठयत् ॥ यथा निरुत्तरो जातो । हसितश्च सभाजनैः ॥ ५ ॥ कोपातुरः स निर्गत्य । तापसं
व्रतमग्रहीत् ॥ मृतस्तीव्रं तपः कृत्वा । जज्ञे यक्षो महर्द्धिकः ॥ ६ ॥ स प्रयुंज्यावधिज्ञान—
मज्ञासीद्वैरिणं नृपं ॥ अकार्षीन्नगरे मारीं । समुल्लसितवैरभाक् ॥ ७ ॥ दाहज्वरश्च भूभर्तुः ।
शरीरे तेन निर्ममे ॥ निर्ममेण नरेंद्रेण । गणिता न स्ववेदना ॥ ८ ॥ परं परां म्रियमाणां ।
दृष्ट्वा जनपरंपरां ॥ भूपो धूपं समुत्क्षिप्य । प्रांजलिः सन्नदोऽवदत् ॥ ९ ॥ देवो वा दानवो
वा मे । यो रुष्टोऽस्ति पुरोपरि ॥ स जल्पतु स्फुटीभूय । प्रसन्नीभूय सांप्रतं ॥ १० ॥ साधि-
क्षेपमथो यक्ष । आचचक्षे भवांतरं ॥ राज्ञा मधुरवाग्नीरैः । सिक्तः किंचिच्छशाम सः ॥ ११ ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

उवाच भो महीपाल । त्वयैकैको नरोऽन्वहं ॥ मम प्रेतवने प्रेष्य–स्तेन कथ्या कथा पुनः ॥ १२ ॥ न वेत्स्याम्येव यस्याहं । कथाया अर्थमद्भुतं ॥ तस्मादेव नरान्मारिः । सर्वथा न भविष्यति ॥ १३ ॥ अंगीकृतं नरेंद्रेण । सर्वथानिष्टमप्यदः ॥ शेषपत्तनरक्षायै । ततो यक्ष-स्तिरोदधे ॥ १४ ॥ राजा च प्रगुणीभूतो । मारिस्तत्र न्यवर्तत ॥ एकैकः पुरुषो नित्यं । प्रे-ष्यते प्रेतकानने ॥ १५ ॥ रूपं बिभीषणं कृत्वा । तत्र यक्षः स्फुटो भवेत् ॥ कथां पृच्छति भीतात्मा । कश्चिन्नाख्याति तां पुनः ॥ १६ ॥ तत आहत्य खड्गेन । मानवं मारयत्यसौ ॥ मृतेर्भीतः समारंभे । पलायितुमितो जनः ॥ १७ ॥ राज्ञा स्वसेवकैश्चंडै–र्निरुध्येतस्ततो व्रज-न् ॥ जनः कारागृहे क्षिप्त । इव तत्रैव रक्षितः ॥ १८ ॥ अन्यदा गृहपार्श्वस्थां । स्थविरां क-रुणस्वरं ॥ रुदतीं करुणापूर्ण–चित्तो गुणधरोऽश्रृणोत् ॥ १९ ॥ स तस्या मंदिरं गत्वा । मातः किमिति रोदिषि ॥ अकस्मादत्र कस्मात्त्वं । पृष्टवानिति सांजसं ॥ २० ॥ तयोक्तं पुत्र निर्भा-ग्या । किं वदामि त्वदग्रतः ॥ एक एवास्ति मे सूनु–राधारोंधस्य यष्टिवत् ॥ २१ ॥ अद्य सोऽपि नृपादेशाद् । गत्वा प्रेतवने निशि ॥ यक्षेण मारितो नून–मशरण्यो मरिष्यति ॥ २२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मारोदीरद्य यास्यामि । तत्स्थाने प्रेतकानने ॥ आह सा स्वब्रहत्स त्वं । मम पुत्रोऽसि नो किमु ॥ २३ ॥ इतो मातर्न वक्तव्य-मित्युक्त्वा दृढसाहसः ॥ राजाद्यैर्वार्यमाणोऽपि । वने गुणधरोऽगमत् ॥ २४ ॥ निशायां दारुणं रूपं । कृत्वा यक्षः समाययौ ॥ पृष्टः कथानकं तेन । धैर्याधारः स उक्तवान् ॥ २५ ॥ धारावासपुराधीशो । धराधीशाभिधो नृपः ॥ आसीत्तस्य सुतो नाम्ना । सुतेजास्तेजसां निधिः ॥ २६ ॥ अकृत्रिमाणि मित्राणि । तस्याभूवन्निति त्रयः ॥ सूत्रधारस्वर्णकार-पुरोहिततनूरुहाः ॥ २७ ॥ कुलोचितकलास्वेते । चत्वारोऽपि विचक्षणाः ॥ क्रीडंत्येकत्र तिष्ठंति । दर्शयंति स्वकौशलं ॥ २८ ॥ अत्यन्यायकरश्चौर । आरक्षैर्वध्यभूमिकां ॥ नीयमानः कुमारस्य । प्रपेदे शरणं रयात् ॥ २९ ॥ शरणागतवज्रपंजरः । कथयामास कुमार उद्धुरः ॥ किमनेन कृतं हि दुःकृतं । यदयं छाग इवेति बध्यते ॥ ३० ॥ आरक्षकैरथो ऊचे । कुमार नृपमंदिरे ॥ अनेन विहितं चौर्यं । क्रूरमेतं विमुंच तत् ॥ ३१ ॥ विहस्योचे कुमारेण । साधुः सत्कर्मगर्जितः ॥ शरणं न विशत्येव । यद्यसाधुर्न रक्ष्यते ॥ ३२ ॥ तच्छरणागतपालन-मेव कथं जायते महापुंसां ॥ तच्छक्रोऽपि न शक्तो । लातुं मम पृष्ठगतमेतं ॥ ३३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथो आरक्षकैरेतत् । सर्वं राज्ञे निवेदितं ॥ राजापि सहसा क्रुद्धः । समस्तांस्तानदोऽवदत् ॥ ३४ ॥ मदीयेन प्रसादेन । जात उन्मत्तवत्सुतः ॥ तच्चौरपक्षपात्येष । पुरान्निर्धाव्यतामिति ॥ ३५ ॥ सोऽपि ज्ञात्वा नृपादेशं । तत्क्षणं चलितस्ततः ॥ अन्वगच्छत्कुमारं तं । मित्रत्रयमकृत्रिमं ॥ ३६ ॥ स्वकलाकौशलेनैव । पूज्यमाना महीतले ॥ अर्जयंतः सुवर्णादि । स्थिता निश्यन्यदा वने ॥ ३७ ॥ अस्मिन् बिभीषणेऽरण्ये । व्याघ्रसिंहादिसंकुले ॥ ये सुप्तास्ते विगुप्ता हि । श्रेयो जागरणं ततः ॥ ३८ ॥ चत्वारः स्मो वयं रात्रे-श्चत्वारः प्रहरा अपि ॥ एकैकं प्रहरं याव-ज्जागर्त्वैकैक एव तत् ॥ ३९ ॥ एवं विमृश्य सर्वेऽपि । सुषुपुः सुखनिद्रया ॥ सूत्रधारसुतः स्मैको । जागरूकोऽवतिष्ठते ॥ ४० ॥ तेन तत्क्षणिकत्वेन । विलोक्येतस्ततो वनं ॥ दृष्ट्वा काष्टं विशिष्टांगी । घटिता तस्य पुत्रिका ॥ ४१ ॥ अथ यामे द्वितीयेऽस्मिन् । सूत्रधारसुतोऽस्वपत् ॥ स्वर्णकारसुतस्तस्थौ । जाग्रदुग्रकलानिधिः ॥ ४२ ॥ सोऽपि तां पुत्रिकां दृष्ट्वा । हृष्टचित्तो व्यचिंतयत् ॥ अलंकारैर्विना नैषा । भाति नष्ठापि काव्यवत् ॥ ४३ ॥ घटयित्वा त्वलंकारान् । सर्वांगेषु विभूष्य तां ॥ स्वावधिं पूरयित्वा स । निद्रया मुद्रितोऽभवत्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४४ ॥ नृपपुत्रः समुत्थाय । तृतीये प्रहरे स्थितः ॥ दृष्ट्वा तां पुत्रिकां हृष्ट—श्वेतसेति व्य-
ज्ञावयत् ॥ ४५ ॥ पत्रप्रोज्झितवल्लीव । वसनेन विवर्जिता ॥ ज्ञाति नैषेति सा तेन । वसनं
परिधापिता ॥ ४६ ॥ चतुर्थे प्रहरे जाते । पुरोहितसुतः स्थितः ॥ सालंकारां सुरूपां च ।
सवस्त्रां तां व्यलोकत ॥ ४७ ॥ मनोहरापि नादेया । केसरेण विवर्जिता ॥ एषा राजीवरा-
जीव । जीवेन रहिता सती ॥ ४८ ॥ त्रैलोक्याश्चर्यकृद्रूपा । यद्येषापि च जीव्यते ॥ तदा ह-
रति चेतांसि । देवानां किं पुनर्नृणां ॥ ४९ ॥ एवं विमृश्य सन्मंत्रं । मंत्रयित्वा स मांत्रिकः
॥ जीवंतीमकरोदेतां । तत्क्षणं हरिणेक्षणां ॥ ५० ॥ समुद्गते दिवानाथे । चत्वारश्चलितास्ततः
॥ चचाल कामिनी सापि । तावत्तदनुगामिनी ॥ ५१ ॥ सूत्रधारसुतः प्राह । मयेयं घटिता
यतः ॥ अतोऽसौ मामकीनैव । मम मंदिरमेष्यति ॥ ५२ ॥ स्वर्णकारसुतोऽप्यूचे । विभूषण-
विभूषिता ॥ एषा मया कृता तस्मा—द्भवित्री मम गेहिनी ॥ ५३ ॥ तावद्भूपसुतोऽप्याह ।
मयेयं परिधापिता ॥ दुकूलानि स्वकीयानि । तदसौ मम वल्लभा ॥ ५४ ॥ पुरोधःपुत्र आ-
चख्यौ । साध्यते किमजीवया ॥ जीवंतीयं मया चक्रे । ममैवैषा ततः प्रिया ॥ ५५ ॥ तज्ज्ञैः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथय यक्ष त्वं । विचक्षणशिरोमणे ॥ चतुर्षु तेषु मित्रेषु । जाया सा कस्य जायते ॥ ५६ ॥
श्रुत्वा सविस्मयो यक्षो । बहुकालं विमृष्टवान् ॥ नाज्ञासीत्पृष्टमर्थं तं । तावत्तरणिरुद्ययौ ॥
॥ ५७ ॥ यक्षेण सुप्रसन्नेन । भणितं भो महामते ॥ त्वयाधुना स्वसत्वेन । रंजितोऽस्मि जि-
तोऽस्मि च ॥ ५८ ॥ याचस्व विश्वप्रथितावदात । यच्चिंतितं ते तदहं प्रदास्ये ॥ समुद्रदत्तां-
गरुहस्तदाह । निवर्ततां मारिदवाग्निदाहः ॥ ५९ ॥ यक्षेणोक्तं स्वयं सिद्ध—मेतत्त्वत्तोऽपि स-
त्तम ॥ अन्यत्किंचित्प्रसद्याद्य । समादिश करोमि यत् ॥ ६० ॥ तेनोक्तं नास्ति मे किंचित् ।
प्रार्थनीयमितः परं ॥ अहो परोपकारैक—कारित्वमिति चिंतयन् ॥ ६१ ॥ यक्षः प्राह महा-
भाग । निरीहोऽसि तथापि च ॥ समाधानकृते किंचि——न्मह्यं कार्यं समादिश ॥ ६२ ॥ भ-
णितं तेन यद्येवं । तदा सम्यक्त्वपूर्वकं ॥ जिनधर्मं प्रपद्यस्व । मन्यस्व जिनदेवतां ॥ ६३ ॥
वंदस्व स्वबधीः शुद्धान् । सर्वान् गुणगुरून् गुरून् ॥ सर्वज्ञभाषितं वाक्यं । श्रद्धेहि प्रबु-
द्धधीः ॥ ६४ ॥ पश्य शाश्वतचैत्याली—र्विद्धि त्वं स्वयमेव भोः ॥ प्रयुंज्यावधिविज्ञानं । स-
त्यं जल्पामि किं न वा ॥ ६५ ॥ इत्येवं शृण्वतस्तस्य । यक्षस्य हृदयांबरे ॥ मिथ्यात्वध्वांत-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विध्वंसी । सम्यक्त्वरविरुद्यायौ ॥ ६६ ॥ उवाच साधु साधुत्व–मुध्धृतोऽहं जवार्णवात् ॥ परे-षामुपकारायो–त्पत्तिश्चंदनवत्तव ॥ ६७ ॥ देवदूष्याण्यदूष्याणि । प्रदायाजरणानि च ॥ कार्ये स्मार्योऽहमित्युक्त्वा । यक्षराजस्तिरोहितः ॥ ६८ ॥ ततो गुणधरः स्मेर–वदनेंदीवरः प्रगे ॥ देवदूष्यैरलंकारै–रलंकृतवपुर्लतः ॥ ६९ ॥ नानानागरिकैर्लोकैः । पीयमानो दृगंचलैः ॥ नृपधाम जगामायं । ननाम च महीपतिं ॥ ७० ॥ युग्मं ॥ राज्ञापि स्वासनार्धे तं । बहुमानपुरस्सरं ॥ निवेश्य सकलं पृष्टं । स्वरूपं तस्य सन्निधौ ॥ ७१ ॥ तेनापि मदमुक्तेन । यथावस्थितमेव हि ॥ निरूपितं स्वरूपं च । सजा सर्वापि विस्मिता ॥ ७२ ॥ सर्वेषां जीवितव्यस्य । दाता त्वमिति संस्तवन् ॥ राजा पौरैर्नरैर्युक्त––स्तमत्यंतमपूजयत् ॥ ७३ ॥ अथान्यदा गुणधरः । श्रेष्ठिश्रेष्ठो व्यचिंतयत् ॥ पूर्वपुण्यवशाल्लक्ष्मी–र्लब्धा चेद्व्ययते मया ॥ ७४ ॥ यत्सेवते श्रीर्विपरीतमब्जं । तत्तु स्वरूपं विपरीतमस्याः ॥ आरध्यमाणा नियतं प्रयाति । विसृज्यमाणा त्ववतिष्टते यत् ॥ ७५ ॥ प्रासादबिंबादि जिनेश्वराणां । न कारितं येन धृतं व्रतं नो ॥ न पूजिताः साधुजना नृजन्म–रमादिकं निष्फलमेव तस्य ॥ ७६ ॥ पिशाच्येव श्रिया प्रायो–ऽखि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बोऽपि बलितो जनः ॥ यस्तां ब्रवति तं मन्ये । विचक्षणशिरोमणिं ॥ ७७ ॥ जिनप्रासादस-
त्क्षेत्रे । द्रव्यबीजं वपाम्यहं ॥ यथानंतगुणा पुण्य—फलोत्पत्तिर्भवेन्मम ॥ ७८ ॥ एवं विचिं-
त्य जैनेंद्रः । प्रासादस्तेन कारितः ॥ विमानानि विमानानि । संजातानि विलोक्ययं ॥ ७९ ॥
यदीयसोपानचटन्नांगिना—मंगेषु जाति श्रमवारिबिंदवः ॥ वर्धापितानां सुकृतश्रिया मुदा
। वितनकलशा इव मौक्तिकोत्कराः ॥ ८० ॥ यस्मिन्महानिर्मलदेवमूर्तौ । संक्रांतमूर्तिर्जन इ-
त्यतोषीत् ॥ यथा प्रभुर्मे हृदयेऽयमास्ते । प्रभोस्तथाहं हृदये वसामि ॥ ८१ ॥ स्फटिकघटितं
चित्रैश्चित्रैर्विचित्रितमुन्नतं । कनकमणिनिर्मध्ये मध्ये निबध्य विभूषितं ॥ जिनपतिभवनं
देवेंद्राणां मनांस्यपि रंजयत् । त्रिभुवनजनो बोधेर्बीजं विलोक्य समर्जयत् ॥ ८२ ॥ अथो हृ-
ष्टो राजा—न्यदा गुणधरं जगौ ॥ कारागारसमं मन्ये । संसारं सांप्रतं सखे ॥ ८३ ॥ तृ-
णवद्राज्यमुत्सृज्य । प्रपद्ये व्रतमार्हतं ॥ परं राज्यधुराधार—धौरेयो न सुतो मम ॥ ८४ ॥
एकोऽपि जायते पुत्रः । कथंचिद्यदि मद्गृहे ॥ तस्मै राज्यं प्रदायाहं । पूरयामि मनोरथं ॥
॥ ८५ ॥ तत्त्वं दक्षेषु मुख्योऽसि । कार्यकार्युपकार्यसि ॥ तथा कुरु यथैकः स्या—दचिरान्मम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नंदनः ॥ ७६ ॥ राजन्नैवं करिष्यामि । प्रपद्येति निजं गृहं ॥ समागत्य जिनेंद्राग्रे । स्थित्वा तं यक्षमस्मरत् ॥ ७७ ॥ प्राप्तः स्मरणमात्रेण । प्राह स्वामिन् समादिश ॥ उक्तं गुणधरेणापि । भूभुजे देहि नंदनं ॥ ७८ ॥ स्वामिन्नेवं करिष्यामि । परं राज्ञा निरंतरं ॥ अर्चा जिनेशितुः कार्या । येन दुष्कर्म हीयते ॥ ७९ ॥ इत्युक्त्वा स्वाश्रयं यक्षो—ऽगबद्गुणधरेण च ॥ राज्ञे निवेदितं सर्वं । राजापि कृतवांस्तथा ॥ ८० ॥ यक्षप्रभावतस्तूर्णं । पापकर्मक्षयेण च ॥ भूपतेस्तनयो जज्ञे । रूपवान् जातरूपवत् ॥८१॥ चक्रे जन्मोत्सवो राज्ञा । परमाश्चर्यकारणं ॥ ततो जिनधर इति । नाम पुत्रस्य निर्ममे ॥ ८२ ॥ तस्मै बाल्येऽप्यदाद्राज्यं । स्वयं वैराग्यरंगितः ॥ उद्योतनगुरोः पार्श्वे । व्रतं निर्वृतिकृद्वलौ ॥ ८३ ॥ तप्यमानस्तपस्तीव्रं । क्षांतिं कुर्वन्ननुत्तरां ॥ संप्राप्तकेवलज्ञानो । वव्रे मुक्तिश्रिया नृपः ॥ ८४ ॥ गुणधरगुणचंद्रौ नेत्रसंतोषचंद्रौ । जगति विजयमानौ भूभुजा पूज्यमानौ ॥ विजितमदनमानौ प्राज्ञकैः शस्यमानौ । विनयनयसमेतौ निन्यतुः कालमेतौ ॥ ८५ ॥ कुर्वाणौ जिनमंदिरेषु विधिवत्पूजां त्रिकालं सदा । श्रीमत्पुण्यलतातरून् गुणगुरून् संसेवमानौ गुरून् ॥ शुद्धश्रावकधर्मकर्मनिरतौ सम्यक्त्वरत्न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रतौ । तौ संसारसुखात् पराङ्मुखमती कालं व्यतिक्रामतः ॥ ९६ ॥ पर्यंतकाले स्वकलत्रयुक्तौ । संगृह्य तौ पंचमहाव्रतानि ॥ पंच स्मरंतौ परमेष्टिनां तौ । पंचत्वमासादयतां सुखेन ॥ ॥ ९७ ॥ गुणचंद्रो गुणधरो । गुणश्रीर्गुणमत्यमी ॥ चत्वारो लांतके देव-लोके संजज्ञिरे सुराः ॥ ९८ ॥ एते लांतकदेवलोकपतिना तुल्या बलेन श्रिया । शश्वच्छाश्वतचैत्यवंदनपरास्तीर्थेषु यात्राकराः ॥ दिव्यद्देवपरंपराभिरभितः संसेवितांह्निद्वयाः । स्वीयायुः प्रतिपालयंति कलयंत्यानंदवृंदोदयं ॥ २९९ ॥ इति श्रीप्रत्येकबुद्धचरित्रे तृतीयप्रस्तावे नमिप्रथमभववर्णनो नाम प्रथमः प्रकारः ॥ श्रीरस्तु ॥

स्वर्णाद्रिकर्णिकायुक्तो । लवणाब्धिसरःस्थितः ॥ जंबूद्वीपोऽब्जवद्भाति । चंद्रसूर्यमरालभृत् ॥ १ ॥ क्षेत्रे महाविदेहाख्ये । विजयः पुष्कलावती ॥ पुरं तत्र सदोद्दद्ध-तोरणं मणितोरणं ॥ २ ॥ कीर्तिसारो नृपस्तत्र । द्विधा रक्षति यः क्षितिं ॥ राज्ञी कीर्तिमती तस्य । प्रशस्या शीलशालिनी ॥ ३ ॥ ईषन्निद्रासुखासक्ता । सा ददर्श चतुर्दश ॥ महास्वप्नानि यामिन्याः । पश्चिमे प्रहरेऽन्यदा ॥ ४ ॥ गजेंद्रवृषसिंहश्री-दामसोमरविध्वजाः ॥ कुंभपद्मसरोब्ध-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ग्नि–विमानमणिसंचयाः ॥ ५ ॥ कश्चिज्जीवो दिवश्च्युत्वा । गर्भे तस्या अवातरत् ॥ तानि दृ-
ष्ट्वा प्रबुद्धा सा । हृष्टागान्नृपमंदिरे ॥ ६ ॥ स्वप्नस्वरूपमाचख्यौ । विचार्यार्यमतिश्च सः ॥ पु-
त्रलाभाभिधानेना–नंदयामास वल्लभां ॥ ७ ॥ पुनः प्रभाते संजाते । भूपतिः स्वप्नपाठकान्
॥ आकार्यापृछदेतेऽपि । शास्त्रदृष्ट्या बभाषिरे ॥ ८ ॥ स्वप्नान्येतानि राजेंद्र । माता पश्यति
निश्चितं ॥ अवतारे जिनेंद्राणा–मथवा चक्रवर्तिनां ॥ ए ॥ प्रत्यक्षाणीव सर्वाणि । जिनमा-
ता विलोकते ॥ किंचिदस्पष्टरूपाणि । चक्रिमाता तु पश्यति ॥ १० ॥ राज्ञा च पृष्टया रा-
ज्ञ्या । कीर्तिमत्या निवेदितं ॥ अस्पष्टानीव दृष्टानि । स्वप्नान्यद्य निशात्यये ॥ ११ ॥ तत-
स्तैर्निश्चयश्चक्रे । चक्री पुत्रो भविष्यति ॥ श्रुत्वेत्युच्छ्वसितौ तौ च । धाराहतकदंबवत् ॥१२॥
राज्ञी च गर्भसंभूति–भवानथ मनोरथान् ॥ पूरयंत्यवहद्गर्भं । दीपवत्स्वोदराभ्रके ॥ १३ ॥
दिनेषु परिपूर्णेषु । प्रसूतिगृहदीपकं ॥ अजनिष्ट सुतं साथ । द्वितीयमिव दीपकं ॥ १४ ॥ म-
हामहोत्सवं कृत्वा । जाते द्वादशमेऽहनि ॥ तस्याऽमृतयशा एवं । राज्ञा नाम प्रतिष्ठितं ॥
॥ १५ ॥ पालितः पंचधात्रीभिः । स मेरुगिरिमस्तके ॥ कल्पवृक्ष इव प्राप । वृद्धिं तत्र शनैः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शनैः ॥ १६ ॥ कलाकलापं जग्राह । शुक्लपक्षशशीव सः ॥ कामिनीजनसंतान—मोहनं यौ-
वनं ययौ ॥ १७ ॥ आस्यद्भृंगपरंपरालिकयुतां चंचत्फलालीकुचां । श्यामां पेशलपल्लवाधरध-
धरां नव्यच्छदाच्छादितां ॥ रम्यां गम्यतमां वनस्पतिततिं शाखाभुजभ्राजितां । जायां क्रीड-
यितुं नवां धव इव प्राप्तो वसंतोत्सवः ॥ १८ ॥ निर्धनोऽपि जनस्तत्र । गच्छति क्रीडितुं वने
॥ चिक्रीडिषुरपि प्राज्य—दानेच्छुर्नो नृपात्मजः ॥ १९ ॥ अन्यदा भूपतिः प्राह । वत्स गच्छ
वनेऽधुना ॥ यथेच्छं क्रीड सश्रीक । इव तावत्सुतोऽभ्यधात् ॥ २० ॥ एवं कुर्वे परं तात । द्र-
व्यं नास्त्युत्सवोचितं ॥ तदैवाहूय राजेंद्रः । स्वभांडागारिणं जगौ ॥ २१ ॥ पुत्रस्यान्वीक्ष्यते
यावद् । द्रव्यं दातव्यमेव तत् ॥ ॐमित्युक्त्वा प्रपेदे स । राजा च स्थानमाप्तवान् ॥ २२ ॥
कुमार आहूय पुरस्य मानवान् । दत्वा स्वतुल्याभरणांबराणि च ॥ अनेककोटिद्रविणव्ययेन
। चिक्रीड पौरैः पुरुहूतवत्सुरैः ॥ २३ ॥ जहर्ष सकलो लोको—ऽस्तोकश्लोकः स्म खेलति ॥
भूमीतले कुमारस्य । कोकः कोकनदे यथा ॥ २४ ॥ भांडागारी नृपस्याग्रे । द्रव्यव्ययमची-
कथत् ॥ निरर्थं गमितं द्रव्यं । बहनेनेति चिंतयन् ॥ २५ ॥ कुमारं नृपतिः प्राह । वत्स जा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नास्ति नो कथं ॥ निरर्थं गमयन्नर्थ—मसमं कीर्त्तिभाजनं ॥ २६ ॥ यशोनिदानदानादि ।
ददानः स हि शोभते ॥ भुंक्ते दत्ते च यः पृथ्वी—माक्रम्य स्वपराक्रमैः ॥ २७ ॥ इति भू-
पवचः श्रुत्वा । कुमारः स्फारमत्सरः ॥ हंहो जातोऽस्मि तातस्य । निर्भाग्यो दुःखकारणं ॥
॥ २८ ॥ तत्कथं दर्शयिष्यामि । स्ववक्त्रं पितुरग्रतः ॥ यामिन्याः प्रथमे यामे । निर्जगामेति
चिंतयन् ॥ २९ ॥ उत्साहगजमारूढः । प्रौढपुण्यबलोऽचलत् ॥ क्रमेणैकस्य तुंगस्य । भूधरस्यां-
तिकं ययौ ॥ ३० ॥ तत्प्रत्यासन्नदेशेऽस्ति । पुरं जयपुराभिधं ॥ कुमारः प्राविशत्तत्र । प्रेरितः
पुण्यकर्मणा ॥ ३१ ॥ जयसेनो नृपस्तत्र । सौभाग्यतरुमंजरी ॥ तस्यास्ति रूपसंपन्ना । कन्या
कनकमंजरी ॥ ३२ ॥ पुरुषद्वेषिणी सास्ति । गवाक्षस्थितया तया ॥ अधस्तात्स व्रजन् दृ-
ष्टो । दृष्टिसंतुष्टिपुष्टिकृत् ॥ ३३ ॥ गलितः पुरुषद्वेष—स्तस्यास्तद्दर्शनादपि ॥ तृप्तिं न प्राप प-
श्यंती । तं मृगांकमिवादरात् ॥ ३४ ॥ छाययेवानुवर्तिन्या । सख्या दक्षलताख्यया ॥ लक्षि-
तः कन्यकारागः । कुमारंप्रत्यनुत्तरः ॥ ३५ ॥ कुमारोऽपि पुरं पश्यन् । कौतुकस्फारलोचनैः ॥
लोकैर्विलोक्यमानोऽगा—देकं प्रासादमुन्नतं ॥ ३६ ॥ तद्गवाक्षप्रदेशेऽस्था—त्तावद्दक्षलतापि सा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ मत्स्वामिन्या मनो हृत्वा । कुमारः कुत्र यात्यसौ ॥३७॥ एवं विचिंत्य तत्रागा—त्कुमारो यत्र तिष्टति ॥ स लात्वा खटिकां काव्यं । कर्तुमारब्धवान्नवं ॥ ३८ ॥ कुमारस्यापतद्धस्तात् । ख-व्यर्धे लिखिते सति ॥ यावत्प्रसारितस्तेन । करस्तद्ग्रहणेंबुना ॥ ३९ ॥ तावत्प्रसादन्निचित्ति-स्था । चलिता चित्रपुत्रिका ॥ आदाय च खटीखंडं । नत्वा तस्मै समार्पयत् ॥ ४० ॥ एतद्द-कुलता दृष्ट्वा । साश्चर्या निकटं ययौ ॥ वाचयित्वा च तत्काव्यं । सा सत्वरपदा मुदा ॥४१॥ आगता कन्यकापार्श्वे । स्वरूपं च निवेदितं ॥ कौतुकाकुलिता तां चा—पृच्छत्कनकमंजरी ॥ ॥ ४२ ॥ सखि यल्लिखितं तव । तेन तद्वेत्सि नाथ वा ॥ वेद्मीति कथयित्वा सा । तं श्लो-कमपठत्तदा ॥ ४३ ॥ अनीहमानोऽपि बला—द्देशज्ञोऽपि मानवः ॥ कर्मणा नीयते तत्र । यत्र तत्फलमश्नुते ॥ ४४ ॥ सा विज्ञाततदर्थाथा—वदद्दकुलतामिति ॥ सखि मन्ये फलं किंचि—त्तस्यासन्नं भविष्यति ॥ ४५ ॥ विहस्य सा सखी प्राह । किं फलांतरकल्पनैः ॥ मुख्यं त्वत्परिणयनं । फलं तस्यावगम्यते ॥ ४६ ॥ रूपलावण्यसंपन्ना । सलीला शीलशालिनी ॥ त्वत्सदृक्षा हि गृहिणी । विना पुण्यैर्न लभ्यते ॥ ४७ ॥ श्रुत्वेत्यानंदिता चित्ते । जयसेननृपा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्मजा ॥ बबंध शकुनग्रंथिं । लज्जया चानताननवत् ॥ ४८ ॥ पुरांतः प्रबलः कोऽपि । कोला-
हल उदञ्चलत् ॥ संभ्रांतनेत्रया भूप-पुत्र्या सा जणिता सखी ॥ ४९ ॥ सखि पश्य किमीदृ-
क्-मित्युक्ता सा पुरांतरे ॥ गत्वा विज्ञातवृत्तांता-गत्याचख्यौ नृपात्मजां ॥ ५० ॥ स्वामि-
न्यद्य मदोन्मत्तः । पट्टहस्ती नरेशितुः ॥ आलानस्तंजमुन्मूल्यो-पाद्रवन्निखिलं पुरं ॥ ५१ ॥
त्रासयन् सकलान् लोकान् । हट्टनित्तीश्च पाटयन् ॥ स आगात्त्वन्मनश्चौरः । कुमारो यत्र
तिष्ठति ॥५२॥ हस्तिना हस्तवीर्येण । पीड्यमानान् घनान् जनान् ॥ वीक्षमाणस्य तस्याभूत् ।
करुणा हृदयांतरे ॥ ५३ ॥ तत्क्षणं किरणं दत्वा-रुह्य सिंधुरमूर्धनि ॥ हत्वा च मुष्टिघातेन ।
वशीचक्रे स दंतिनं ॥ ५४ ॥ तत्रासीनः सशृंगारः । कुमारः सारविक्रमः ॥ ऐरावण इवारूढः
। शुशुने स सुरेंद्रवत् ॥५५॥ लोकः स्वस्थोऽजवत्तस्मिन् । शांते वाते समुद्रवत् ॥ कुमारोऽपि
परिज्ञात-स्तद्देशागतमागधैः ॥५६॥ जय कीर्तिसारभूपति-कुलजलनिधिपोषणेऽमृतकराजः ॥
अमृतयशा अमृतयशो-धवलीकृतसकलभूवलयः ॥५७॥ इत्यादि मागधैर्लोकैः । स्तूयमानः स
एष्यति ॥ इहैव त्वरितं तस्मात् । त्वां ज्ञापयितुमागमं ॥ ५८ ॥ तावत्कुमारो जितमाररूपः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समागतस्तत्र गजाधिरूढः ॥ सुरो व्रजन्मागधगीतगीत–कोलाहलापूरितदिग्विभागः ॥ ५९ ॥
क्षिपंत्यक्षिकटाक्षानि । वरमाला इवोज्ज्वला ॥ अनुरागवती कन्या–ऽनिमेषा तं व्यलोकत ॥
॥ ६० ॥ सख्या निवेदिता राज्ञ्यै । पुत्र्यास्तदनुरक्तता ॥ तयापि भूपतेरग्रे । स्वरूपं तन्निरू-
पितं ॥ ६१ ॥ कुमारमाकारयतिस्म राजा । बध्ध्वा गजं सोऽपि गजेंद्रगत्या ॥ आगत्य नत्वा
नृपतिं सभायां । दत्तासनोऽस्थाद्बहुमानपूर्वं ॥ ६२ ॥ कुमारप्रतिपत्तिं ते । को वा कर्तुं क्षमो
भवेत् ॥ परमस्मत्सुतां पाणि–ग्रहणेनानुगृहाण भोः ॥ ६३ ॥ इत्युदीर्य महावीर्य–मरकन्नर-
नायकः ॥ द्विजैरजीगणल्लग्न–माघातं तद्दिनत्रयात् ॥ ६४ ॥ अथो कनकमंजर्या । सैव दक्ष-
लता सखी ॥ कुमारस्यांतिके प्रैषि । प्रदायार्यां करांबुजे ॥ ६५ ॥ एकांते सा पुनर्गत्वा । कु-
माराय समार्पयत् ॥ तामार्यामार्यबुद्धिः स । वाचयामास तद्यथा ॥ ६६ ॥ ज्ञातः पुरुषस्नेहो
। दुःखमसह्यं ततः समनुभूतं ॥ जीवितुकामो जीवः । को जानन्नेव विषमत्ति ॥ ६७ ॥ ज्ञा-
तार्थश्चिंतयामास । जातजातिस्मृतिर्ह्यसौ ॥ पूर्वजन्मनि केनापि । पुरुषेण कदर्थिता ॥ ६८ ॥
यदेवं पुरुषद्वेष–गर्भितं वचनं जगौ ॥ अस्या आवर्जनकृते । योग्यं स्यादिदमेव हि ॥ ६९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विचिंत्येति प्रतिश्लोकं । दत्वा दक्षलताकरे ॥ प्रैषीत्साप्यार्पयत्तस्यै । वाचयामास सा यथा ॥ ॥ ७० ॥ विचित्रं चरितं पुंसां । विचित्रा कर्मणां गतिः ॥ नारीपुरुषतोयाना—मंतरं परमं भुवि ॥ ७१ ॥ तद्भावार्थं परिज्ञाय । कुमारे सा कुमारिका ॥ अनुरक्ताऽभवद्गाढं । चकोरीव निशाकरे ॥ ७२ ॥ प्राप्ते लग्नदिने संध्या—समये पाणिपीडनं ॥ तयोर्महामहःपूर्वं । भूमीपतिरचीकरत् ॥ ७३ ॥ कल्पद्रुकल्पवल्ल्योर्वा । मुद्रिकारत्नयोरिव ॥ दृष्ट्वा हृष्टैस्तयोर्योगः । कैः कैर्लोकैर्न वर्णितः ॥ ७४ ॥ स तुर्ये वासरे प्रौढ—प्रेमाढ्यां प्रेयसीं जगौ ॥ त्वत्प्रेषितायाः आर्याया । भावार्थं कथय प्रिये ॥ ७५ ॥ आह सा श्रूयतां स्वामिन् । सावधानेन चेतसा ॥ पुर्यस्त्यत्र घनद्रव्य—संचया धनसंचया ॥ ७६ ॥ तत्र वेदरुचिर्विप्रो । वेदश्रीस्तस्य गेहिनी ॥ भुंजानौ विषयानेतौ ।दंपती तिष्टतः सुखं ॥ ७७ ॥ परोपकारिणी शील—सौरभ्यसहितापि सा ॥ परं दैववशाज्जज्ञे । निष्फला चंदनद्रुवत् ॥ ७८ ॥ पृष्ट्वा वेदश्रियं वेद—रुचिः संतानहेतवे ॥ पर्यणैषीन्मनोज्ञांगीं । कन्यकां विनयश्रियं ॥ ७९ ॥ विनयादिगुणै रूप—श्रिया च विनयश्रिया ॥ आवर्जितो द्विजो जज्ञे । तस्या एव वशंवदः ॥ ८० ॥ वेदश्रीः कुरुते गेहे । कर्म कर्मक-

P.P. Ac. Gunratnasuri M.S. Jun.Gun Aaradhak Trust

रीव सा ॥ परं वहति विद्वेषं । सपत्न्यां न मनागपि ॥ ७१ ॥ आद्या निर्धाव्यते गेहा—त्तदा निःकंटकं नवेत् ॥ द्वितीया चिंतयंतीति । गमयामास वासरान् ॥ ७२ ॥ सा परिव्रा-जिकामेका—मन्यदा मंदिरागतां ॥ घृतमोदकदध्यादि—निक्षादानादमोदयत् ॥ ७३ ॥ मुदिता साप्युवाचैवं । वत्से स्वझमते त्वया ॥ किंचिदस्मादृशं कार्यं । कथनीयं निरर्गलं ॥ ॥ ७४ ॥ विनयश्रीस्ततोऽवादी—द्भगवत्येवमस्ति चेत् ॥ तदा साद्यं त्वया देयं । कूटास्वपि मदुक्तिषु ॥ ७५ ॥ निःशूकहृदया सापि । प्रतिपद्यास्पदं ययौ ॥ विनयश्रीस्तु शय्यायां । सुप्तं स्वस्वामिनं जगौ ॥ ७६ ॥ इतः पत्युरपायस्यो—पेक्षणं पातकं महत् ॥ इतश्च परमो दोषः । परदूषणकीर्तनं ॥ ७७ ॥ तन्नाथ किमु कुर्वेऽह—मितो व्याघ्र इतस्तटी ॥ तथाप्यकृत्रिमः स्नेहो । मां प्रेरयति जल्पने ॥ ७७ ॥ नाथ वेदश्रिया चक्रे । कार्मणं तत्तवोपरि ॥ यस्मिन् विघटिते नूनं । मानवो म्रियते क्षणात् ॥ ७ए ॥ यदि प्रत्येषि मां न त्वं । पृच्छ प्रव्रजितां तदा ॥ इति श्रुत्वा वेदरुचिः । पप्रच्छाकार्यतामिति ॥ ए० ॥ जगवत्यनया वेद—श्रिया किं कार्मणं कृतं ॥ सम्यक् त्वं वेत्सि किं वा नो । तयोक्तं कृतमेव हि ॥ ए१ ॥ इति श्रुत्वा च वे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दश्रीः । कोपारुणितलोचना ॥ ऊचे हास्यसे कस्मा–त्पार्श्वस्थिनि भवद्वयं ॥ ९२ ॥ भृकुटी-
भीषणीभूय । साप्यूचे रे कुकर्मकृत् ॥ हास्यामि कथं लोक––द्वयं सत्यं वदंत्यपि ॥ ९३ ॥
अलं पापजनालापैः । स्थानं भगवति व्रज ॥ इत्युक्त्वा सा ततः स्थाना–दुत्थाय स्वाश्रयं
ययौ ॥ ९४ ॥ कुकर्मकारिणि पापे । प्रत्यक्षा राक्षसी ह्यसि ॥ मद्गृहे न प्रवेष्टव्य–मितो
द्रोहपरायणे ॥ ९५ ॥ एवं निर्भर्त्स्य वेदश्रीः । पत्या निर्धाटिता गृहात् ॥ सांप्रतं कुत्र गच्छा-
मि । कलंकेन कलंकिता ॥ ९६ ॥ मरणं शरणं तस्मा–च्चिंतयित्वेति चेतसि ॥ पपात तटि-
नीपूरे । बलाज्जलसमाकुले ॥ ९७ ॥ तावत्तत्रागतासन्न–ग्रामनाथेन केनचित् ॥ पतंती त-
त्र सा दृष्टा । करुणापूर्णचेतसा ॥ ९८ ॥ जनान् प्रक्षिप्य नद्यंत–राकृष्यानीय तां तटे ॥
प्रगुणीकृत्य सोऽवादी–द्भद्रे किं कृतमीदृशं ॥ ९९ ॥ तयोक्तमसद्दोषाधि–रोपोत्थं सद्गुणा-
पहं ॥ दुःखं च सहते भो धिक् । कियन्मानवमानसं ॥ १०० ॥ अभाणि ग्रामनाथेन । किं
तद्दुःखं तवाभवत् ॥ ततो वेदश्रिया सर्वं । स्वस्वरूपं निरूपितं ॥ १ ॥ त्वं मेऽसि भगिनी-
त्युक्त्वा । तेन नीता निकेतनं ॥ यथा सुखं स्थिता तत्र । धर्मध्यानपरायणा ॥ २ ॥ अन्ये-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युरागतस्तत्र । ज्ञानी ज्ञाननिधिर्मुनिः ॥ पृष्टो वेदश्रिया नत्वा । नवांतरमुवाच सः ॥ ३ ॥
पुरे गजपुरे राजा । विलासरुचिरित्यनूत् ॥ रतिप्रीती स्मरस्येव । तस्यास्तां वल्लने उने ॥
॥ ४ ॥ आद्या गुणमती तत्र । द्वितीया नानुमत्यभूत् ॥ तान्यां च स्वस्वगेहाग्रे । कारिते
जिनमंदिरे ॥ ५ ॥ तुल्येन विधिना ताभ्यां । पूजा तत्र विधीयते ॥ यौवनस्था नानुमती ।
नर्तुर्मानेन गर्विता ॥ ६ ॥ द्वेषादन्यवारयत्पूजां । गुणमत्या जिनालये ॥ तद् ज्ञात्वा भूनुजा-
नाणि । मुग्धे पापं करोषि किं ॥७॥ जिनेंद्रा हीलिताः सर्वे-ऽप्येकस्मिन्नवहीलिते॥ एकस्मि-
न् पूजिते सर्वे । पूजिताः स्युर्यतः प्रिये ॥ ८ ॥ बहुद्रव्यव्ययेनापि । समत्सरतया कृता ॥
नवेत्पूजा जिनेंद्राणां । निष्फला शरदभ्रवत् ॥ ९ ॥ नानुमत्या ततोऽनाणि । कार्मणेन. व-
शीकृतः ॥ गुणमत्यानया यस्मा-देकपक्षं वदस्यदः ॥ १० ॥ इति श्रुत्वा गुणमती । दूनात्यंतं
स्वमानसे ॥ तत्प्रत्ययं तया बद्धं । दुष्टं कर्म निकाचितं ॥ ११ ॥ ततो राज्ञा च राज्ञीन्यां ।
श्राद्धधर्मं विनिर्ममे ॥ मृत्वा नानुमतीजीवः । किल्बिषीयेष्वजायत ॥१२॥ आयुःक्षयात्ततश्च्यु
त्वा । वेदश्रीस्त्वमभूरिह ॥ सौधर्मदेवलोकेऽपि । जातो गुणमती सुरः ॥१३॥ ततश्च्युत्वा सपत्नी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ते । विनयश्रीरजायत ॥ तया प्रतिकृतं तस्मा–द्भवेऽस्मिंस्तव सांप्रतं ॥ १४ ॥ इति श्रुत्वा जातिस्मृत्वा । स्मृत्वा पूर्वभवं तदा ॥ प्रतिपद्यार्हतं धर्मं । वेदश्रीः स्वाश्रयं ययौ ॥ १५ ॥ दयादानादि दत्वा सा । मृत्वोत्पन्नाहमत्र भोः ॥ सपत्न्योः कलहं दृष्ट्वा । दृष्टपूर्वभवाभवं ॥ ॥ १६ ॥ पुरुषेषु समस्तेषु । मम द्वेष उदज्वलत् ॥ चकोर्या इव तीक्ष्णांशौ । तेनार्या प्रेषिता मया ॥१७॥ श्रुत्वेत्यमृतयशसः । कुमारस्य विपश्चितः ॥ मूर्छानीलितनेत्रस्य । जाता जातिस्मृतिः क्षणात् ॥१८॥ किमेतदिति संभ्रांता । वातक्षेपं चकार सा ॥ कुमारः प्रगुणीभूत–स्तामुवाच प्रिये शृणु ॥१९॥ स एव ग्रामनाथोऽहं । दयाधर्मानुभावतः ॥ इहेदृशीं श्रियं लेभे । जाने जातिस्मृतेरिति ॥२०॥ उक्तं कनकमंजर्या । स्वामिन्नवितथं ह्यदः ॥ गलितः पुरुषद्वेषो । यतस्त्वदर्शनान्मम ॥२१॥ नेत्राणि ज्ञानवंतीव । सर्वेषामपि देहिनां ॥ विकसंति प्रिये दृष्टे । निर्मीलंत्यप्रिये पुनः ॥२२॥ कृतसंध्याविधातव्यः । क्रीडित्वा प्रियया समं ॥ सोऽस्वपत्सजशय्यायां । वारिधाविव केशवः ॥२३॥ अर्धरात्रौ कुमारेण । जाग्रता भित्तिचित्रितः ॥ हयः सजीववज्जात । उत्तरन् भित्तिदेशतः ॥२४॥ धुन्वन् श्रुतियुगं पुच्छा–च्छोटं कुर्वन् विलोकितः ॥ पश्यामि किमिदं स्वप्न–

P.P. Ac. Gunratnasuri M.S.　Jun Gun Aaradhak Trust

मित्यभूत्स सविस्मयः ॥ २५ ॥ युग्मं ॥ तावदश्वेन तेनैव । नीयमानं नभोंगणे ॥ कुमारोऽप-
श्यदात्मानं । कौतुकाकुलिताशयः ॥ २६ ॥ बहु व्योम समुल्लंघ्यो–त्ततार तुरगो वने ॥ कु-
मारश्च हयात्तस्मा–त्तुरगश्च तिरोहितः ॥ २७ ॥ क्षणांतरे कुमारेण । ददृशे तत्र तापसी ॥
हरंती तामसं तस्या । रवेरिव नवद्यविः ॥ २८ ॥ आगत्य सा कुमारस्य । संनिधावभ्यधा-
दिति ॥ वत्स चित्रं न कार्यं यत् । सर्वं संभवति क्षितौ ॥ २९ ॥ कृत्वानुग्रहमागच्छ–सन्नेऽ-
स्मिन् देवमंदिरे ॥ सर्वं व्यतिकरं येन । कथयामि त्वदग्रतः ॥ ३० ॥ तया दर्शितमार्गोऽथ ।
धैर्याश्चर्यप्रमोदभाक् ॥ प्रदीप्ररत्नदीपाढ्यं । प्रासादं प्रविवेश सः ॥ ३१ ॥ स्वर्णासनोपविष्टां
तां । तापसीं प्रणनाम सः ॥ स्वयं चोपाविशत्तत्र । दत्तरत्नासनस्तया ॥ ३२ ॥ तत्र मन्मथ-
मूर्त्यग्रे । संयोजितकरांबुजां ॥ राजहंसीं कृतध्यानां । स ददर्श सितच्छदां ॥ ३३ ॥ पप्रच्छ ता-
पसीं केयं । मानवीव मरालिका ॥ ध्यानं करोति देवाग्रे । तयोक्तं श्रूयतामिदं ॥३४॥ तथा-
हि–पुरे जयपुरे राजा । जज्ञे संग्रामसागरः ॥ रूपेण सुंदरी राज्ञी । तस्याभूज्जयसुंदरी ॥
॥ ३५ ॥ विजयस्तनयस्तस्या–स्तया जाताम्यदा सुता ॥ सूतिरोगान्मृता माता । संजाता व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नयकिर्णा ॥ ३६ ॥ धात्र्याश्च विमालाख्यायाः । पित्रा पुत्री समर्पिता ॥ बाला तस्यां प्रम-
त्तायां । मार्जार्यापहृतान्यदा ॥ ३७ ॥ स दृष्टाशु शुनैकेन । स्वामिभक्तेन तत्क्षणं ॥ तस्याः
पृष्टे दधाव श्वा । कृतांत इव भीषणः ॥ ३८ ॥ मुखे कन्यां गृहीत्वा तां । पृष्टमत्यजता शु-
ना ॥ त्रास्यमाणा भयोद्भ्रांता-ऽरण्ये मार्जारिका ययौ ॥ ३९ ॥ तत्रापि पृष्टलग्नेन । तेना-
क्रांतेव साभवत् ॥ ततो मुक्त्वा मुखात्कन्यां । नष्टा सा काननांतरे ॥ ४० ॥ नश्यंतीं तरु-
गहने । गृहीत्वा कुपिताशयः ॥ कृतापराधां तां स श्वा । स्वामिभक्तो व्यनाशयत् ॥ ४१ ॥
भटवत्कृतकार्योऽसौ । रुधिरारुणिताननः ॥ प्रत्यागतो विमलया । दृष्टश्चकितया तया ॥ ४२ ॥
कन्यां विलोकयामास । सा सर्वत्र गृहांतरे ॥ हृदयं ताडयामास । पश्यंती नष्टरत्नवत् ॥
॥ ४३ ॥ व्याकुला चिंतयामास । नूनं दुष्टशुनामुना ॥ भक्षिता सा कथमसा—वन्यथा रु-
धिरारुणः ॥ ४४ ॥ नदीनारीनरेंद्राणां । नागानां च नियोगिनां ॥ नखिनां च न विश्वासः ।
कर्तव्यः शुभमिच्छता ॥ ४५ ॥ छुटिष्यामि कथं दैव । जीवंती तत्पितुः पुरः ॥ उत्तरं किं प्र-
दास्यामि । तद्भ्रातुर्विजयस्य च ॥ ४६ ॥ तन्मे मरणं शरण-मथवेतः पलायनं ॥ विचिंत्ये-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्तिं रुषा श्वानं । मुशलेन जघान तं ॥ ४७ ॥ जयश्रीता पुरान्नष्टा । सा जगाम महावने ॥ एकथा वेश्यया त्यक्तां । बालां तत्र ददर्श सा ॥ ४८ ॥ भूपकन्यानुरूपां तां । रूपलावण्यशालिनीं ॥ दृष्ट्वा सा मुदिता चित्ते । तामगृह्णान्निधानवत् ॥ ४९ ॥ करयोः संपुटे कृत्वा । तत्र केनाप्यलक्षिता ॥ सागत्य पालयामास । नृपपुत्रीमिवादरात् ॥ ५० ॥ ततः सा वर्धते तत्र । नलिनीव सरोवरे ॥ विजयेति कृतं तस्या । अभिधानं नृपादिभिः ॥ ५० ॥ सुताथ जयसुंदर्या । मार्जार्याः पतिता मुखात् ॥ रोदितिस्म सचीत्कारा । ह्यरण्ये शरणोज्झिता ॥ ५१ ॥ तत्पुण्यप्रेरिता तत्रा—गता कुर्वती क्रीडनं ॥ अद्राक्षीद्रुदतीं बालां । यक्षिणी जयसुंदरी ॥ ॥ ५२ ॥ तां दृष्ट्वा करुणापूर्णा । चिंतयामास कास्त्यसौ ॥ अवधिज्ञानतो ज्ञात्वा । स्वपुत्रीं स्नेहलालनवत् ॥ ५३ ॥ मानवीरूपमाधाय । स्तन्यपानमचीकरत् ॥ शुश्रूषयति तां नित्य—मपत्यस्नेहविह्वला ॥ ५४ ॥ पालिता जयसुंदर्या । त्यक्तदिव्यांगभोगया ॥ सा सप्तवार्षिकी जज्ञे । खेलंती मृगबालकैः ॥ ५५ ॥ आसन्नश्रीपुरस्वामी । श्रीधरो भूधरोऽन्यदा ॥ आखेटककृते प्राप—दरण्ये तत्र शत्रुवत् ॥ ५६ ॥ निहंतुं हरिणान् बाणा—नारुरोप स कोपवान् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चापे भूपो यदा ताव —द्यक्षिणीति व्यचिंतयत् ॥ ५७ ॥ हरिणेक्षणया साकं । मत्पुत्र्या
हरिणा इह ॥ क्रीडंति स्वेछया तन्मे । समे पुत्रसमा इमे ॥ ५८ ॥ अकृपो नृपः एतांस्तान्
हंति हिंसापरायणः ॥ रक्षामि तन्मृगान्मृत्यो—र्मृगयातश्च मर्त्यपं ॥ ५९ ॥ एवं विचिंत्य रा-
जेंद्र—परिधौ सर्वतः कृतः ॥ तया वज्रमयः कोट्टो—ऽप्रकटश्चर्मचक्षुषां ॥ ६० ॥ यदंतर्वर्तिना
पुंसा । वस्तुजालं बहिर्गतं ॥ अतिरोहितवत्सर्वं । दृश्यते दृष्टिगोचरं ॥ ६१ ॥ हरिणांश्चवतो
हंतुं । भूपश्चिक्षेप मार्गणं ॥ व्याजुघोट तदैवैषो—ऽकृतकृत्यः कुभृत्यवत् ॥ ६२ ॥ अपश्यन्नंतरा
किंचि—द्व्यावृत्तं च शरं निजं ॥ पश्यन् स विस्मयात्तीव्र—रयं हयमचालयत् ॥ ६३ ॥ कोट्ट-
भित्तौ सज्ञाद्धारे । हयो मूर्ध्नि हतस्ततः ॥ करस्पर्शेन राज्ञा स । विज्ञातः सर्वतः स्थितः ॥
॥ ६४ ॥ वज्रपंजरनिक्षिप्त— सिंहवद्द दुःस्थितः स्थितः ॥ नृपस्तत्र क्षुधातृष्णा—पीडितः पंच
वासरान् ॥ ६५ ॥ अचिंतयच्च पापर्द्धि—पापपादप एष मे ॥ पुष्पितोऽस्त्यधुना भावि । फलं
नरकवेदना ॥ ६६ ॥ योजयित्वा करौ राजा । बभाण विनयानतः ॥ या काचिद्देवता रुष्टा ।
सुप्रसन्नास्तु सा मयि ॥ ६७ ॥ श्रुत्वेति तत्क्षणं तस्य । प्रत्यक्षीभूय यक्षिणी ॥ आचख्यौ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नृप पापर्द्धि—व्यसनं न तवोचितं ॥ ६८ ॥ रसातलं गच्छतु पूरुषाणां । तत्पौरुषं यद्धरणादि-केषु ॥ अपापराधेषु वनस्थितेषु । जीवेषु पर्णाशिषु निर्दयेषु ॥६९॥ वरमंधो वरं पंगु—र्वरं रोगी नरः परं ॥ आत्मतृप्तिकृते जंतून् । निघ्नतो निर्घृणो जनः ॥ ७० ॥ उक्तं नृपेण देव्येव—मेवैतन्नात्र संशयः ॥ अद्यप्रभृति पापर्द्धे—राजन्म नियमो मम ॥ ७१ ॥ तयोक्तं तव सत्त्वेन । तुष्टाहं पुरुषोत्तम ॥ वद चित्तेप्सितं यत्ते । तन्मया पूरयिष्यते ॥७२॥ राज्ञोक्तं देवि मे ना-न्य—दीप्सितं तव दर्शनात् ॥ परमेतस्य कोष्टस्य । परिवेषो निवर्त्ततां ॥ ७३ ॥ तयोक्तं तन्नि-वृत्तं ते । पापस्यैव निवृत्तितः ॥ अन्यदन्वीक्ष्यते यत्ते । तत्तथार्थय पार्थिव ॥ ७४ ॥ राज्ञोक्तं त्वत्प्रसादेन । राज्यराष्ट्रसुतादिकं ॥ समस्तं विद्यते देवि । परमेकापि नो सुता ॥ ७५ ॥ प-रोपयोगिनीं पुत्रीं । फलालिमिव मे विना ॥ पुत्रपलाश्रितस्यापि । वृक्षस्येव निरर्थता ॥७६॥ तत्प्रसीद महादेवि । सुतामेकां प्रदेहि मे ॥ श्रुत्वेति यक्षिणी स्वीयां । सुतां तामनयत्पुरः ॥७७॥ निवेश्य भूपतेरंके । प्राह सा साश्रुलोचना ॥ निजांगजाधिका ज्ञेया । कन्येयं मम व-ल्लभा ॥ ७८ ॥ अस्या हि मन्मनोल्लापै—र्मन्मनो रज्यते घनं ॥ परं त्वत्प्रार्थनाद्भंग—भी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तितो प्रदिशाम्यहं ॥ ७९ ॥ महाप्रसाद इत्युक्त्वा । राज्ञा सा कन्यिकाददे ॥ तिरोऽभूद्य-
क्षिणी राजा । जगाम च निजं पुरं ॥ ८० ॥ पुत्रीजन्मोत्सवं कृत्वा । कृता वनलतान्निधा ॥
आज्ञा राज्ञा च राज्ञीभ्य–स्तत्पालनकृते ददे ॥ ८१ ॥ नरेंद्रदेवीन्निरमत्सरान्नि–स्तुल्येन वा-
त्सल्यजलेन सिक्ता ॥ सावर्धत श्रीधरभूपगेहे । सुपर्ववल्लीव सुपर्वशैले ॥ ८२ ॥ अजानता
नरेंद्रेण । यौवनस्थाथ सा सुता ॥ तद्बंधुनैव विजय–कुमारेण विवाहिता ॥ ८३ ॥ विन्नूतिं
महतीं दत्वा । विसृष्टो भूभुजाथ सः ॥ आजगाम निजं धाम । नार्यावनलतायुतः ॥८४॥ सं-
ग्रामसागरो राजा । जहर्ष सह नागरैः ॥ अनुरूपरूपवंतौ । दंपती तौ विलोकयन् ॥ ८५ ॥
यत्कृतं न्नगिनीन्नात्रो–र्विधात्रा पाणिपीडनं ॥ मन्ये तेनैव पापेन । स जनादृश्यतां गतः ॥
॥ ८६ ॥ अत्रांतरेऽवधिज्ञाना–द्यक्षिणी जयसुंदरी ॥ सुखिता दुःखिता वा मे । दुहितास्ती-
त्यलोकत ॥८७॥ परिणीतां सुतां न्नात्रा । दृष्ट्वा कष्टं चकार सा ॥ चित्ते चाचिंतयद् न्नान्त्यां ।
। कुतो नाद्यापि संगमः ॥ ८८ ॥ बोधयाम्यधुना तेन । गत्वाहं त्वरिता सती ॥ एवं विचिंत्य
संध्यायां । सागाद्वनलतागृहे ॥ ८९ ॥ कृत्वा रूपं परपुंसः । स तस्थौ तत्र न्नर्तृवत् ॥ ताव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुमार आयातः । स्फारश्रृंगारधारकः ॥ ए० ॥ दृष्ट्वाग्रे परपुरुषं । रुषारुणितलोचनः ॥ उवाच कोऽसि रे मूर्ख । मुमूर्षो मद्गृहांतरे ॥ ए१ ॥ कस्त्वं किमर्थमायासि । मद्गृहे ग्रहिलोऽसि किं ॥ रे जार नृपपुत्रोऽहं । जोगान् जोक्तुमिहागमं ॥ ए२ ॥ कया स्त्रिया समं जोगान् । जोक्तुमत्रागतोऽसि किं ॥ जार्यां वनलतामेतां । किमंध न हिं पश्यसि ॥ ए३ ॥ रे जात्यंध जगिनीं स्वां । जार्यां जल्पन्न लज्जसि ॥ इति श्रुत्वा कुमारोऽथ । चित्तेऽत्यंतं चमत्कृतः ॥ ॥ ए४ ॥ विजायो जायते प्रायः । प्रविष्टः परमंदिरे ॥ राजापि च यथा चंद्रो । दिने दिनकरालये ॥ ए५ ॥ अयं सहायकायस्तु । निर्जीकः सन् वदत्यदः ॥ तन्मन्येऽसौ न सामान्यो । दिव्यरूपोऽस्तिदृकश्चन ॥ए६॥

एवं विचिंत्य चित्तांतः । कुमारः प्राह तंप्रति ॥ जोः सत्पुरुष जगिनी । कथमेषा जवेन्मम ॥ ए७ ॥ एकैव जगिनी मेऽस्ति । विजया जयशालिनी ॥ एतां तु परिणीयाहं । समागां श्रीपुरात्पुरा ॥ ए८ ॥ विधाय जयसुंदर्या । रूपं तत्क्षणमेव हि ॥ सर्वं स्वरूपमाख्यायि । यक्षिण्या दक्षिणोक्तिजिः ॥ एए ॥ प्रत्यक्षां जननीं दृष्ट्वा । हर्षशोकाकुलाशयौ ॥ पुत्रपुत्र्यौ स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मागत्य । विलग्ने कंठकंदले ॥ २०० ॥ ज्ञात्वा व्यतिकरं राजा । तत्रागाद् रुदतीं सुतां ॥ आ-
रोप्यांके समाश्वास्य । शस्यास्यामित्यबूबुधत् ॥ १ ॥ अन्यथा चिंत्यते कार्य—मन्यथा कुरुते
विधिः ॥ दुर्निवारः सुते दैव—व्यापारः किं विधीयते ॥ २ ॥ इत्यादिवचनैः पित्रा । सल-
ज्जेन च बंधुना ॥ उक्ता सा विषयान् मुक्त्वा । तापसं व्रतमग्रहीत् ॥ ३ ॥ यक्षिणी कृतकृ-
त्याथ । ततः स्वस्थानमासदत् ॥ प्रपाल्य तापसीं दीक्षां । मृत्वा वनलता ततः ॥ ४ ॥ उ-
दपेदे कमलध्वज—भूभुजो मंदिरे सुतात्वेन ॥ कलहंसीति च तस्या । विनिर्ममे नाम ज-
नकेन ॥ ५ ॥ प्राप्ता क्रमेण वृद्धिं । निदाघकाले समुद्रवेलेव ॥ उद्यौवना जनन्या । प्रहिता
सा नृपतेः पार्श्वे ॥ ६ ॥ अंके निवेश्य तां राजा । चित्ते चिंतातुरोऽभवत् ॥ तावन्नैमित्तिकः
कोऽपि । तत्रागच्छदतर्कितः ॥ ७ ॥ सत्कृत्य भूभुजा पृष्टो । वद नैमित्तिकोत्तम ॥ अस्याः सु-
तायाः को भावि । कुमारः प्रवरो वरः ॥ ८ ॥ निमित्तज्ञानमालोक्य । तेनैवमुदितं मुदा ॥
मणितोरणपूःस्वामि—कीर्तिसारनृपात्मजः ॥ ९ ॥ भाविचक्रपदो भावी । वरोऽमृतयशास्तव
॥ पुत्रिकाया महाराजे—त्युक्त्वा स स्वाश्रयं ययौ ॥ १० ॥ कलहंस्यामृतयशा । वव्रे स्वामी

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

सचेतसा ॥ तमेव स्मरति स्वांते । कलहंसीव मानसं ॥ ११ ॥ कीर्तिसारनृपस्यांते । कुमारानयनार्थिना ॥ प्रेषिताः सेवकाः सैवाः । कमलध्वजभूभुजा ॥ १२ ॥ तैर्गत्वा कीर्तिसारस्य । स्वरूपं तन्निवेदितं ॥ शल्ये प्रचालित इव । सोऽत्यंतं दुःखितोऽभवत् ॥ १३ ॥ विललाप महीपालो । गृह्णन् पुत्रगुणान् मुखे ॥ उदश्रुनयनः प्राह । धैर्यं धृत्वा क्षणांतरे ॥ १४ ॥ उत्पद्य मद्गृहे क्षीर-नीरधाविव निःसृतः ॥ क्वचित्स्थानांतरे सोम । इवासौ शोभतेऽधुना ॥ १५ ॥ मद्भृत्यैर्नित्यमुद्युक्तै—र्देशे देशे विलोकितः ॥ समुद्रपतितं रत्न—मिव लेभे न कुत्रचित् ॥ १६ ॥ अथ पुण्यानुभावेन । स चेदिह समेष्यति ॥ कमलध्वजभूभर्तु—रुक्तं तर्हि करिष्यते ॥ १७ ॥ इत्युक्त्वा तेन भूपेन । विसृष्टैस्तैः समागतैः ॥ कमलध्वजराजस्य । स्वरूपं तन्निवेदितं ॥ १८ ॥ प्रेष्य प्रेष्यैर्निजैः सोऽपि । सर्वदेशेष्वदर्शयत् ॥ परं कुमारवार्तापि । न केनचिदुदाहृता ॥ १९ ॥ कलहंसी स्वरूपं तत् । श्रुत्वा दुःखादचिंतयत् ॥ धिग्मां यन्मद्भाग्येन । कुमारोऽपि न लभ्यते ॥ २० ॥ उद्यौवनां पिता कन्यां । गृहे न स्थापयिष्यति ॥ प्रार्तोऽमृतयशा नो त—न्मामन्यस्मै प्रदास्यति ॥ २१ ॥ कायेन मनसा वाचा । वल्लभो मे स

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एव हि ॥ तस्मात्प्राणप्रियाभावे । प्राणत्यागो ममोचितः ॥ २२ ॥ एवं विचिंत्य संध्यायां । जनैः कैश्चिदलक्षिता ॥ निर्गत्य नगरात्प्राप । कलहंसी वनांतरे ॥ २३ ॥ विहायाभृतयशसं । नेदेहमपरं वरं ॥ स चास्मिन् मे भवे नाभू–द्यो भूयाद्भवांतरे ॥ २४ ॥ इत्युक्त्वा वृक्षशाखाया–मारुह्य कंठकंदले ॥ पाशं दत्वा निरालंबं । निजं देहं मुमोच सा ॥ २५ ॥ तावज्झटिति सापश्य–द्धस्यप्रासादसंस्थितं ॥ आत्मानं विस्मिता जज्ञे । ततस्तरलितेक्षणा ॥ २६ ॥ तावत्तत्र स्फुटीभूय । यक्षिणी जयसुंदरी ॥ कलहंसीमुवाचैवं । चंचलकुंडलमंडला ॥ २७ ॥ वत्से न विस्मयः कार्यो । मनस्तापोऽपि नो मनाक् ॥ भवांतरस्य माताहं । त्वदीया जयसुंदरी ॥ २८ ॥ पाशं छित्वा मयैतस्मिन् । प्रासादे त्वं निवेशिता ॥ भवांतरस्य वृत्तांतः । सर्वस्तस्या निवेदितः ॥ २९ ॥ श्रुत्वा भवांतरं जात–जातिस्मृत्या विलोक्य च ॥ स्वयं सा प्राह हे मातः । सत्यमेतत्त्वयोदितं ॥३०॥ एषा प्राहियते बाला–सुरविद्याधरादिभिः ॥ कलहंसीति यक्षिण्या । कलहंस्येव निर्ममे ॥ ३१ ॥ भो कुमार महाभाग । साहमेवास्मि यक्षिणी ॥ एषा हंसीव सा कन्ये––त्युक्त्वा सा देवताभवत् ॥ ३२ ॥ कुमारस्तां पुरो दृष्ट्वा । चिंतयामा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स विस्मितः ॥ यत्पिबंति सुधा देवाः । किमस्या रूपमेव तत् ॥ ३३ ॥ पुनः सा यक्षिणी प्राह । कुमार त्वद्वियोगतः ॥ एषा तिष्ठति कष्टेन । पद्मिनीव दिनात्यये ॥ ३४ ॥ ततः कृपापरा साहं । त्वामानेतुं समागमं ॥ पुरे जयपुरे यत्र । प्रासादांतः स्थिते त्वयि ॥ ३५ ॥ त्वं तमपहर्तुं सा–धिष्टिता चित्रपुत्रिका ॥ पतितां खटिकां हस्ते । दत्वा तुभ्यं ननाम या ॥ ॥ ३६ ॥ चिंतितं च मया तत्र । कुमारे सांप्रतं हृते ॥ नूनं कनकमंजर्या । महद्दुःखं भविष्यति ॥ ३७ ॥ विचिंत्येति स्थिता तत्र । व्यतीते पाणिपीडने ॥ सांप्रतं तुरगरूपं । कृत्वा त्वाहमिहानयं ॥ ३८ ॥ तन्नोः कुमार करुणां । कृत्वात्यंतानुरागिणीं ॥ परिणीय कुरुष्वैतां । प्रमोदभरमेदुरां ॥ ३९ ॥ आज्ञापयति यद्देवी । कुमारेणेति जल्पिते ॥ यक्षिण्या कलहंसी सा । स्वभावस्था विनिर्मिता ॥४०॥ परिजनसहिताभिर्यक्षिणीप्रेरिताभि—स्तदुपकृतियुताभिर्निर्मितो देवताभिः ॥ द्रुतमजनि विवाहो व्यूढहर्षप्रवाहो । नृपतिसुतकुमार्योः स्मेरितस्वर्गनार्योः ॥४१॥ अतृप्तनयना देव्यः । पश्यंत्यस्तौ वधूवरौ ॥ स्वचक्षुरनिमेषित्वं । सफलं तत्र मेनिरे ॥४२॥ पूर्वपुण्यप्रभावेण । वशीकृतजगत्त्रय ॥ कुमार प्रतिपत्तिं ते । कां कुर्यान्मादृशो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जनः ॥ ४३ ॥ तथापि पठितसिद्धां । गृहाणानुगृहाण मां ॥ आकाशगामिनीं विद्यां । तथा च बहुरूपिणीं ॥ ४४ ॥ इत्युक्त्वा जयसुंदर्या । यक्षिण्या नृपसूनवे ॥ ददे विद्याद्वयं सोऽपि । जगृहे बहुमानयन् ॥ ४५ ॥ यक्षिणी सपरिवारा । जगाम निजमाश्रयं ॥ कुमारोऽपि स्मरंस्तस्याः । क्षणं तस्थावधोमुखः ॥ ४६ ॥ मातृशोकाकुलां बालां । गलन्नेत्रजलाविलां ॥ क्व दृश्यसे पुनर्मात–र्वत्सलेति विलापिनीं ॥ ४७ ॥ कथंचिद्बोधयामास । कुमारस्तां मृदूक्तिभिः ॥ क्रीडंतौ तदहोरात्रं । दंपती तत्र तस्थतुः ॥ ४८ ॥ अत्रांतरे दिवाधीश । आगाद् द्वीपांतरादृभुवः ॥ अंशुकैः पूरयन्नाशा । नार्यांया इव सत्पतिः ॥ ४९ ॥ प्रियां प्राह कुमारोऽथ । क्व ते जिगमिषा प्रिये ॥ आह सा नाथ मत्पित्रो—र्दर्शनं देहि दुःखहृत् ॥ ५० ॥ आकाशगामिनीं विद्यां । स्मृत्वा स प्रियया सह ॥ प्रतस्थे कनकपुरं—प्रत्यप्रतिमभाग्यवान् ॥ ५१ ॥ गच्छन्नभोंगणेऽधस्ता—त्कामिन्याः काननांतरे ॥ एकस्या अशृणोत् श्रुत्या । कुमारः करुणस्वरं ॥ ५२ ॥ तात त्राहि सवित्रि मे कुरु कृपां हे बांधवा बंधवः । सारां मे कुरुताथवा किमपरैरेको मदीयो वरः ॥ भूमीमंडलमंडनं नरपतिश्रीकीर्तिसारात्मभूः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। कीर्त्यापूरितविष्टपोऽद्भुतयशाः पायादपायादितः ॥ ५३ ॥ विलपंतीमिति श्रुत्वा । बालां तां विस्मिताशयः ॥ उत्ततार नगोदेशा—त्कुमारस्तत्र कानने ॥ ५४ ॥ गच्छन् शब्दानुसारेण । ददर्शोन्नतमग्रतः ॥ प्रासादं प्राविशत्तत्र । नेत्रप्रीतिकरेऽथ सः ॥ ५५ ॥ तस्मिन्नादिजिनेंद्रस्य । प्रतिमाप्रतिमाकृतिः ॥ उच्छलद्भक्तिभारेण । कुमारेण नमस्कृता ॥ ५६ ॥ राजद्राज्यभरं सुदुर्वहतरं श्रीधर्मभारं तथा । वोढुं प्रौढतमौ क्षमौ महितले नान्यां समः कश्चन ॥ एतद् ज्ञापनहेतवे कचमिषाद्धात्रा स्फुरद्रेखया । स्कंधौ यस्य सुरेखिताविव स वः श्रीमारुदेवः श्रिये ॥ ५७ ॥ इति स्तुत्वा जिनं भक्त्या । प्रासादांतर्विलोकयन् ॥ सोऽपश्यत्पंजरक्षिप्तां । शुकीमेकां विलापिनीं ॥ ५८ ॥ एषा शुकी कथं नारी—वैवं जल्पति दुःखिता ॥ मन्नाम च कथं वेत्ति । विस्मयादिति चिंतयन् ॥ ५९ ॥ जिनालयैकदेशे तां । कलहंसीं निवेश्य सः ॥ शुकीसमीपमायासी—द्दर्शनात्तां प्रमोदयन् ॥ ६० ॥ कुमारं भाषतेस्माशु । सा रुदत्यपि सत्तम ॥ तवाद्य पंजरक्षिप्ता । प्रतिपत्तिं करोमि कां ॥६१॥ येन किंचिन्न कार्यं स्या—दस्मिन्नपि गृहागते ॥ उत्तमा आसनं दद्युः । स्वशीर्षमपि हर्षतः ॥ ६२ ॥ त्वयि दृष्टे दिने-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

शान्ते । मामकं मानसांबुजं ॥ यदियर्त्ति विकाशं त–न्मन्येऽमृतयशा नवान् ॥ ६३ ॥ अन्यच्च
वाममेतन्मे । चक्षुः स्फुरति सांप्रतं ॥ तेन प्राणप्रियेणाद्य । संगमं सूचयत्यदः ॥ ६४ ॥ स्व-
यमेवासनं तस्माद् । गृहीत्वात्रोपविश्य च ॥ निवेद्य कृपां कृत्वा । स्वस्वरूपं मदग्रतः ॥६५॥
कुमारः प्राह सागर–दत्तश्रेष्ठिसुतोऽस्म्यहं ॥ दैवेनापहृतोऽत्रागां । धनसागरसंज्ञकः ॥६६॥ न-
वंतीं रुदतीं श्रुत्वा । स्मृतस्वस्वजनोऽधुना ॥ करुणारससंपूर्ण–स्त्वत्समीपं समागमं ॥ ६७ ॥
का त्वं केन च निक्षिप्ता । पंजरे किं शुकीकृता ॥ को वामृतयशाः स स्या–त्स्मर्यते यस्त्वया-
निशं ॥ ६८ ॥ उवाच साश्रुधाराभिः । कदुष्णाभिर्महीतले ॥ मुंचतीव कुमारस्य । पादशौ-
चकृते जलं ॥ ६९ ॥ तथाहि–चक्रेश्वरं नाम पुरं समस्ति । तत्र क्षितीशः सुरशेखराख्यः ॥
तस्यास्ति राज्ञी सुरसुंदरीति । तस्या अहं पुष्पवतीति पुत्री ॥ ७० ॥ तातोऽन्यदा निजगृहां-
गणपूज्यमानां । पप्रच्छ वत्सलतरां कुलदेवतां स्वां ॥ को वा भविष्यति वरो मम पुत्रिकाया ।
ऊचेऽथ साऽमृतयशा भविता वरोऽस्याः ॥ ७१ ॥ षट्खंडनाथो भविता स चक्री । ततः प्र-
दत्ता जनकेन तस्मै ॥ स्वचेतसा सा च दृढानुरक्ता । जातास्मि तस्मिन्नलिनीव सूर्ये ॥ ७२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उद्यौवनान्यत्र दिने गवाक्ष-स्थिताशु दृष्टा मणिकुंमलेन ॥ विद्याधराणामधिपेन जज्ञे । स तत्क्षणं मय्यनुरक्तचित्तः ॥ ७३ ॥ जगाम पार्श्वे जनकस्य सोऽथो । मामर्थयामास मृदूक्तियुक्त्या ॥ तातो मदीयोऽथ जगाद वीर । योग्यो भवान् किं पुनरत्र वाच्यं ॥ ७४ ॥ परं पुरैषा वरिवर्त्ति दत्ता । श्रीकीर्तिसारक्षितिपात्मजाय ॥ ततः स कोपारुणितोऽवदन्मां । निवारयत्वेष हरंतमेतां ॥ ७५ ॥ उत्पत्य राजांगणसप्तमक्षणे । लीलां श्रयंतीं स्वसखीजनैः समं ॥ मां मांसवद् गृध्र इवातिमोहितः । क्षणाद् गृहीत्वा गगने चचार सः ॥ ७६ ॥ प्रचंमकोदंमधरो नरेंद्रो । यावत्समुत्तिष्ठति तं निहंतुं ॥ तावत्स वातादपि तीव्रवेगो । जगाम दूरं नयनस्य मार्गात् ॥ ७७ ॥ नानाविलापानपि तन्वतीं स । मामानिनायाशु विमोहितात्मा ॥ अस्मिन् महाकानन एव मुक्त्वा । सस्नेहमाहेति पुरः स्थितः सन् ॥ ७८ ॥ प्रिये प्रसन्नीभव भर्तृभावं । मयि प्रपद्यस्व तवास्मि भृत्यः ॥ भुंक्ष्वाथ सौख्यानि यथेप्सितानि । विद्याधराणामधिपा भव त्वं ॥ ७९ ॥ पराङ्मुखीभूय ततो मयोचे । रे पाप पापापसराक्षिमार्गात् ॥ दुष्टोऽस्यदृष्टव्यमुखोऽसि यो मां । हृत्वा बलात्कुर्कुरवत्प्रणष्टः ॥ ८० ॥ अथवा किं बहुना—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपि सुरपतिरेनां प्रार्थनां यद्विधत्ते । स्वयमपि च यदि स्यात्सानुरागः स्वयंभूः ॥ तदपि न तु नवेऽस्मिन् प्राणनाथं तमेक-मद्भुतयशसमीहे नो विहायाहमन्यं ॥ ८१ ॥ श्रुत्वेति वाक्यानि मयोदितानि । दोषाकरेणापि समं तदास्यं ॥ अभूतदोषातलतुल्यरूपं । क वा विलक्षो न भवेददक्षः ॥ ८२ ॥ ततः समुत्थाय वनांतरेषु । भ्रांत्वा गृहीत्वौषधियुग्ममेतत् ॥ निघृष्य शीर्षे तिलकं विधाय । तत्रैकया मां स शुकीं चकार ॥८३॥ इदं मंदिरं मंदराद्रिप्रमाणं । स्वविद्याबलाद्देवदेवस्य कृत्वा ॥ स निःक्षिप्य मां निःकृपः पंजरेऽस्मिन् ॥ जगाम कचित्सांप्रतं तन्न वेद्मि ॥ ८४ ॥ इति श्रुत्वौषधीयुग्मं । कुमारेण विलोकितं ॥ स्थापितं तच्छुकीपार्श्वे । चिंतितं च सविस्मयं ॥ ८५ ॥ अहो अस्या महत् किंचि-न्मयि प्रेमास्त्यकृत्रिमं ॥ चकोर्या इव शीतांशौ । मयूर्या इव वारिदे ॥ ८६ ॥ नदीनामिव नारीणां । विश्रंभो न विधीयते ॥ जन्मात्मिकानां वक्राणां । स्वभावान्नीचकर्मणां ॥ ८७ ॥ तस्मादस्या विधातव्यं । बुध्ध्या स्नेहपरीक्षणं ॥ एवं विचार्य सोऽवादी—त्कुमारः सानुकंपहृत् ॥ ८८ ॥ कुरु सुंदरि मा शोकं । को वा प्राप्नोति चिंतितं ॥ आत्मगेहे विमर्शोऽन्यो । दैवस्यापर एव हि ॥ ८९ ॥ हितोप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देशमेकं मे । शृणु रोषं च मा कृथाः ॥ भर्तृत्वेन प्रपद्यस्व । विद्याभृन्मणिकुंडलं ॥ ९० ॥
मुग्धेऽमृतयशा यस्मा-त्केनाप्यपहृतः श्रुतः ॥ एतन्न ज्ञायते सोऽथ । जीवन्नस्ति मृतोऽथवा
॥९१॥ तेन तां परिणीता नो । किमर्थं कुरुषे ततः ॥ ईदृशं निश्चयं तस्मि-न्नकस्माद्विस्मयप्रदं
॥९२॥ तस्मिंस्त्वदाग्रहं दृष्ट्वा । मणिकुंडलभृद्भुजा ॥ अथामृतयशा जीव-न्नपि रोषाद्धनिष्यते
॥९३॥ आकाशचारिणामग्रे । भूचराणां कियद्बलं ॥ तार्क्ष्यस्याग्रे भुजंगस्य । बलं चलति कीदृशं
॥९४॥ विद्याधरं सकलभूधरराजिमुख्यं । मुक्त्वा सुरेंद्रसदृशं मणिकुंडलाख्यं ॥ भूगोचरं तमपरं
नरमर्थयंती । ह्री लज्जसेऽपि न कथं विदुषि ब्रुवे त्वं ॥९५॥ ततः शुकी प्रत्यवादी-न्मा निंद
मम वल्लभं ॥ तन्निंदाकर्णनान्मा मां । कुरुष्व प्रत्यवायिनीं ॥९६॥ विद्याधरधराधीशा । भूचरा
अपि भूधराः ॥ चक्रिणोऽमृतयशसः । सेविष्यंते पदांबुजं ॥ ९७ ॥ शक्रोऽपि चक्रिणं तं नो ।
विनाशयितुमीश्वरः ॥ वराकः खेचरः कोऽयं । कारुवद्बलकारकः ॥ ९८ ॥ तस्य तेजस्विनोऽ-
ग्रे चे-त्पतेत्तर्हि स हन्यते ॥ भूमिस्थोऽपि दहेदग्निः । शलभान् खेचरानपि ॥ ९९ ॥ किं ब-
हूक्तेन वा सोऽस्तु । सुगुणो निर्गुणोऽथवा ॥ अस्मिन् मम भवे भावी । भर्ताऽमृतयशा हि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सः ॥ ३०० ॥ न रोचते च मच्चित्ते । खेचरो गुणवानपि ॥ चंद्रोऽप्यर्कानुरक्तानां । पद्मिनीनां न हर्षकृत् ॥ १ ॥ अंजलिर्विहितस्तेऽयं । नद्र मुंच कथामिमां ॥ खेचराधमनामापि । कर्णशूलं करोति मे ॥ २ ॥ तन्निश्चयमिति ज्ञात्वा । कुमारेणेति चिंतितं ॥ मयि प्रेमानुबंधोऽस्या । वज्रलेप इव स्थिरः ॥ ३ ॥ तदात्मानं स्फुटीकृत्य । सुस्थामेतां करोम्यहं ॥ अनर्थे विहिते पश्चा–त्पश्चात्तापो नविष्यति ॥ ४ ॥ नणिता साथ हे नद्रे । त्वमौषध्या द्वितीयया ॥ विहिते तिलके नूनं । स्वनावस्था नविष्यसि ॥ ५ ॥ तयोक्तं तर्हि कुर्वेवं । ततो निःकास्य पंजरात् ॥ विधाय तिलकं तेन । नारीरूपा विनिर्मिता ॥ ६ ॥ कुमारस्तां पुरो दृष्ट्वा । चिंतयामास चेतसि ॥ ईदृशी मानवी तर्हि । देवलोकेऽधिकं किमु ॥ ७ ॥ नणितं च कुमारेण । चेत्वं वदसि तर्ह्यहं ॥ मेलयामि स्वपित्रोस्त्वां । शक्तिरस्तीदृशी मम ॥ ८ ॥ आह सा नो महानाग । मम नर्तापहृतो यदि ॥ नविष्यामि तदा पित्रो–स्तत्रस्था ह्यतिदुःखदा ॥ ए ॥ जायते सह दैन्येन । वर्धते वरचिंतया ॥ निरपत्या पतित्यक्ता । पुत्री पित्रोः सुदुःखदा ॥१०॥ तस्माद्भर्तुरलान्ने मे । योग्यं मरणमेव हि ॥ गत्वा जननीपित्रोः किं । दुःखदात्री नवाम्यहं

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

॥ ११ ॥ कुमारेणोक्तमेवं चे–दानयाम्यत्र ते पतिं ॥ सहर्षया पुष्पवत्या । तावदेवं प्ररूपितं ॥
॥ १२ ॥ नो सत्पुरुष जानासि । यत्रास्ति मम वल्लभः ॥ किंवयाः कीदृशाकारः । कुमारः सो-
ऽस्ति तद्वद ॥ १३ ॥ विहस्योक्तं कुमारेण । यत्राहं तत्र सोऽपि हि ॥ न भिन्नो मद्वयोजीव
— रूपलावण्यलक्षणैः ॥ १४ ॥ इत्याकर्ण्य प्रमोदेन । द्विगुणीभूतविग्रहा ॥ पुष्पितेवाभवत्पु-
ष्प–वती रोमांचसंचयैः ॥ १५ ॥ उवाच सा सलज्जेव । प्रणताननपंकजा ॥ स्वामिन् पूर्वमपि
ज्ञातो । मया प्राणप्रियो भवान् ॥ १६ ॥ प्रसद्य प्राणनाथाद्य । मा खेदय निवेदय ॥ सत्यं
स्वरूपमात्मीयं । संतः सत्यव्रता यतः ॥ १७ ॥ कुमारेण ततः प्रोक्तं । समग्रं पूर्ववर्णितं ॥
स्वस्वरूपं समानीय । कलहंसी च दर्शिता ॥ १८ ॥ कलहंस्या ततोऽभाणि । स्वामिन्नस्या
मनोरथान् ॥ पाणिग्रहणमाधाय । पूरयस्व सुरद्रुवत् ॥ १९ ॥ मीनध्वजकलहंस्योः । समक्षं
तत्र तत्क्षणं ॥ तां गंधर्वविवाहेन । कुमारः परिणीतवान् ॥ २० ॥ ततः पुष्पवती प्राह । सं-
भाव्य खेचरागमं ॥ स्वामिन् क्लेशकरं स्थान–मिदं दूरं विमुच्यतां ॥ २१ ॥ माकार्षीद्विप्रियं
किंचि–त्समेत्यात्र स खेचरः ॥ विहस्योचे कुमारेण । प्रिये मा कातरा भव ॥ २२ ॥ शिक्षां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्य विधास्यामि । तथाहं न यथा पुनः ॥ करिष्यति स ईदृक्षं । पातकं भवपातकं ॥२३॥
परं भवंत्यौ द्वे अपि । कीरीरूपेण तिष्ठतां ॥ वनेऽहं च शुकीरूपः । स्थास्याम्यत्रैव पंजरे ॥
॥ २४ ॥ पश्यामि किं करोत्येष । किं ब्रूते किमु चेष्टते ॥ विद्याधराधमः पश्चा–द्यथायोग्यं करि-
ष्यते ॥ २५ ॥ इत्युदीर्य कुमारेण । शुकीरूपे प्रिये कृते ॥ औषध्या तिलकं कृत्वा । प्रेषिते च
वनांतरे ॥ २६ ॥ विद्यया बहुरूपिण्या । शुकीरूपं स्वयं कृतं । तत्रैव पंजरे तस्थौ । तावदागा-
त्स खेचरः ॥ २७ ॥ विद्यासिद्धिनिमित्तं चा–वतीर्णो जिनमंदिरे ॥ पंजरासन्नमागत्य । स ब-
भाण शुकीमिति ॥ २८ ॥ प्रतिपद्यस्व मां मुग्धे । भर्तृत्वेनान्यथा पुनः ॥ हठाद्वशीकरिष्या-
मि । वशीकरणविद्यया ॥ २९ ॥ तयोक्तं खेचरस्त्वेरु । नाहमीहे परं वरं ॥ विहायामृतय-
शसं । विद्यागर्वं करोषि किं ॥ ३० ॥ तत् श्रुत्वा चिंतितं तेन । शब्द एष न हि स्त्रियः ॥
दृश्यते यंत्रितं चैत–त्पंजरं तत्किमीदृशं ॥ ३१ ॥ आः ज्ञातं तां स्त्रियं हृत्वा । कीरीरूपोऽ-
स्ति कश्चन ॥ महाशठोऽयं धूर्तानां । प्रतिधूर्ता भवंति यत् ॥ ३२ ॥ द्वितीययानयौषध्या ।
। तिलके विहिते सति ॥ एषा सैवास्ति चेत्तर्हि । पुष्पवत्येव भाविनी ॥ ३३ ॥ अन्यश्चेत्क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्चिदस्त्येष । तथापि नविता स्फुटः ॥ पश्चादहं करिष्यामि । तस्य प्राणप्रहाणकं ॥ ३४ ॥
विमृश्येति कृते तेन । तिलके तादृगेव सः ॥ तिष्ठन्नाजाषितः कोऽसि । रे रे प्रछन्नतस्कर ॥
॥ ३५ ॥ मम प्रियतमां हृत्वा । किमेवमिह तिष्ठसि ॥ गृहाण शस्त्रमन्याय–फलं यद्दर्शयामि
ते ॥ ३६ ॥ तावदाख्यत् स्फुटीभूय । कुमारः सारमत्सरः ॥ देदीप्यमानो डुःप्रेक्ष्यः । कल्पां-
तस्येव नास्करः ॥ ३७ ॥ तातादत्तामनिछंतीं । कन्यां हरसि रे स्वयं ॥ चौरं च कथयस्यन्यं
। तत्पश्यान्यायजं फलं ॥ ३७ ॥ प्रगुणीकुरु शस्त्राणि । निर्गछ जिनमंदिरात् ॥ उनावपि
नटावेवं । जल्पंतौ निर्गतौ ततः ॥ ३ए ॥ युद्धमारब्धवंतौ तौ । कुमारमणिकुंमलौ ॥ उछलं-
तौ पदाघात–कंपितक्षोणिमंमलौ ॥ ४० ॥ नदतोः सिंहनादेन । पौरुषं ददतोस्तयोः ॥ प्रतिश-
ब्दैर्जयाछैला । अनुवादमिवादधुः ॥ ४१ ॥ खड्गाखड्गि महाघोरं । कुंताकुंति शराशरि ॥ त-
योरभूत्तथा युद्धं । यथा दृष्टुं न शक्यते ॥ ४२ ॥ उनावपि महाबाहू । विविधायुधवर्षिणौ ॥
युध्यमानाविमौ दृष्टुं । मिमिलुर्व्योम्नि देवताः ॥ ४३ ॥ क्षणं भूमौ क्षणं व्योम्नि । पतनोत्प-
तनादिनिः ॥ त्रासयंतौ सुरांश्चापि । युयुधाते चिरं नटौ ॥४४॥ क्षीणेषु सर्वशस्त्रेषु । महामल्ला-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवोद्धतौ ॥ मुष्टामुष्टि महामर्षा—द्युयुध्येतामुभौ चिरं ॥ ४५ ॥ अथोत्पत्य कुमारेण । मुष्टिघातेन खेचरः ॥ तथा हतो यथा भूमौ । पपात गतचेतनः ॥ ४६ ॥ अत्रांतरे कुमारस्य । शीर्षे हर्षधरैः सुरैः ॥ मुक्ता पुष्पावली व्योम्नि । चक्रे जयजयारवः ॥ ४७ ॥ उक्तं च नविता चक्री । सैषोऽमृतयशा इह ॥ सेवतां सोऽस्य पत्पद्मं । यो हि जीवितुमिच्छति ॥ ४८ ॥ क्षणाद्याविवृत्तचैतन्यः । खेचरो मणिकुंमलः ॥ देवानां तां गिरं श्रुत्वा । कुमारांह्री ननाम सः ॥ ॥ ४९ ॥ उवाच चापराधं मे । क्षमस्वाजानतः कृतं ॥ प्रणामांतरुषः संतो । नवंति जुवनांतरे ॥ ५० ॥ कुमारेण ततोऽवादि । नापराधस्तवैष यत् ॥ शूराणां परमो हर्षः । संग्रामारंज्ञतो नवेत् ॥ ५१ ॥ अद्य यावन्मया दृष्टो । न नटोऽत्र भवादृशः ॥ अद्यैव नवता दत्तं । मम संग्रामकौतुकं ॥ ५२ ॥ खेचरेंद्रस्ततोऽवादी—देहि श्रीमंदिरं पुरं ॥ मयि प्रसादमाधेहि । देहि स्वामिन् मदीप्सितं ॥ ५३ ॥ तावत्तत्र समायाते । कीरीरूपे प्रिये उन्ने ॥ दृष्ट्वा च खेचरोऽपृच्छ—त्कुमारं के इमे इति ॥ ५४ ॥ कुमारेणापि वृत्तांतः । सर्वस्तस्य निवेदितः ॥ सोऽप्यूचे साधु साध्वेषा । धिषणा ते विचक्षण ॥ ५५ ॥ यथा निवारितः पापा—दहं त्वं मे च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेलितः ॥ विज्ञप्यं विद्यते तच्च । गेहे विज्ञपयिष्यते ॥ ५६ ॥ औषध्या तिलकं कृत्वा । स्व-
भावस्थे प्रिये कृते ॥ ताभ्यां च सहितस्तत्र । कुमारो मारवद्भतौ ॥ ५७ ॥ आरुह्य खेचरें-
द्रस्य । विमानं सप्रियोऽथ सः ॥ चलितः क्रमतः प्राप्तः । श्रीमंदिरपुरं पुरं ॥ ५८ ॥ प्रवेशक-
महःपूर्वं । महता विस्तरेण तं ॥ खेचरेंद्रः समानीय । स्वासने समतिष्टपत् ॥ ५९ ॥ उवाच
च कुमारेंद्र । शृणु विज्ञप्तिकां मम ॥ अत्रैव कुर्वता राज्य-मैयरुर्बहवो दिनाः ॥ ६० ॥ संति
सद्गुणसंपन्ना । बहवोऽपि मम स्त्रियः ॥ परं कापि प्रसूता नो । पुत्रं राज्यधुराधरं ॥ ६१ ॥
पुत्राः प्रायो न जायंते । कुले विभवशालिनि ॥ उत्तमे चंदने वृक्षे । फलं नोत्पद्यते किल ॥
॥ ६२ ॥ भवेच्च पुत्रबाहुल्यं । दारिद्र्याकुलिते कुले ॥ छायासौरभ्यमुक्ते च । करीरे बहुलं फ-
लं ॥ ६३ ॥ मंत्रतंत्रप्रयोगैर्मे । देवानां चोपयाचितैः ॥ समस्तैर्विफलैर्जातं । पुत्रोत्पत्तिकृते कृतैः
॥ ६४ ॥ अथान्यदा समायातो । दमसारो महामुनिः ॥ ज्ञानत्रयप्रदीपांशु-दीपितस्वांतमं-
दिरः ॥ ६५ ॥ मया सपरिवारेण । गत्वा नेमे मुनीश्वरः ॥ अनुकंपापरोऽस्मासु । प्रारेभे सोऽ-
पि देशनां ॥ ६६ ॥ यः प्राप्य दुःप्राप्यमिदं नरत्वं । धर्मं न यत्नेन करोति मूढः ॥ क्लेश-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रबंधेन स लब्धमब्धौ । चिंतामणिं हारयति प्रमादात् ॥ ६७ ॥ इत्यादिदेशनावाक्य—पीयू-
षरससिंचनैः ॥ रागोरगविषावेगं । स मे किंचिद्दशीशमत् ॥ ६८ ॥ विज्ञप्तः स मया साधो ।
राज्यं त्यक्त्वार्हतव्रतं ॥ त्वदंतिकेऽधुनादास्ये—ऽभविष्यन्नंदनो यदि ॥ ६९ ॥ राज्यमेत-
न्निराधारं । मोक्तुं शक्नोमि नो प्रभो ॥ एकोऽपि च न मे पुत्रो । यो राज्यं धरतेऽग्रतः ॥
॥ ७० ॥ ततः प्रसीद भगवन् । राज्ययोग्यं नरं वद ॥ तस्मै राज्यं यथा दत्वा । प्रव्रज्यामह-
माश्रये ॥ ७१ ॥ मुनिनोक्तं महाराज । राज्ययोग्योऽत्र नो नरः ॥ यो जेष्यति रणे त्वां तं ।
राज्ययोगमवैहि वै ॥ ७२ ॥ अद्यापि तव भोक्तव्यं । विद्यते कर्म शर्मकृत् ॥ गृहीया गृहमु-
त्सृज्य । तस्मिंश्च मिलिते सति ॥ ७३ ॥ ततो नागरिकैर्लोकैः । सहैवाददि सन्मुनेः ॥ पा-
र्श्वे सम्यक्त्वमूलानि । द्वादशाणुव्रतान्यहं ॥ ७४ ॥ विजहार महीपीठे । दमसारमुनीश्वरः
अहं चास्थां गुणांस्तस्य । स्मरन् कुंदेंदुसुंदरान् ॥ ७५ ॥ अनेके मिलिताः शूरा । अहंकारप-
राः परं ॥ अहं केनापि वीरेण । गुंजितो न कदाचन ॥ ७६ ॥ अद्य त्वया जितश्चित्ते । रं-
जितोऽप्यभवं दृढं ॥ तद्भोः कुमार राज्यं मे । समलंकुरु सांप्रतं ॥ ७७ ॥ अहं दीक्षां गृही-

P.P. Ac. Gunratnasuri M.S.          Jun Gun Aaradhak Trust

ष्यामि । संसारविरताशयः ॥ इत्युक्त्वा खेचरेंद्रेण । खेचरा मेलिताः समे ॥ ७७ ॥ कृत्वामृतयशःशीर्षे । तिलकं मणिकुंमलः ॥ सर्वविद्याधराध्यक्षं । निजराज्यं ददौ मुदा ॥ ७ए ॥ स्वयं शाश्वतचैत्यानि । वंदित्वातिसविस्तरं ॥ दमसारमुनींद्रस्य । पार्श्वे व्रतमुपाददे ॥ ७० ॥ तत्रामृतयशा राज्यं । श्रीमंदिरपुरेऽकरोत् ॥ सर्वखेचरराजेंद्र–सेवितांह्रिपयोरुहः ॥ ७१ ॥ अन्यदा पुष्पवत्याथ । विज्ञप्तः कीर्तिसारभूः ॥ स्वामिन् मातरपित्रोर्मे । महद्दुःखं नविष्यति ॥ ॥ ७२ ॥ तत्तत्र गमनं कृत्वा । दत्वा च निजदर्शनं ॥ मत्पित्रोर्मित्रवन्नाथ । प्रबोधय हृदंबुजं ॥ ७३ ॥ ततोऽमृतयशा विद्या–धरराजिपरिवृतः ॥ विमानैर्द्योतयन् व्योमा–चालीचक्रेश्वरं प्रति ॥ ७४ ॥ चलन् गगनमार्गेण । कालादल्पतरादपि ॥ चक्रेश्वरपुरासन्नं । समागात्पुरुहूतवत् ॥ ७५ ॥ तावदेको जनो गत्वा । सुरशेखरभूभुजं ॥ अवर्धयन्महाराज । जामाता ते समागतः ॥ ७६ ॥ पुष्पवत्या च ते पुत्र्या । सहैव पुरसन्निधौ ॥ इत्याकर्ण्यामृतेनेव । सिक्तोऽतोषन्महीपतिः ॥ ७७ ॥ चचाल संमुखं स्मेर–मुखो जामातुरेषकः ॥ कुमारोऽपि पुरासन्न–मुत्तार महीतले ॥ ७७ ॥ आसन्नं श्वशुरं दृष्ट्वा । विमानादवतीर्य सः ॥ नमोऽकार्षीत्कु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मारस्तं । हृष्यंतं सुरशेखरं ॥८९॥ स्वतातपादपाथोजं । भृंगीवत्पुष्पवत्यपि ॥ प्राप्य प्रमुदिता जज्ञे । गलद्धर्षाश्रुलोचना ॥ ९० ॥ प्रवेशकमहं कृत्वा । दत्वा दानान्यनेकशः ॥ प्रवेशितो नरेंद्रेण । कुमारो नगरांतरे ॥ ९१ ॥ पृष्टया पितृमातृभ्यां । पुष्पवत्या प्ररूपिताः ॥ अवदाताः समे भर्तुः । श्रुत्वा तावपि विस्मितौ ॥ ९२ ॥ कियत्यपि गते काले । कलहंस्याथ कांतया ॥ व्यज्ञापि विज्ञया कांतः । स्वकीयः कांतया गिरा ॥ ९३ ॥ पुष्पवत्या इव स्वामिन् । पित्रोर्मे देहि दर्शनं ॥ मेघवच्छमयोत्तापं । मद्वियोगदवोद्भवं ॥ ९४ ॥ ततो मदाग्रहपरो । दत्वा दानं व्यसर्जयत् ॥ नृपः सोऽपि प्रियायुग्म–युतोऽचालीत्पुरात्ततः ॥ ९५ ॥ प्रौढं विमानमारूढो । विद्याधरभरावृतः ॥ कमलासनपूःपार्श्वे । स प्राप व्योम्नि संचरन् ॥ ९६ ॥ वने न्यवीविशत्सैन्यं । कलहंसीं च सोऽवदत् ॥ प्रिये मेलयितुं तातं । तवात्रैव समानयेत् ॥ ९७ ॥ ततः स विद्यया चक्रे । रूपं मत्तस्य दंतिनः ॥ कानने क्रीडितुं चागा–देकाकी पुरपार्श्वगे ॥ ९८ ॥ कमलध्वजराजेंद्र–स्तावत्तत्र समाययौ ॥ मत्तं मतंगजं तं च । दृष्ट्वात्यंतं जहर्ष सः ॥ ९९ ॥ आरुरोह वशीकर्तुं । यावत्तं कमलध्वजः ॥ तावदाकाशमार्गेण । तार्क्ष्यपक्षीव सोऽचलत् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४८० ॥ आनीय निजसैन्यांतः । स्वविमाने निवेश्य तं ॥ अपहृत्य हस्तिरूपं । सोऽभूत्खा-
नाविकाकृतिः ॥ १ ॥ किमेतदिति संभ्रांतो । नरेंद्रो यावदूहते ॥ तावदग्रे सुतां सौवां । क-
लहंसीमलोकत ॥ २ ॥ सापि तातपदांभोजं । प्रणनाम मुहुर्मुहुः ॥ सोऽपि तामंकमारोप्या
-प्राक्षीद् वृत्तांतमादितः ॥ ३ ॥ तयापि निजतातस्य । पुरस्तात्स निवेदितः ॥ राज्ञोक्तं पु-
त्रि मे चित्रं । हस्ती व्योम्नि चचाल यत् ॥ ४ ॥ अन्यच्च मामिहानीय । क्वचिद् दृष्टोऽपि नो
पुनः ॥ विहस्य कलहंस्याह । त्वज्जामातृकृतं ह्यदः ॥ ५ ॥ तद्‌ज्ञात्वा निजजामातुः । कला-
कौशलमद्‌भुतं ॥ चित्ते चमत्कृतोऽपश्य-त्तन्मुखं सोऽनिमेषदृक् ॥ ६ ॥ तावत्तत्र समायातं ।
पश्यदंबरमुन्मुखं ॥ गजगत्यनुसारेणा-गच्छत्सैन्यं नरेशितुः ॥ ७ ॥ शंकया प्रतिसैन्यस्य । या-
वत्सज्जीभवत्यदः ॥ तावत्तत्र निजं नाथ-मासनासनमैक्षत ॥ ८ ॥ जामातुः पुत्रिकायाश्चा-
गमं श्रुत्वा नरेशितुः ॥ मुदिताः सैनिकाः सर्वे । जज्ञिरे धन्यमानिनः ॥ ९ ॥ राज्ञा महा-
महैः सारः । कुमारो वेशितः पुरे ॥ भुंजानो विषयांस्तत्र । तस्थौ कतिपयान् दिनान् ॥१०॥
अन्यदा निशि सुप्तोऽसौ । भार्यां कनकमंजरीं ॥ अस्मार्षीन्निर्मलनोत्कंठा । तदैवोत्पद्यतेस्म च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ११ ॥ सत्कृत्यात्यंतदानेन । कमलध्वजभूभुजा ॥ विसृष्टः सपरिवारो—ऽचलज्जयपुरंप्रति ॥
॥ १२ ॥ आगच्छन्व्योममार्गेणा—चिरकालेन तत्पुरं ॥ अकस्माज्जयसेनस्य । सभायां च समाय-
यौ ॥ १३ ॥ स्ववियोगातपाक्रुष्य—दर्शनोत्थमुदंबुभिः ॥ कुमारः पूरयामास । मेघवन्नृपमानसं
॥ १४ ॥ ससंभ्रमं समुत्तस्थौ । सन्मुखं तस्य भूपतिः ॥ आलिलिंग कुमारेंद्र । स्वासनार्धे न्य-
वेशयत् ॥ १५ ॥ अप्राक्षीत्कुशलोदंतं । दंतकांत्यावभासयन् ॥ सभामभाषत स्वीयं । स्वरूपं
स्वयमप्यसौ ॥ १६ ॥ विसिष्मये नरेंद्रेण । सभयापि समस्तया ॥ भोजनानंतरं चोचे । सु-
खासीनं तमादरात् ॥ १७ ॥ कुमार श्रृणु वृत्तांतं । त्वयि रात्रावतर्किते ॥ गतेऽहं व्याकुलोऽ-
भूवं । प्रभाते त्वदभावतः ॥ १८ ॥ मयैव प्रेषितैः प्रेष्यै—र्भवंतमवलोकितुं ॥ भ्रमद्भिः पृथि-
वीपीठे । दृष्टास्त्वत्पितृसेवकाः ॥ १९ ॥ एकमेवात्मनां कार्य—मित्युक्त्वा मिलितैश्च तैः ॥
विलोकितोऽसि देशेष्व—नेकेषु नामिलः परं ॥ २० ॥ ततः खिन्नाः समायाताः । सर्वेऽपि मम
सन्निधौ ॥ मया च रक्षिता अत्र । त्वदीयागमनाशया ॥ २१ ॥ त्वयि सांप्रतमायाते । फलितं
मन्मनोरथैः ॥ इत्युक्त्वा भूभुजा तस्य । पितुर्भृत्याः प्रदर्शिताः ॥ २२ ॥ अथामृतयशा राजा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। दृष्ट्वा तान् हृष्टमानसः ॥ सोऽपृच्छत्कुशलोदंतं । मातापित्रोः कृतादरः ॥ २३ ॥ तैरूचे कुशलं देव । सर्वेषामपि विद्यते ॥ परं तव वियोगेन । पुरमप्यस्ति दुःखितं ॥ २४ ॥ किं कथ्यते कुमारेंद्र । त्वत्पित्रोर्दुःखमस्ति यत् ॥ त्वत्पितुर्मुद्रिकां माता । धत्तेऽथो कंकणास्पदे ॥ २५ ॥ इति श्रुत्वाऽमृतयशा । गलत्स्थूलाश्रुलोचनः ॥ उवाच श्वशुरं राजन् । दुर्विनीताग्रणीरहं ॥ ॥ २६ ॥ धिग्मां येन निजस्तातो । दुःखांभोधौ निपातितः ॥ न सोढं च वचस्तस्य । विक्रीतैर्यस्य गम्यते ॥ २७ ॥ आस्तन्यपाना जननी पशूना–मादारलाभा च नराधमानां ॥ आगेहकर्मावधि मध्यमाना–माजन्म तीर्थं तु नरोत्तमानां ॥ २८ ॥ तन्मया जननी सौवा–धर्मेनासुखिनी कृता ॥ ततः स जयसेनेन । दुःखं कुर्वन्निवारितः ॥ २९ ॥ उक्तं च भोः कुमारेंद्र । नापराधस्तवैष यत् ॥ मत्पुत्रिकादिभाग्येन । समाकृष्टस्त्वमागतः ॥ ३० ॥ उत्कृष्टदानसन्माने । दत्वा सोऽथ विसृष्टवान् ॥ कुमारः प्राचलत्सार्थे । नीत्वा कनकमंजरीं ॥ ३१ ॥ पितुर्भृत्यान् समारोप्य । विमानेषु नभोऽध्वनि ॥ चरन्नचिरकालेन । स प्राप पुरसंनिधौ ॥ ३२ ॥ एको विद्याधरो गत्वा । त्वरितः संसदि स्थितं ॥ कीर्तिसारनृपं प्राह । राजन् वर्धाप्यसेऽध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ना ॥ ३३ ॥ पुत्रोऽमृतयशा विद्या—धरराजेंद्रराजितः ॥ आगछन् वर्तते तातं । त्वां भेटयितु-
मुद्यतः ॥ ३४ ॥ इति श्रुत्वा तदा राजा । तथातुष्यद्यथाक्रमः ॥ वक्तुं कोऽपि न मूकांगि-
भुक्ताम्रमधुरत्ववत् ॥ ३५ ॥ तस्मै सुवर्णमाणिक्य—प्रमुखं पारितोषिकं ॥ दानं दत्वा नृपोऽ-
वादी—द्वत्स त्वं गछ संमुखं ॥ ३६ ॥ क्षणं कुमारमायांतं । रक्षैतत्पुरसंनिधौ ॥ यावद्विधीय-
ते शोभा । शोभना नगरांतरे ॥ ३७ ॥ इत्युक्ते सत्वरं गत्वा । स तातादेशमन्वधात् ॥ उत्त-
तार कुमारश्च । पुरासन्नवनांतरे ॥ ३८ ॥ पुत्रस्य सन्मुखोऽचाली—न्नगरं मणितोरणं ॥ कृत्वा
राजा शुभस्तभो—त्तंभितानंततोरणं ॥ ३९ ॥ आयांतं तातमालोक्य । विमानादवतीर्य च ॥
लुठन् लुठन् महीपीठे । कुमारस्तं नमोऽकरोत् ॥ ४० ॥ राजाप्युत्थाप्य सस्नेह—मालिंग्यैव
स्थितश्चिरं ॥ वारंवारं शिरोदेशे । चुचुंब निजमंगजं ॥ ४१ ॥ पृष्ट्वा कुशलवृत्तांतं । राजारु-
ह्य मतंगजं ॥ अंगजं निजमुत्संग—मारोप्य प्राविशत्पुरं ॥ ४२ ॥ मागधैर्गीयमानासु । छंदः-
षट्पदगीतिषु ॥ वाद्येषु वाद्यमानेषु । पुरांतः प्राप भूपभूः ॥ ४३ ॥ तदाभून्नगरक्षोभ । आग-
छत्प्रमदाजनः ॥ ढलद्घृतघटान् मुक्त्वा । कुमारमवलोकितुं ॥ ४४ ॥ काचित्स्वबालकभ्रांत्या ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कटौ कृत्वा शुनोऽर्भकं ॥ पश्यंती हस्यते लोकैः । कुमारं व्यग्रमानसा ॥ ४५ ॥ स्नातुं स्थिता भिः काभिश्चि—न्नारी निर्देहमज्जनं ॥ कुठारघाताद्धिकं । मेने श्रुत्वा तदागमं ॥ ४६ ॥ कं- कणान्यंह्रिषु क्षिप्त्वा । नूपुराणि करेषु च ॥ ओष्ठेषु चांजनं दत्वा । तं व्यलोकंत काश्चन ॥ ॥ ४७ ॥ इतीक्ष्यमाणः साश्चर्यैः । संभ्रांतैः प्रमदाजनैः ॥ प्राप्तो राजांगणद्वारे । मंगलाचारपू- र्वकं ॥ ४८ ॥ प्राविशत्तत्र राज्ञा च । स्वासनार्धे निवेशितः ॥ पृष्टो देशांतरोदंतं । सोऽपि सर्वं न्यवेदयत् ॥ ४९ ॥ क्षणांतराद्थोत्थाय । कुमारो गृहमंतरा ॥ गत्वा कीर्तिमतीं राज्ञीं । स- वित्रीं सादरोऽनमत् ॥ ५० तिस्रस्त्रिभ्योऽपि लोकेभ्य । उध्धृतैः शुभगाणुभिः ॥ घटिता इव तेन स्व—प्रिया मातुः प्रदर्शिताः ॥ ५१ ॥ प्रणेमुस्ता अपि स्वीयां । श्वश्रूं वात्सल्यशालिनीं ॥ तयापि चाशिषा पुत्रः । सनाथो मुदितः कृतः ॥ ५२ ॥ पृष्ट्वा कुशलवृत्तांतं । प्रणम्य जन- नीं पुनः ॥ आगत्य स्वपितुः पार्श्वे । नृत्यवत्तत्र तस्थिवान् ॥ ५३ ॥ अथो शुभदिने प्राप्ते । विधाय तिलकं स्वयं ॥ स्वराज्यममृतयशसे । कीर्तिसारनृपो ददौ ॥ ५४ ॥ गुरोर्विमलचंद्रस्य । पार्श्वे वैराग्यरंगवान् ॥ राजादत्त महादान—मादत्त व्रतमार्हतं ॥ ५५ ॥ अथामृतयशा रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जा। निजं राज्यमपालयत् ॥ खेचरैर्भूचरैर्भूपै-र्नम्यमानपदांबुजः ॥ ५६ ॥ कियत्यपि गते काले। सज्झायां संस्थितं नृपं ॥ विशालायुधशालाया। रक्षितेति व्यजिज्ञपत् ॥ ५७ ॥ देवाद्य यावदादित्य। उदेतिस्मोदयाचले ॥ तावदायुधशालायां। चक्रं चाज्ज्वलदुज्ज्वलं ॥ ॥ ५८ ॥ अद्य मन्ये दिवा नारी। जज्ञे पूर्णमनोरथा ॥ सूर्यचक्रमिव प्राप्त-कुंडलद्वयमंडना ॥ ५९ ॥ पूजानाट्यप्रबंधेन। विधायाष्टाह्निकामहं ॥ चचाल चक्रमादाय। कर्तुं दिग्विजयं नृपः ॥ ६० ॥ भूपालचक्रवालेन। दोर्भ्यां चक्रबलेन च ॥ सोऽखिलं साधयामास। विजयं पुष्कलावतीं ॥ ६१ ॥ क्रमेण विक्रमाक्रांत-षट्खंडक्षितिमंडलः ॥ प्रत्यागतश्चक्रवर्ती। स्वपुरं मणितोरणं ॥ ६२ ॥ प्रधानानि निधानानि। संस्थुस्तत्संनिधौ नव ॥ तस्य कार्यकराण्यासन् । रत्नान्येव चतुर्दश ॥ ६३ ॥ षोडशसहस्रसंख्यै-र्यक्षैः संसेव्यतेस्म सः ॥ द्वात्रिंशता सहस्रैश्च। नृपैर्मुकुटमंडितैः ॥ ६४ ॥ देवांगनाधिकश्रीका। लावण्यरसकुंपिकाः ॥ चतुःषष्टिसहस्राणि। पत्न्यस्तस्याभवंस्तथा ॥ ६५ ॥ लक्षाश्चतुरशीतिश्च। तुरगाः कुंजरा रथाः ॥ कोटयः षण्णवत्याद्या-स्तस्याभूवन् पदातयः ॥६६॥ तावन्माना महाग्रामाः। पत्तनान्युत्तमानि च ॥ द्वा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सप्ततिसहस्राणि । द्वात्रिंशन्नाटकानि च ॥ ६७ ॥ इत्यादि चक्रिणो लक्ष्म्या । संगते स्वपुरागते ॥ चक्रिपट्टाभिषेकश्च । तस्मिन्नृपे कृतो नृपैः ॥ ६८ ॥ जज्ञे द्वादश वर्षाणि । सद्दगेव महान् महः ॥ चक्री तत्र सुखेनास्थात् । षट्खंडाखंडराज्यभुक् ॥ ६९ ॥ अथान्यदा पुष्पवतीं । विच्छायवदनांबुजां ॥ चक्री चिंतातुरां दृष्ट्वा । पृष्टवानिति सांजसं ॥ ७० ॥ करीरवृक्षवद्देवि । विच्छाया किमु दृश्यसे ॥ व्याधिर्वाधिः शरीरं ते । सांप्रतं बाधते किमु ॥ ७१ ॥ तयोक्तं त्वत्प्रसादेन । बाधा काचिन्न मे प्रभो ॥ परमेकोऽपि मे सूनु–र्नेति खिद्येऽहमन्वहं ॥ ॥ ७२ ॥ चक्रिणोक्तं प्रिये नात्र । खेदः कार्यो मनागपि ॥ अहं तथा यतिष्ये ते । भविष्यति यथा सुतः ॥ ७३ ॥ सोऽस्मार्षीदथ पूर्वोक्तां । यक्षिणीं जयसुंदरीं ॥ अतुल्यकल्पवात्सल्य–बलबाहुल्यसुंदरीं ॥ ७४ ॥ आगता स्मृतिमात्रेण । सा जजल्प पुरः स्थिता ॥ अनल्पभाग्यसौभाग्य—सुभगाहं स्मृता कुतः ॥ ७५ ॥ चक्रिणोक्तं पुष्पवतीं । देवि पुत्रवतीं कुरु ॥ एतदर्थं स्मृतासि त्वं । सर्ववल्लीवेप्सितप्रदा ॥७६॥ अवधिज्ञानविज्ञात–भवितव्यतया ॥ तथा भजाणि भूपते भावि । पुष्पवत्याः सुतद्वयं ॥७७॥ स्वप्ने द्रक्ष्यत्यसौ सिंहा–वत्राभिज्ञानमस्त्यदः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ततश्चक्रिविसृष्टा सा । समायाता स्वमास्पदं ॥७८॥ अत्रांतरे प्रपंचेन । पूर्वं यौ प्रतिपादितौ
॥ गुणचंद्रो गुणधर । इति संज्ञौ सहोदरौ ॥७९॥ तयोरायुर्निजं भुक्त्वा । सागराणि चतुर्दश
॥ लांतकाख्यदेवलोकाद् । गुणचंद्रस्ततश्च्युतः ॥८०॥ अवातरत्पुष्पवत्याः । शुक्तिकाया इवोदरे ॥
मुक्तावत्पुष्पभृत्सिंहं । सापि स्वप्ने व्यलोकत ॥८१॥ संपूर्णेषु दिनेष्वेषा । पूर्वा दिगिव भास्करं
॥ सा प्रासूत सुतं सूति–गृहदीपनदीपकं ॥८२॥ नाम स्वप्नानुसारेण । पुष्पसिंह इतीदृशं ॥
प्रतिष्ठितं कुमारस्य । जज्ञे चात्यंतमुत्सवः ॥ ८३ ॥ पुनर्गते मिते काले । जीवो गुणधरस्य च
॥ ततश्च्युत्वा पुष्पवत्या । गर्भे एवावतीर्णवान् ॥ ८४ ॥ रत्नमालिकया कंठे–ऽलंकृतं सिंहम-
द्भुतं ॥ अपश्यज्जननी स्वप्ने । काले चाजीजनत्सुतं ॥ ८५ ॥ महद्वर्धापनं चक्रे । चक्री स्व-
नगरांतरे ॥ रत्नसिंह इति स्वप्न–वशात्तस्याभिधां व्यधात् ॥ ८६ ॥ पुष्पदंतौ पुष्पदंता–विव
तेजस्विनावुभौ ॥ तावश्विनीकुमाराभा–ववर्धेतां शुभाकृती ॥ ८७ ॥ कलाकलापकौशल्य–म-
भ्यस्याल्पदिनैरपि ॥ उन्मुक्तबालभावौ तौ । जग्मतुर्यौवनं वयः ॥ ८८ ॥ तौ पित्रा परया
भूत्या । रूपलावण्यशालिनीः ॥ सौभाग्यमालिनीः कन्याः । प्रणयात्परिणायितौ ॥८९॥ आज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्मांतरप्रीते–स्तावुभावपि बांधवौ ॥ अरमेतामभुंजेतां । सहैवातिष्ठतामपि ॥ ९० ॥ अथा-
मृतयशाश्चक्री । भुंजन् राज्यमखंडितं ॥ अनेकपूर्वलक्षाणि । क्षणवत्सोऽत्यवाहयत् ॥ ९१ ॥
गुरोर्विमलचंद्रस्य । पट्टपूर्वाचले स्थितः ॥ बोधयन् भविपद्मानि । कीर्तिसारमुनीश्वरः ॥ ९२ ॥
दिनेश्वर इवायातः । पुरासन्नवने तदा ॥ वनपालस्तदैवैत्य । वर्धयामास चक्रिणः ॥ ९३ ॥
॥ युग्मं ॥ दत्वा दानमसंख्यातं । तस्मै संतोषिताशयः ॥ चक्रवर्ती निजं तातं । राजर्षिं वं-
दितुं ययौ ॥ ९४ ॥ स त्रिःप्रदक्षिणीकृत्य । नमस्कृत्य मुनीश्वरं ॥ तस्थौ यथोचितस्थाने ।
शुश्रावेति च देशनां ॥ ९५ ॥ भो भव्या भवभीमरूपविपिने किंपाकपाकोपमे । यो वै वैष-
यिके सुखे रतमतिर्भूत्वा चिरं तिष्ठति ॥ श्रीश्रेयोनगरं सुदूरमयतः श्रीसंघसंघातत–श्च्युत्वो-
न्मार्गगतः स दुःखमनिशं भुंक्ते निरालंबनः ॥ ९६ ॥ पूर्वं कृतिन् यत्सुकृतं कृतं त्वया । ते-
नैव लब्धा इह जन्मनि श्रियः ॥ इहापि चेदात्महितं करिष्यसि । भवांतरे तर्हि सुखी भ-
विष्यसि ॥ ९७ ॥ भवे ज्वलन्मंदिरसोदरेऽस्मिन् । को वावतिष्ठेत विशिष्टबुद्धिः ॥ नास्वादनीया
विषया विषेण । विमिश्रितान्नोपमिता बुधेन ॥ ९८ ॥ श्रुत्वेति देशनां राज्ञो । मानसं तस्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मानसं ॥ सरोवरमिवात्यंतं । व्यानशे संयमश्रिया ॥ एए ॥ प्रांजलिः प्रार्थनां चक्रे । चक्री तं मुनिपंप्रति ॥ तात तावदिह स्थेयं । यावदायाम्यहं पुनः ॥ ५०० ॥ नवांधपतितो राज्य— सुखांजःस्वादलोलतां ॥ त्यक्त्वाद्य निःसरिष्यामि । प्रव्रज्यासज्जरज्जुना ॥ १ ॥ कालक्षेपो न कर्तव्य । इत्युक्ते गुरुणा नृपः ॥ गृहं गत्वा निजे राज्ये । पुष्पासिंहमतिष्ठपत् ॥ २ ॥ सर्वविद्याधराणां चा—धिपत्यं नृपपुंगवः ॥ पुत्राय रत्नासिंहाय । स्वविद्याभिः समं ददौ ॥ ३ ॥ विधाय बंदिनां मोक्षं । मोक्षाकांक्षापरायणः ॥ अनर्गलं महादानं । दत्वा चक्री व्रतं ललौ ॥ ॥ ४ ॥ नोक्तुं च विषयान् मोक्तुं । समर्थस्तादृगुत्तमः ॥ इतरः कातरो लोकः । किंचित्कर्तुमनीश्वरः ॥ ५ ॥ तस्मिन्नवसरेऽनेकै—र्नृपालैरपरैरपि ॥ बह्वीभिश्चक्रिपत्नीभिः । प्रव्रज्या समुपापदे ॥ ६ ॥ पुष्पसिंहरत्नसिंहौ । सम्यक्त्वं भावपूर्वकं ॥ पितामहादगृह्णीतां । द्वादशाणुव्रतैर्युतं ॥ ७ ॥ गाहमानः श्रुतांभोधिं । गृह्णंस्तत्वमणीन् मुनिः ॥ तपांस्युग्राणि कुर्वाणो । व्यहरद्गुरुणा समं ॥ ८ ॥ वैरिकुंजरविक्षोभी । नगरे मणितोरणे ॥ भुंक्ते पुष्पसिंहो राज्यं । सिंहवद्बलगर्जितः ॥ ए ॥ तस्यैवादेशमासाद्य । सद्यो विद्याधरान्वितः ॥ रत्नासिंहो विमानेन।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्तः श्रीमंदिरं पुरं ॥ १० ॥ सर्वविद्याधरैस्तत्र । मन्यमानः स तस्थिवान् ॥ साधयामास सर्वाश्च । विद्या विद्याधरोचिताः ॥ ११ ॥ तत्प्रभावेण सर्वत्रा–स्खलितो विचरत्यसौ ॥ नित्यं शाश्वतचैत्यानि । वंदते भाविताशयः ॥ १२ ॥ अन्यदा रत्नसिंहेना–नंदान्नंदीश्वरंप्रति ॥ प्रस्थितेन विमानेन । गच्छता गगनांगणे ॥ १३ ॥ विजये पुष्कलावत्या–मेकस्मिन्नटवीवने ॥ तापसीतापसजनो । रुदन्नुच्चैर्विलोकितः ॥ १४ ॥ करुणापूर्णचित्तेन । तेन तत्रावतीर्य च ॥ पृच्छ्यते तापसश्चैकः । किमेवं जड रोदिति ॥ १५ ॥ मुक्तपुत्रकलत्रोऽपि । सांप्रतं तापसो जनः ॥ तेनोक्तं शृणु वृत्तांत–मस्मिन्नेव तपोवने ॥ १६ ॥ अस्माकं त्राणभूतोऽभूत् । गुणगण्याकरोपमः ॥ शुद्धबुद्धिः कुलपति–र्ज्ञाननिध्यभिधानवान् ॥ १७ ॥ स एव स्वोटजे सुप्तो । दृष्टो दुष्टाहिना निशि ॥ मंत्रतंत्रप्रयोगाश्च । तापसैर्विहिता हितैः ॥ १८ ॥ परं सर्वेऽपि संजाता । निष्फलाश्चंदनद्रुवत् ॥ अथो मृत इति ज्ञात्वा । क्षिप्त्वा जंपानकांतरे ॥ १९ ॥ मिलित्वा तापसैः सर्वै–र्देहसंस्कारहेतवे ॥ नीयते सोऽधुना दुःखा–त्तापसैरिति रुद्यते ॥ २० ॥ संसिद्धमंत्रतंत्रेण । रत्नसिंहेन जल्पितं ॥ मम दर्शय तं येन । कुर्वे कांचित्प्रतिक्रियां ॥ २१ ॥ इत्या

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कर्ण्यं सहर्षेण । रत्नसिंहस्य दर्शितः ॥ निश्चेष्टः काष्टवत्तेन । नीयमानः सतापसैः ॥ २२ ॥
जीवंतं लक्षणैर्ज्ञात्वा । तं जलैर्मंत्रसंस्कृतैः ॥ आसिंचत्स तथा सज्जो । यथाजायत सोऽचिरा-
त् ॥ २३ ॥ उत्तस्थौ प्राप्तचैतन्य—स्तदा कुलपतिर्वदन् ॥ किमेतदिति संभ्रांतो । विस्मयस्फार-
लोचनः ॥ २४ ॥ अमंदानंदसंदोह—जलदांकुरितांगकैः ॥ तापसैः सर्वमाख्यायि । स्वरूपं पु-
लकच्छलात् ॥ २५ ॥ अनेन नररत्नेन । भवानुज्जीवितोऽधुना ॥ जल्पद्भिरिति तैरग्रे । रत्नसिं-
हः प्रदर्शितः ॥ २६ ॥ अथ सुस्निग्धदृष्टिस्तं । निन्ये कुलपतिर्निजं ॥ आश्रमं सांजसं चाह ।
धन्यस्त्वं पुरुषोत्तम ॥ २७ ॥ परेषामुपकाराय । जन्म युष्मादृशां सतां ॥ विधात्रा विहितं ते-
नो—चितं कर्म तवेदृशं ॥ २८ ॥ संति संतः कियंतोऽपि । तेऽत्र फनसवृक्षवत् ॥ दिशंति फ-
लमामूला—सरसं देहपुष्टिकृत् ॥ २९ ॥ राज्यं करोषि यत्र त्वं । नगरं तत्किमुत्तमं ॥ प्रश-
स्यः स प्रदेशः को । यमनुप्रस्थितो भवान् ॥ ३० ॥ के वर्या नृपते वर्णा । गुंफितं तव नाम
यैः ॥ पुष्पमालेव लोकेन । ध्रियते कंठकंदले ॥ ३१ ॥ ततो जनो रत्नसिंह—स्वरूपं सर्वमन्वय-
धात् ॥ ततः कुलपतिरिति । प्राह प्रमुदिताशयः ॥ ३२ ॥ सर्वविद्याधराधीश । निःसर्गाद्गु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पकारिणः ॥ तव प्रत्युपकाराय । प्रयतः को भवत्यलं ॥ ३३ ॥ तथापि निजसामर्थ्या—नुसा-
रात्स करिष्यते ॥ लोकेऽपि श्रूयते येना—तिथिर्गेहानुसारतः ॥३४॥ इत्युदीर्योटजादेकं । प्रेष्य
तापसमाशु सः ॥ कन्यामानाय्य राज्ञोऽग्रे । दर्शयित्वेत्यभाषत ॥ ३५ ॥ महाराज तवैवैषा ।
योग्या भवति कन्यका ॥ तत्राश्रमगुरोरेषा—गतस्याद्योपढौकनं ॥ ३६ ॥ सा रत्नसिंहमालोक्य
। सानुरागाभवद्भृशं ॥ रत्नसिंहोऽपि तां दृष्ट्वा । चिंतयामास चेतसि ॥ ३७ ॥ स्वर्णसारान्
गृहीत्वैषा । विधात्रा घटिता ननु ॥ शेषस्वर्णेन मुक्तेन । पुंजो मेरुरजायत ॥ ३८ ॥ विद्याध-
राधिपः प्राह । कुतः कुलपते तव ॥ एषा कन्या मनोज्ञांगी । त्यक्तभार्यादिसंगतेः ॥ ३९ ॥
ततः कुलपतिः प्राह । चरित्रं चित्तचित्रकृत् ॥ अस्त्यस्याः सावधानः सन् । महाराज विभा-
वय ॥ ४० ॥ तथाहि—

विजये पुष्कलावत्या—मत्रास्तींदुपुरी पुरी ॥ नृपः पुरंदरस्तत्र । पुरंदर इव श्रिया ॥ ४१ ॥
सर्वांतःपुरमुख्याभू—त्तत्पत्नी गुणसुंदरी ॥ तत्कुक्षिकमलोद्भूता । राजहंसी सुताभवत् ॥४२॥
उन्मुक्तबालभावा सा । चतुःषष्टिकलाः कलाः ॥ अभ्यस्यंती क्रमाच्छोभो—द्भावनं यौवनं

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

ययौ ॥ ४३ ॥ अन्यदा बंदिनां वक्त्रा–त्सा शुश्रावोज्ज्वलान् गुणान् ॥ पद्मदेवकुमारस्य ।
मारस्येव सुरूपिणः ॥ ४४ ॥ अत्यंतमनुरक्ताभू–त्तस्मिन् हंसीव मानसे ॥ तत्प्राप्तिहेतवे नित्यं
। नगरोद्यानवर्तिनीं ॥ ४५ ॥ देवतां पूजयामास । तं ध्यायन्नेव तिष्ठति ॥ तद्भक्तिरंजिताच-
ख्यौ । प्रत्यक्षीभूय देवता ॥ ४६ ॥ युग्मं ॥ वत्से तथा यतिष्येऽहं । यथा पद्मरथात्मजः ॥
जावी पद्मपुरस्वामी । पद्मदेवो धवस्तव ॥ ४७ ॥ विश्वस्ता तद्वचः श्रुत्वा । सा तस्थौ सुख-
शालिनी ॥ अज्ञाततत्परीणाम–स्तां ददौ जनकोऽन्यदा ॥ ४७ ॥ स्वज्ञृत्यहरिदत्ताय । रूप-
सौज्ञाग्यशालिने ॥ तद्दृज्ञात्वा कन्यिका जज्ञे । मनस्यत्यंतडुःखिता ॥ ४ए ॥ चिंतया सा पि-
शाच्येव । ग्रसिताभूद्विसंस्थुला ॥ कृशदेहाजवत्कृष्ण–पक्षे चंद्रकलेव च ॥ ५० ॥ शुष्यंतीं
तां क्रमाद् ग्रीष्म–समये सरसीमिव ॥ धात्री दृष्ट्वेति पप्रच्छ । वत्से किं दुःखमस्ति ते ॥
॥ ५१ ॥ कथंचित्कथयामास । सापि स्वाजिमतं वरं ॥ धात्र्योक्तं पूर्वमेवैत–द्वत्से नोक्तं कुत-
स्त्वया ॥ ५२ ॥ परमद्याप्युपायं तं । करिष्येऽहं स्वबुद्धितः ॥ पद्मदेवो यथा जर्ता । जवत्या
जविता सुते ॥ ५३ ॥ ततः प्रछन्नमाकार्य । निजं विश्वासजाजनं ॥ जनं प्रैषीत् क्षणाद् धा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वी । पद्मदेवस्य संनिधौ ॥ ५४ ॥ सोऽपि पद्मपुरं गत्वा । नत्वैकांते तमब्रवीत् ॥ कुमार प्रेषितो धात्र्या । राजहंस्या इहास्म्यहं ॥ ५५ ॥ विज्ञापितं तया तेऽदो-ऽमुकस्मिन् वासरे त्वया ॥ त्वरया सायमेतव्यं । वनांतर्देवतागृहे ॥ ५६ ॥ राजाग्र राजहंसी सा । राजहंसीसरित्तव ॥ आगमं प्रार्थयंत्यस्ति । पद्मोल्लासविधायिनः ॥ ५७ ॥ आख्यानश्रवणादेव । पद्मदेवस्य मानसे ॥ उवास राजहंसी सा । राजहंसीव मानसे ॥ ५८ ॥ चचाल सपरिवार । प्राप्ते संकेतिते दिने ॥ वने सोऽश्वादिकं मुक्त्वा । मित्रेणैकेन संगतः ॥ ५९ ॥ आगतो देवतागेहे । स्वयं चास्थात्तदंतरे ॥ अत्रांतरे राजहंसी । कृता पाणिग्रहोचिता ॥ ६० ॥युग्मं॥ स्नापिता सर्वसामग्र्या । विलिप्ता सुविलेपनैः ॥ सर्वांगकृतशृंगारा । साक्षाल्लक्ष्मीरिवाबभौ ॥ ॥ ६१ ॥ वादित्रगीतनृत्याद्यै-र्जायमाने कुतूहले ॥ विवाहाख्ये महे प्राज्ञ-राज्ञा प्रारंभिते सति ॥ ६२ ॥ धात्र्या व्यज्ञापि राज्ञोऽग्रे । देवैषा परिणेष्यति ॥ तदा देवीं वनस्थां सा । प्रथमं पूजयिष्यति ॥ ६३ ॥ राज्ञाज्ञायां प्रदत्तायां । संध्यायां स्वसखीयुतां ॥ रथे निवेश्य तां कन्यां । सा चचाल वनंप्रति ॥ ६४ ॥ एकाकिन्यानया पूजा । कार्यात्रेत्यभिधाय सा ॥ देव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तामंदिरांतस्तं । प्रेक्ष्य द्वारि स्थिता स्वयं ॥ ६५ ॥ पद्मदेवराजहंस्यो–स्तत्र प्रथमदर्शने ॥ योऽभूद्धर्षभरो जाने । तन्मनांस्येव तं विदुः ॥ ६६ ॥ गांधर्वेण विवाहेन । तत्क्षणं परिणीय तां ॥ तद्वेषमर्पयामास । स्वमित्राय नृपात्मजः ॥ ६७ ॥ कुमारः प्रियया युक्त–स्तस्थौ देवकुलांतरे ॥ मित्रं नववधूवेषं । विधायेतश्च निर्गतं ॥ ६८ ॥ विज्ञाप्य संज्ञया धात्र्याः । स्वरूपं सर्वमप्यसौ ॥ रथमारुह्य राजेंद्र–भवने शीघ्रमाययौ ॥ ६९ ॥ लग्ने च तत्क्षणाल्लग्ने । हरिदत्तेन तेन सा ॥ विवाहिता महाभूत्या । पुरंदरनरेंदुना ॥ ७० ॥ मंगलाचारचारेषु । व्यतीतेषु समेष्वपि ॥ हरिदत्तस्तया साकं । संप्राप्तो वासमंदिरे ॥ ७१ ॥ अनेकहास्यलास्यादि–वचनैस्तेन भाषिता ॥ यावत्प्रत्युत्तरं किंचि–त्सा ददौ न नतानना ॥ ७२ ॥ हरिदत्तेन तावत्सा । स्पृष्टा वक्षःस्थले ततः ॥ स ज्ञातः पुरुषाकारः । किमेतदिति विस्मितः ॥ ७३ ॥ कोऽसि त्वमित्यपृच्छच्च । प्राह सा त्वत्प्रियास्म्यहं ॥ तेनोक्तं पुरुषस्पर्शः । किमेवं तर्हि ते तनौ ॥ ७४ ॥ तयोक्तं त्वत्करस्पर्श–प्रभावोऽयमनीदृशः ॥ यतो पुत्रस्य चिंतार्त्त–देहस्य मम वै पितुः ॥ ७५ ॥ कुलदेवतयाख्यायि । राजहंसी सुता तव ॥ हरिदत्तकरस्पर्शा–द्भविष्यत्युत्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मः सुतः ॥ ७६ ॥ युग्मं ॥ दृश्यते सुरसस्पर्शा—द्यो याति सुवर्णतां ॥ तत एव पिता तु-
भ्यं । सेवकायापि मामदात् ॥ ७७ ॥ इत्याकर्ण्य वचोऽनल्प—विकल्पाकुलिताशयः ॥ हरिदत्तो-
ऽभवत्ताव—त्सा समुत्थाय निर्ययौ ॥ ७८ ॥ वेगेन वनमायासी—त्पद्मदेवस्य चामिलत् ॥ स-
हास्यं दत्ततालं च । स्वरूपं सर्वमप्यधात् ॥ ७९ ॥ कलत्रमित्रकहितः । सहितः सेवकैः स्व-
कैः ॥ हयादिषु समारुह्य । कुमारः प्राचलत्ततः ॥ ८० ॥ अथो स हरिदत्तोऽपि । श्वश्रूश्वशु-
रयोः पुरः ॥ गत्वोवाच भवत्पुत्री । पुत्ररूपाधुनाभवत् ॥ ८१ ॥ सविस्मयावूचतुस्तौ । जामा-
तः किमु जल्पसि ॥ असंबद्धं किमेकस्मिन् । भवे सुता सुतो भवेत् ॥ ८२ ॥ ततस्तेन वि-
लक्षेण । प्रोक्तं नववधूदितं ॥ ताभ्यामवाचि रे मुग्ध । वंचितः केनचिद्भवान् ॥ ८२ ॥ सुरो
वा खेचरो वा तां । कन्यामपजहार हा ॥ ततो व्यलोकयद्राजा । सर्वत्र नगरांतरे ॥ ८३ ॥
परं वार्तापि कन्यायाः । यावल्लेभे न कुत्रचित् ॥ ततः सुस्थं मनः कृत्वा । राजा राज्यमपा-
लयत् ॥ ८४ ॥ हरिदत्तोऽपि संतप्त—चित्तस्तस्या वियोगतः ॥ प्रपेदे तापसीं दीक्षां । तपांस्यु-
ग्राणि सोऽतपत ॥ ८५ ॥ अचिरेणापि कालेन । मृत्वा स व्यंतरोऽभवत् ॥ इतश्च पद्मदेवोऽ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पि । गछन् प्राप महाटवीं ॥ ८६ ॥ वर्षंती शरधाराभि—रकस्मात्तावदुत्थिता । धाटी
धाराधरेणाभा । ज्वलदस्त्रतडिद्युरा ॥ ८७ ॥ कुमारसेवकैः साकं । चिरं युद्धमजायत ॥
बहुलैः शबरैः केचित् । पंचत्वं प्रापिता भटाः ॥ ८८ ॥ केचिद्भयविभीतांगा । दश दिक्षु प-
लायिताः ॥ एकाक्येव कुमारोऽस्थात् । प्रियारक्षणतत्परः ॥ ८९ ॥ युद्ध्यमानेन संरंभा—
द्धाटी निर्धाटिताखिला ॥ बलिष्ठेन कुमारेण । मेघमालेव वायुना ॥ ९० ॥ भृत्यानामूर्ध्वकृ-
त्यानि । कृत्वा स प्राचलत्ततः ॥ एकया प्रियया युक्तः । स्वकीयनगरंप्रति ॥ ९१ ॥ गछन् क्र-
मेण संप्राप्तः । सोऽस्मिन्नेव तपोवने ॥ राजहंसी पथि श्रांता । जगाद प्राणवल्लभं ॥ ९२ ॥
स्वामिन्नस्मिन् घने रम्ये । रम्यते कियतो दिनान् ॥ लतानां मंडपा अत्र । संति सद्गृह-
सन्निभाः ॥ ९३ ॥ नर्तक्य इव दृश्यंते । भ्रमद्भ्रमरहुंकृतेः ॥ कुर्वत्यो नित्यसंगीत—मिह
वाताहता लताः ॥ ९४ ॥ फलभारनतीभूता—श्चूतादितरवोऽप्यमी ॥ अर्थयंत्यतिथिं नूनं ।
रक्षितुं त्वां गृहागतं ॥ ९६ ॥ ग्रीष्मोऽपि सांप्रतं भीष्मः । काल एष समागतः ॥ अस्मिन्न
गम्यते धन्यैः । पथिकैः पथि कैश्चन ॥ ९७ ॥ एवमस्त्विति जल्पित्वा । कुमारस्तत्र तस्थिवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न् ॥ स्वपन् क्रीडन् लताखंड—मंडपेषु गृहेष्विव ॥ ९८ ॥ फलाहारतृप्तकायः । कुमारः स निरामयः ॥ भुंजानो विषयांस्तत्र । तस्थौ स्वप्रियया सह ॥ ९९ ॥ दृष्ट्वा तौ दंपती स्मृत्वा । तन्निर्मितविडंबनं ॥ उल्लसद्वैरवारेण । चिंतितं तेन चेतसि ॥ ६०० ॥ स एष येन दुष्टेन । विरहो मे शुजस्त्रियः ॥ पातितोऽस्यास्तदस्यापि । तमेवेह करोम्यहं ॥ १ ॥ यतः कृते प्रतिकृतं कुर्या—त्सर्वथा न क्षमा वरं ॥ पादैर्निहन्यते हीनै—रपि सर्वसहाः क्षमाः ॥ २ ॥ ततः फलान्युपादातुं । पद्मदेवो ययौ वने ॥ तावद्देवः प्रियापार्श्वे । व्यधात्परनराकृतिं ॥ ३ ॥ क्षणात्फलान्युपादाय । प्रत्यायातो व्यलोकयत् ॥ कुमारः परपुंसा तां । क्रीडंतीं देवमायया ॥ ॥ ४ ॥ तत्कालोत्पन्नमन्युः स । मूलादुन्मूल्य पादपं ॥ अनेनाहन्मि हंतैतौ । चिंतयन्नेवमाददे ॥५॥ चिंतितं च पुनश्चित्ते—ऽनर्थमेतं करोमि किं ॥ महेलारक्तचित्तस्या—वहेला कस्य नो जवेत् ॥ ६ ॥ पितृमातृसुमित्रादे—र्वियोगो यन्ममाजनि ॥ तत्र सर्वत्र पापिष्टा । दुष्टैषैव निबंधनं ॥ ७ ॥ पूर्वं स्वमातृपित्रोर्या । वंचनं कुरुतेस्म सा ॥ करिष्यति कथं मे नो । विमृष्टं न मयेत्यपि ॥ ८ ॥ किंच—स्त्रियो रमंते मनसान्यपुंसा । वाचापरेण क्रिययापरेण ॥सूर्यप्रिया

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत्येक चरित्रं १एए

किं नलिनी न हंसैः । संगं च भृंगैः कुरुतेंतरंगं ॥ ए ॥ अनेन कृतसंकेता । विश्रामस्य मि-
षादिह ॥ एषा रक्तात्यहो स्त्रीणां । कपटं किंचिदुत्कटं ॥ १० ॥ तदेतां बहुपापां किं । हत्वा
पापी भवाम्यहं ॥ त्यक्तभार्यो विचिंत्येति । चलितस्तत्प्रदेशतः ॥ १२ ॥ गछतस्तस्य मार्गात-
श्चारणश्रमणोऽमिलत् ॥ प्रबुद्धस्तद्वचोभिः स । व्रतमार्हतमाश्रयत् ॥ १३ ॥ सममाणिक्यलो-
ष्टोऽथो । विशिष्टतपसोज्ज्वलः ॥ खड्गधारासमं सम्यक् । संयमं सोऽप्यपालयत् ॥ १४ ॥ अ-
थ सा राजहंसी स्व-मपश्यंती प्रियं चिरात् ॥ साशंका सर्वदेशेषु । व्यलोकत वनांतरे ॥
॥ १५ ॥ तं काप्यनीक्षमाणा सा । भयोद्भ्रांताऽपतद्भुवि ॥ निश्चेष्टा काष्टवत्कष्टा-द्वाताह-
तलतेव सा ॥ १६ ॥ क्षणादासाद्य चैतन्यं । विललापेति दुःखिता ॥ प्राणनाथ कथं त्यक्ता
। निराधारात्र कानने ॥ १७ ॥ पितृमात्रादिकं मुक्त्वा । भवानेवाश्रितो मया ॥ भविष्यामि
कथं नाथ । त्यक्ताथ भवताप्यहं ॥ १८ ॥ निर्दोषामशरण्यां मा—मरण्ये त्यजतस्तव ॥ नौ-
चिती यत्सदोषापि । त्याज्या कृत्वा परीक्षणं ॥ १ए ॥ सनाथं नाथ भवता य-दासीन्मे
त्रिदिवोऽधिकं ॥ तदेवैतद्वनं जज्ञे-ऽधुना प्रेतवनाधिकं ॥ २० ॥ अहं गर्भवती बाला । वियु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्का प्राणवल्लनात् ॥ रे दैव विहिताऽरण्ये । कारुण्यं तन्न ते हृदि ॥ २१ ॥ इत्यादि सुचिरं कार्त्तं । विलपंती विलोकिता ॥ एकया मम तापस्या । पृष्टा कष्टनिबंधनं ॥ २२ ॥ अवदश्रु-पयोधारा । सरसीभूतभूतला ॥ सा गद्गदाक्षरं सर्वं । स्वरूपं तत्पुरो जगौ ॥ २३ ॥ तापस्या सा वयस्येव । नीतास्मिन्नाश्रमांतरे ॥ पुरो मम समग्रोऽपि । तद्वृत्तांतो निवेदितः ॥ २४ ॥ मया सा नणिता वत्से । मा रोदीर्नेव सुस्थिता ॥ स्वमातृरिव पश्यैतां—स्तापसांस्तिष्ट चाश्रमे ॥२५॥ इत्युक्ता वत्सलैर्वाक्यै—र्मनाग्मनसि सुस्थिता ॥ तस्थावत्राश्रमे गर्भं । वहंती पितृगेहवत् ॥ २६ ॥ संप्राप्ते समयेऽसूत । सा सुतामद्नुताकृतिं ॥ सूतिरोगोरगग्रस्ता । मृत्यवस्थामवा-प सा ॥ २७ ॥ इतश्च विहरन् भूमौ । पद्मदेवमुनीश्वरः ॥ अवधिज्ञानमासाद्य । स्वस्वरूपं व्यलोकयत् ॥ २८ ॥ राजहंसीं सतीं ज्ञात्वा । तच्च व्यंतरचेष्टितं ॥ हा मया सा सुशीलापि । कलंकेन कलंकिता ॥ २९ ॥ असद्दोषाधिरोपेण । यद्दुःखं लनतेऽपरः ॥ अध्यारोपकलोकस्य । ततोऽनंतगुणं नवेत् ॥ ३० ॥ तदद्यापि सुशीलां तां । द्रागत्वा क्षमयाम्यहं ॥ चारणर्षि-युत इति । विचार्यात्र स आययौ ॥ ३१ ॥ अंत्यावस्थागतां तां स । दर्शनेन प्रमोदयन् ॥ कु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विकल्पं निजं प्रोच्य । क्षमयामास सादरः ॥ ३२ ॥ परलोकपथःपांथ–पाथेयेन सहोदरं ॥ परमेष्टिनमस्कारं । तस्यै मुनिवरो ददौ ॥ ३३ ॥ प्रपद्य ज्ञावसारं सा । शुज्ञध्यानपरायणा ॥ पंचत्वं प्राप्य सौधर्मे—देवलोके सुरोऽज्ञवत् ॥ ३४ ॥ अवधिज्ञानविज्ञात–निजपूर्वज्ञवः सुरः ॥ आगत्य दीप्यमानांगो । ननाम मुनिपुंगवं ॥ ३५ ॥ पुरोऽस्माकं समस्तानां । स्ववृत्तांतपुरस्सरं ॥ परमेष्टिनमस्कार–फलमाख्यातवान् सुरः ॥ ३६ ॥ विधाय राजहंस्याश्च । रूपं पुत्रीमपालयत् ॥ स्नेहो यस्मादपत्येषु । सर्वस्नेहशिरोमणिः ॥ ३७ ॥ विजहार महीपीठे । पद्मदेवमुनीश्वरः ॥ ज्ञवाब्धौ पततां प्राण–ज्ञृतां त्राणकृते कृती ॥ ३८ ॥ तदादि तापसैः सर्वै–र्ज्ञावपूर्वं निरंतरं ॥ परमेष्टिनमस्कारो । ध्यायते गुण्यते सदा ॥ ३९ ॥ उन्मुक्तबालज्ञावां तां बालां मह्यं प्रदाय सः ॥ सुरः स्वस्थानकं प्राप । पुत्रीवावर्धतोटजे ॥ ४० ॥ ज्ञो रत्नसिंह राजेंद्र । धन्या कन्या तवातिथेः ॥ किंचित्प्रत्युपकाराय । मयेयमुपढौकिता ॥ ४१ ॥ तत्पाणिग्रहणेनाद्य । जन्मास्याः सफलीकुरु ॥ सौंदर्यादिगुणाः स्त्रीणां । निष्फलाः सत्पतिं विना ॥ ॥ ४२ ॥ यदादिशथ यूयं त–त्प्रमाणमिति जल्पता ॥ रत्नसिंहनरेंद्रेणां–गीकृता वनसुंदरी

॥ ४३ ॥ विवाहसमयं पुत्र्या । ज्ञात्वा तज्जननीसुरः ॥ अचीकरत्तयोरेत्य । पाणिग्रहणमुत्स-
वैः ॥ ४४ ॥ राजेंद्र रक्षणीयेयं । देहछायेव पार्श्वगा ॥ इत्युक्त्वा स सुरः प्राप्तो । निश्चिंतो
निजमाश्रयं ॥ ४५ ॥ कुलपतिश्च सत्कृत्य । खेचरेंद्रं व्यसर्जयत् ॥ सोऽपि प्राचलदारोप्य ।
विमाने वनसुंदरीं ॥ ४६ ॥ गत्वा शाश्वतचैत्येषु । श्रीमन्नंदीश्वरादिषु ॥ नत्वा स्तुत्वा पूज-
यित्वा । जिनान् पुण्यं नृपोऽर्जयत् ॥ ४७ ॥ व्याघुट्यात्मीयनगरं । प्रत्यागछन्निरैक्षत ॥ विज-
ये पुष्कलावत्या—मेकस्मिन्नगरे नृपः ॥ ४८ ॥ मिलितानेकभूपालं । बद्धोच्चैर्मंचमंडलं ॥ स्वर्ण-
स्तंभादिशोभाढ्यं । स्वयंवरणमंडपं ॥ ४९ ॥ युग्मं ॥ कौतुकं दृष्टुकामेन । वने परिकरं नि-
जं ॥ निवेश्यैकाकिना राज्ञा । तत्र प्रावेशि मंडपे ॥ ५० ॥ विशिष्टासूपविष्टासु । वसुधापा-
लपंक्तिषु ॥ ज्येष्टं श्रेष्टं गुणैः पुष्प—सिंहं दृष्ट्वा स हृष्टवान् ॥ ५१ ॥ एकं पुरुषमपृछ—त्किमेत-
त्परमं पुरं ॥ को वा नृपोऽत्र का कन्या । या भवित्री स्वयंवरा ॥ ५२ ॥ तेनोक्तं गुणनामभ्यां
। लक्ष्मीपुरमिदं पुरं ॥ लक्ष्मीशेखरराजस्य । कन्या कुसुममालिका ॥ ५३ ॥ तावदेव समाया-
ता । तत्र द्योतितदिक्तटा ॥ कन्या कुसुममालाख्या । सख्या दर्शितमार्गगा ॥ ५४ ॥ वक्त्रेण

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

शशिनं जित्वा । तारास्तद्दयिताः समाः ॥ पुष्पमालामिषाद्बध्वा । यावद्धत्करपंजरे ॥ ५५ ॥
पृष्टमुक्तान् श्यामयंती । क्षामयंती ततस्ततिं ॥ द्योतयंती पुरःस्थांश्च । शुशुभे दीपिकेव
सा ॥ ५६ ॥ सख्युक्तान् राजराजीनां । गुणान्नामानि शृण्वती ॥ पुष्पसिंहनरेंद्राग्रे । समा-
गात्सा शुभाकृतिः ॥ ५७ ॥ तं प्रेक्ष्य प्रेमपूर्णा सा । यावत्तिष्ठति तत्पुरः ॥ श्येनश्चिल्ह्नीमिवा-
दायो-ड्डीय वव्राज खेचरः ॥ ५८ ॥ महाखगाभिधस्ताव-त्कोलाहल उदछलत् ॥ पश्यत्स्वेव
नरेंद्रेषु । खेचरो दूरतामगात् ॥ ५९ ॥ लक्ष्मीशेखरराजेन । प्रोक्तं सर्वान् नृपान्प्रति ॥ हि-
यमाणामिमां पुत्रीं । प्रत्यानयति योऽधुना ॥ ६० ॥ मया तस्मै प्रदातव्या । कन्येयमिति
निश्चयः ॥ स्वस्वशक्त्यनुसारेण । तद्यतध्वमहो नृपाः ॥ ६१ ॥ इत्याकर्ण्य समे मौन-माधा-
यास्थुरधोमुखाः ॥ प्रांशुप्राप्ये फले को वा । वामनो यत्नमाचरेत् ॥ ६२ ॥ अग्रे मम बृह-
द्भ्रातु—र्हृतेयं ह्रीरियं मम ॥ तस्मादत्र निजभ्रातुः । साहाय्यं किंचिदादधे ॥ ६३ ॥ एवं वि-
चिंत्य निर्माय । विमानं रत्नसिंहराट् ॥ कृत्वा रूपपरावर्तं । पुष्पसिंहपुरोऽभ्यधात् ॥ ६४ ॥
स्वामिन्नस्मिन् विमाने त्व—मारोह क्षणमात्रतः ॥ आनीयते यथा कन्या । खेचराधमपा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुतः ॥ ६५ ॥ सविस्मयेषु भूपेषु । क एष इति चिंतयन् ॥ तत्रारूढः प्रौढतेजाः । पुष्पसिंहो धनुर्वहन् ॥ ६६ ॥ वेगेन रत्नसिंहेन । स नीतः खेचरांतिकं ॥ तेन मर्मणि बाणेन । वज्रेणेव हतो हृदि ॥ ६७ ॥ स तत्याज क्षणात्प्राणान् । कन्या च करपंजरात् ॥ पतंती रत्नसिंहेन । धृता पाणी प्रसार्य सा ॥ ६८ ॥ आरोपिता समानीय । विमाने पुष्पसिंहराट् ॥ प्रत्यागात्तत्पितुर्गेहे । राजावाप परां मुदं ॥ ६९ ॥ लक्ष्मीशेखरराजेंद्रः । कृत्वा वर्धापनं मुदा ॥ अकार्षीद्शोभने लग्ने । विवाहं विहितोत्सवं ॥ ७० ॥ पुष्पसिंहनरेंद्राय । दत्वा दानमनर्गलं ॥ अमूमुचत्सुतापाणिं । सत्कारं चाकरोद् घनं ॥ ७१ ॥ सर्वे सत्कृत्य सत्कृत्य । विसृष्टास्तेन भूभुजः ॥ ययुर्निजं निजं स्थानं । राजानो बहुमानिताः ॥ ७२ ॥ पुष्पसिंहोऽन्यदापृच्छ–द्रत्नसिंहं कृतादरः ॥ को भवान् कल्पवृक्षाभः । परोपकृतिकर्मठः ॥ ७३ ॥ तेनोक्तं निजमेवैत–त्कार्यं कात्रोपकारिता ॥ मां नो जानासि किं बंधो । रत्नसिंहं निजानुजं ॥ ७४ ॥ इति जल्पन् कृतस्वाभा–विकरूपः सहोदरं ॥ आलिंग्य वनसुंदर्या । भाववृत्तांतमभ्यधात् ॥ ७५ ॥ तावुभौ भ्रातरौ तत्र । कियतोऽपि दिनान् स्थितौ ॥ स्वस्वप्रियायुतौ प्राप्तौ । स्वस्वपत्तनयोश्चिरात् ॥

का. कै. सी.
कोबा

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ ७६ ॥ पंचप्रकारविषया—मृतरसनिमग्नयोः ॥ अभूवन् भूरयः पुत्रा—स्तयोः कुलविभूषकाः ॥ ॥ ७७ ॥ व्यतिक्रांते घने काले । रत्नसिंहनरेश्वरः ॥ आरुह्य पुष्पसिंहं स्वं । विमानं स्वर्गिरिं ययौ ॥ ७८ ॥ तत्र शाश्वतचैत्यानि । वंदित्वा नक्तिनाजिनौ ॥ जिनानां पुरतो नृत्य—गीतगानादि चक्रतुः ॥ ७९ ॥ आत्मनोः कृतकृत्यत्वं । मन्यमानावुनावपि ॥ गतौ श्रीमंदिरपुरे ॥ सुखिनौ तत्र तिष्ठतुः ॥ ८० ॥ अन्यदा लब्धचारण—लब्धिरब्धिर्गुणश्रियां ॥ स एव पद्मदेवर्षि—राययौ तत्र पापहृत् ॥८१॥ श्रुत्वा तदागमं गत्वा । नत्वा रोमांचकंचुकौ ॥ तद्वाणीरसमापातुं । स्थितौ बद्धांजली उनौ ॥ ८२ ॥ तद्यथा—कल्पांतार्क इवोत्तापी । विरसश्चार्कपुष्पवत् ॥ अर्कतूल इवासारः । संसारः कस्य शर्मणे ॥ ८३ ॥ नवारण्ये जनान्मोहो । धूर्तवध्धूर्तयत्यसौ ॥ ईषद्विषयसौख्यानि । प्रदर्श्याग्रे स दुःखदः ॥ ८४ ॥ क्षणदृष्टविनष्टानि । सुखानि सकलान्यपि ॥ इंद्रजाल इवालीके । संसारे संति सर्वथा ॥८५॥ जनो मोहमयीं पीत्वा । मदिरां गतचेतनः ॥ एषोऽहं वसु चैतन्मे । जानात्येतद्विमोहितः ॥ ८६ ॥ राज्यं वैरिजनैरगंजिततरं गर्जद्गजै राजितं । कांताः कांतगुणोज्ज्वला ज्वलनवत्तेजस्विनः सूनवः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रंगझंगतरंगभंगसुभगा कीर्तिर्नरिनर्ति य-त्तत्सर्वं सुकृतं कृतं सुकृतिने दत्ते सुपर्वद्रुवत् ॥७७॥
इत्यादि देशनां श्रुत्वा । प्रबुद्धौ तावुभावपि ॥ ऊचतुर्भगवन् किं कि-मावाभ्यां सुकृतं कृतं
॥ ७८ ॥ भवांतरे यदेतस्मिन् । भवे राज्यमखंमितं ॥ आवाभ्यां भुज्यतेस्मैत-त्ततो मुनिरभा-
षत ॥ ७९ ॥ गुणचंद्रो गुणधर । इतिसंज्ञौ सहोदरौ ॥ पूर्वभवे युवामास्तां । भक्तौ भगव-
दंह्रिषु ॥ ८० ॥ अभूद्या गुणचंद्रस्य । गुणश्रीसंज्ञिका प्रिया ॥ जज्ञे कुसुममाला सा । द्विती-
या गुणवत्यपि ॥ ८१ ॥ पुत्री मे रत्नसिंहस्य । पत्नीयं वनसुंदरी ॥ श्रुत्वेति जातिस्मरणं । च-
तुर्णामप्यजायत ॥ ८२ ॥ वैराग्यरंजितात्मानौ । प्रव्रज्यां लातुमुद्यतौ ॥ तौ व्यज्ञपयतां प-
द्म—देवमेवं मुनीश्वरं ॥ ८३ ॥ भगवन् विहरन्नास्ते । कुत्रामृतयशा मुनिः ॥ स्ववाणीशंख-
शब्देन । मोहनिद्रां व्यपोहयन् ॥ ८४ ॥ मुनिनोक्तं भवत्तातः । स संयमपयोमुचा ॥ उप-
शाम्य कर्मदाहं । निर्वाणं प्राप संप्रति ॥ ८५ ॥ प्रदीपः केवलं यत्र । शय्या सिद्धिशिलोज्ज्व-
ला ॥ तत्र मुक्तिस्त्रिया साकं । क्रीमन्नस्ति भवत्पिता ॥ ८६ ॥ ताभ्यामवाचि हे देव । स्थेयं
तावदिह त्वया ॥ आवां यावदिहायावः । कृत्वा राज्यस्थितिं निजां ॥ ८७ ॥ निजतातपदं

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

शून्य—मावान्यामाश्रयिष्यते ॥ गुरुणांगीकृते वाक्ये । स्वं स्वं राज्यं गताबुभौ ॥ ए८ ॥
राज्ये निजं निजं पुत्रं । संस्थाप्य परमोत्सवैः ॥ तौ गत्वा पद्मदेवांते—ऽगृह्णीतां सप्रियौ व्रतं
॥ एए ॥ वैयावृत्त्यं गुणगुरुगुरोराचरंतश्चरंतः । पृथ्वीपीठे विगतममतामोहमायाविकाराः ॥ ल-
ब्धुं साधूचितगुणमणीन् गाहमानाः श्रुताब्धिं । चत्वारोऽपि व्रतमपमलं पालयामासुरेते ॥
॥ १०० ॥ चतुर्भिरधिकाशीति—पूर्वलक्षान् स्थिता गृहे । व्रते षोडशसर्वायुः । पूर्वकोटिमपा-
लयन् ॥ १ ॥ संलेखनाशोषितपूर्वपापा । अंते कृतोद्यत्परमेष्ठिजापाः ॥ जाताः सुरास्तेऽच्युत-
देवलोके । महर्द्धिका इंद्रसमाः समेऽपि ॥ २ ॥ इति श्रीप्रत्येकबुद्धचरित्रे नमितृतीयजववर्ण-
नो नाम तृतीयः प्रकारः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ चतुर्थः प्रकारः प्रारभ्यते ॥

अस्त्यत्र धातकीखंडं । कुंडलाजमिलास्त्रियः ॥ ज्योतिष्करत्नखचितं । जगतीपाळ्यलंकृतं
॥१॥ तत्रोत्तरजरतार्धे । नगरं रत्नमंदिरं ॥ इंदिरेंदीवरं त्यक्त्वा । मंदिरं यत्र निर्ममे ॥२॥ शूर-
सेनो नृपस्तत्र । शूरः सूरोऽरितामसे ॥ तस्यान्नूच्चंद्रकांताख्या । कांता कांतगुणोज्ज्वला ॥३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वृषभेभकुंभिसिंहान् । स्वप्ने सापश्यदन्यदा ॥ काले चाजीजनत्सूनुं । तेजःपुंजविराजितं ॥४॥ तस्य प्रतिष्ठितं नाम । रामसेन इतीदृशं ॥ क्षितीशेनोत्सवं कृत्वा । स च वृद्धिं शनैरगात् ॥ ५ ॥ कलाकलापमभ्यस्य—न्निरस्यन् हीनसंगतिं ॥ स क्रमात्कामिनीकामो-द्दीपनं यौवनं ययौ ॥ ६ ॥ तस्यैव भूमिपालस्य । रूपसौभाग्यसंपदा ॥ अद्वितीया द्वितीयाभू–त्सूरकांता-भिधा प्रिया ॥ ७ ॥ वृषभेभमृगाराति–हयाग्निशशिभास्करान् ॥ सूचकान् वासुदेवस्योत्पत्तेः स्वप्ने ददर्श सा ॥ ८ ॥ आरूपयत्प्रियस्याग्रे । विचार्यैवं बभाण सः ॥ प्रिये तव सुतो नूनं । वासुदेवो भविष्यति ॥ ९ ॥ हर्षोत्कर्षवती गर्भं । सा बभार ततो हृदः ॥ दोहदान् पूरयंती स्वान् । प्रसूता सुतमुत्तमं ॥ १० ॥ पुत्रजन्मोत्सवं कृत्वा । दत्वा दानमनुत्तरं ॥ हरिषेण इति नाम । राजा सूनोरतिष्टपत् ॥ ११ ॥ पश्चान्माद्रियतेऽस्मान्नो । रूपवत्स्त्रीविमोहितः ॥ इति बाल्येऽपि सर्वास्त–मालिलिंगु कलाः किल ॥ १२ ॥ हरिषेणरामसेनौ । प्रीतिमंतौ परस्परं ॥ मीलनोन्मीलने नेत्र—युग्मवत्कुरुतःस्म तौ ॥ १३ ॥ इंद्रोपेंद्राविवायातौ । पृथ्वीं तौ यौवनाश्रितौ ॥ दृष्ट्वाश्विनीकुमाराभौ । कैः कैर्नाकारि विस्मयः ॥ १४ ॥ अथो समुद्रदत्ता-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ख्यौ । रूपवान् दशवार्षिकः ॥ तत्र प्राप्तो नृपपुत्रो । युतः सुमतिमंत्रिणा ॥ १५ ॥ मत्पुत्रयो-
र्यं मित्र—मनुरूपः सुरूपवान् ॥ नावीति शूरसेनेन । दत्वा मानं स रक्षितः ॥ १६ ॥ नृ-
पपुत्रं हरिषेणं । प्रणम्योपाविवेश सः ॥ तेन पृष्टं ततो राज्ये । देशोऽस्ति कुशलं तव ॥ १७ ॥
प्रत्यजाणीत्ततः सोऽपि । देदेव कुशलं तव ॥ प्रप्रसादेन सर्वत्र । देदेहादौ विविद्यते ॥ १८ ॥
तत् श्रुत्वा हरिषेणेन । चिंतितं विधिना कथं ॥ नररत्नमिदं हाहा । वाग्जडत्वेन दूषितं ॥
॥१९॥ दाता नीरदवद्विवेकरहितः संतापकः प्राणिनां । तेजस्वी रविवद्द्विजार्ति जडतां रम्या-
कृतिश्चंद्रवत् ॥ चंचच्चंदनवत्परोपकरणोदारो द्विजिह्वावृतः । प्रायः शस्तसमस्तवस्तुविषये दो-
षं विधत्ते विधिः ॥ २० ॥ ततः सुमतिमंत्र्यूचे । पराभिप्रायवेदकः ॥ कुमारास्य महत्यस्ति ।
कथैकांतं विधेहि तत् ॥ २१ ॥ तेन चूसंज्ञया लोके । दूरमुत्सारिते सति ॥ स्वकुमारस्य वृ-
त्तांतं । मंत्री वक्तुं प्रचक्रमे ॥ २२ ॥ तथाहि—

अस्ति लक्ष्मीपुरं नाम । पुरं परममुत्तमं ॥ लक्ष्मीदेवो नृपस्तत्र । पवित्रो देवतेंद्रवत् ॥
॥ २३ ॥ तस्याभूद्रूपसंपन्ना । देवी भुवनसुंदरी ॥ समं तया सदा क्रीडन् । स दिनान्यत्यवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ह्यत् ॥ २४ ॥ अथ चंद्रोज्ज्वलयशा—स्तत्र चंद्रयशा इति ॥ उत्कृष्टो वसति श्रेष्ठी । तस्य चंद्रमती प्रिया ॥ २५ ॥ तस्या विनीततनयोऽजनि देवदिन्नो । यद्दाननिर्जित इवातितरां सकष्टः ॥ संमूर्छितोऽब्धिलहरीजलसिच्यमानो—ऽप्यासादयेत्सुरमणिर्न हि चेतनत्वं ॥ ॥ २६ ॥ सोऽन्यदा धनदत्तस्य । तनयां विनयांचितां ॥ परिणिन्ये मनोज्ञांगीं । देवीवद्देवसुंदरीं ॥ २७ ॥ तौ वनं यौवनं प्राप्तौ । गत्वा केलीमनुत्तरां ॥ कुर्वाणावुन्नयोः पुंसो—र्वचांस्यश्रृणुतामिति ॥ २८ ॥ उक्तमेकेन धन्योऽयं । देवदिन्नो धनं निजं ॥ भुंजानश्च ददानश्च । फलं लात्यस्थिरश्रियः ॥ २९ ॥ यतः—क्षीरेण नीरेण नयेन मत्या । दानेन मानेन धनेन गत्या ॥ विजांति गोकूपमहीपमंत्रि—धनेश्वरक्षत्रियपूरुषाश्च ॥ ३० ॥ वृद्धेन परिणीता स्त्रीः ।लक्ष्मीः कृपणसंचिता ॥ फलावलीव वृक्षाणां । परैरेव हि भुज्यते ॥ ३१ ॥ तावदुक्तं द्वितीयेन । धिगमुं जननीसमां ॥ जनकोपार्जितां लक्ष्मीं । यो भुंक्ते गतह्रीरिह ॥ ३२ ॥ यतः—मातृतुल्या पितुर्लक्ष्मी—र्बाल्ये वासस्तया समं ॥ शोभते यौवनेऽप्येवं । कुर्वन् कैः कैर्न निंद्यते ॥ ॥ ३३ ॥ तद्वाक्यं देवदिन्नस्य । सप्रियस्यापि मानसं ॥ अभिनद्बाणवत्तीषें । स च तूर्णमघू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्पयत् ॥ ३४ ॥ ततस्तातांतिकं गत्वा । स प्राह पितरादिश ॥ मां विदेशाय येनाह—मर्जयामि स्वयं श्रियं ॥ ३५ ॥ तातेनोक्तमहो वत्स । तवेछा केन रुध्यते ॥ परं क्वैतछरीरं ते । कदलीगर्जकोमलं ॥ ३६ ॥ पाषाणकर्कशांगांगि—गम्या मार्गाः क्व ते सुत ॥ विघ्नक्लेशजयान्नामुं । तवादेशं दिशाम्यहं ॥ ३७ ॥ अत्राणि देवदिन्नेन । श्रियः स्युर्नोद्यमं विना ॥ कोमलं च वपुर्जाति । स्त्रीणां पुंसां पुनर्न हि ॥ ३८ ॥ विघ्नशंका न कर्तव्या । विदेशं व्रजतो मम ॥ आकाशे चरतो जानोः । स्खलना किं क्वचिद्भवेत् ॥ ३९ ॥ इत्यत्यंताग्रहं ज्ञात्वा । पुत्रस्य जनको ददौ ॥ विदेशगमनादेशं । तस्मायादेशवर्तिने ॥ ४० ॥ ततो विदेशयात्रायै । सोऽपृछद्देवसुंदरीं ॥ बजाण साथ हे नाथ । युक्तमेतद्भवादृशां ॥ ४१ ॥ उत्पत्तिस्थानके हीनाः । क्षीयंते ध्वांक्षवत्क्षितौ ॥ आक्रमंत्यखिलां क्षोणीं । पादैर्जानुवछुत्तमाः ॥ ४२ ॥ श्रुत्वेति देवदिन्नस्य । कुविकल्पो हृदंतरा ॥ उत्पादि जवत्येषा । न नूनं शीलशालिनी ॥ ४३ ॥ या जहर्षानुमेने च । मद्देशांतरवार्तया ॥ पत्युः प्रवासमाकर्ण्य । सत्यः स्युः साश्रुलोचनाः ॥ ४४ ॥ सतीनां संकुचत्यास्यं । विदेशं व्रजति प्रिये ॥ पद्मिनीनामिव क्षीपां—तरं गछति जास्वति ॥

॥ ४५ ॥ कुविकल्पं धरन्नेवं । द्रव्योपार्जनहेतवे ॥ प्रस्थानमकरोद्देव–दिन्नो नगरसंनिधौ ॥
॥ ४६ ॥ तावत्सुस्फारशृंगारा । तत्रागाद्देवसुंदरी ॥ विनयेन पतिं नत्वा । सा बद्धांजलिरभ्य-
धात् ॥ ४७ ॥ स्वामिन् देहि स्वहस्तेन । तांबूलं मह्यमादरात् ॥ तांबूलप्रमुखं भोग्ये । पुनः
प्रत्यागते त्वयि ॥ ४८ ॥ स्नानांगरागमुख्यं च । विधातव्यं–तदैव मे ॥ त्वद्धस्तेनैव मद्वेणी–
बंधमोक्षो भविष्यति ॥ ४९ ॥ षष्ठांते पारणं कार्यं । तच्चामाम्लैर्निरंतरं ॥ षण्मासांते च मर्त-
व्यं । तदा चेन्न त्वमागतः ॥ ५० ॥ श्रुत्वेति चिंतितं तेन । प्रत्याययति मामियं ॥ संति स्त्री-
णां चरित्राणि । मंजीराणि समुद्भवत् ॥ ५१ ॥ तथापि जनदाक्षिण्या–त्तस्यै तांबूलमार्पयत्
॥ सापि धर्मरता गत्वा । गेहे शीलमपालयत् ॥ ५२ ॥ कुविकल्पं धरन्नेव । देवदिन्नोऽचल-
त्ततः ॥ गच्छन् क्रमेण संप्राप्त–स्तीरे नीरनिधेरयं ॥ ५३ ॥ अनेकवस्तुभिर्भृत्वा । समारुह्य
च स स्वयं ॥ जलधौ सपरीवारो । यानपात्रमपूरयत् ॥ ५४ ॥ अनुकूलेन वातेन । प्रेरितो गु-
रुणेव सः ॥ दक्षः शिष्यश्रुतस्येवां–भोधेः मध्यमगाहत ॥ ५५ ॥

इतः शीलवती हर्म्य—चंद्रशालातले स्थिता ॥ धर्मध्यानरताहान्य—वाहयद्देवसुंदरी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५६ ॥ सान्यदैकेन केनापि । खेचरेण विलोकिता ॥ देवताधिकरूपायां । तस्यां सोऽतीव-मोहितः ॥ ५७ ॥ अवतीर्य नजोदेशा—दर्थयामास तामिति ॥ योगिनीव किमेकाग्र–चित्ता ध्यायसि सुंदरि ॥ ५८ ॥ ध्यानस्य हि फलं धर्मो । जोगा धर्मस्य चोत्तमाः ॥ तान् जुंक्व मयका साकं । पूरयस्व मनीषितं ॥ ५९ ॥ अहं पवनवेगाख्यो । विद्याधरनराधिपः ॥ त्वडूपदर्शनाक्षिप्त–चित्त आगां त्वदंतिकं ॥ ६० ॥ इत्यादिचाटुवाक्येषु । तेनोक्तेषु बहुष्वपि ॥ प्रत्युत्तरं ददौ नो सा । नापश्यत्तस्य संमुखं ॥ ६१ ॥ रुष्टो बलाद् ग्रहीतुं ता—मुत्तस्थौ दुष्टधीर्यदा ॥ तावदैक्त शीलेन । मलशालावृतां स तां ॥ ६२ ॥ अक्रमस्तां समादातुं । सिक्कात्पतितोतुवत् ॥ विलक्षः प्राह रोषेण । खेचरो देवसुंदरीं ॥ ६३ ॥ आः पापेऽहं हनिष्यामि । गत्वेतस्तव वल्लजं ॥ मदवज्ञाफलं दुःखं । तत आजन्म जोक्ष्यसे ॥ ६४ ॥ ततस्ततः समुत्पत्या—गत्य नीरधिमंतरा ॥ सोऽकार्षीद् दुर्दिनं देव–दिन्नप्रवहणोपरि ॥ ६५ ॥ लम्नो रुधिरधारानि –र्वृष्टिं कर्तुं स तत्क्षणं ॥ विद्याबलेन वायुं च । प्रचंडं स मुमोच वै ॥ ६६ ॥ उदछलंस्तरंगौघा । उत्तुंगाः शैलशृंगवत् ॥ लोका व्याकुलतां नेजु—र्यानपात्रांतरस्थिताः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६७ ॥ देवदिन्नोऽस्मरत्पंच–परमेष्टिनमस्कृतिं ॥ तावद्विद्याधरेणैव–मुच्चैःशब्देन जल्पितं ॥
॥ ६८ ॥ अहं विद्याधराधीश–स्त्वत्प्रियादोषरोषितः ॥ एष हन्मि देवदिन्न । त्वां वराकं नि-
रागसं ॥ ६९ ॥ इत्युक्त्वा तत्र निर्मुक्ता । तेन वज्रमयी शिला ॥ यानपात्रं च तद्भग्नं । श-
तखंडमजायत ॥ ७० ॥ केचिन्मग्ना जनाः केचि–द्भग्नास्तीरे च नीरधेः ॥ देवदिन्नो दैवयो-
गा–देकं फलकमाप्तवान् ॥ ७१ ॥ तदाधारात्तरन्नब्धिं । द्वीपमेकमवाप सः ॥ पंचमे वासरे
जीवन् । क्षारनीराकुलीकृतः ॥ ७२ ॥ समीरणेन शीतेन । स स्पृष्टः प्राप्तचेतनः ॥ फलैराहार-
माधाय । सोऽवतस्थे तरोस्तले ॥ ७३ ॥ चिंतयामास चित्ते च । विधत्ते हि हतो विधिः ॥
सुखदुःखपरावर्तं । सर्वेषामपि देहिनां ॥७४॥ भार्यादुश्चरितै रुष्ट–खेचरेणोक्तमीदृशं ॥ तन्म-
न्येऽनेन सा लुब्धा । भविष्यति दुराशया ॥ ७५ ॥ अधुनैतं पुनर्मुक्त्वा–परं नरमरीरमत्
॥ तेनैवैष महारोषा–दनर्थमकरोदमुं ॥ ७६ ॥ एतया चिंतया किं वा । मया सा साध्यते-
ऽधुना ॥ स्वसाध्यं साधयाम्येष । स्मृत्वा पंचनमस्कृतिं ॥ ७७ ॥ एवं विचिंत्य सोऽस्मार्षी–
त्कृती पंचनमस्कृतिं ॥ सुस्थिताख्यस्ततो यक्ष–स्तस्याग्रे प्रकटोऽभवत् ॥ ७८ ॥ उवाच च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

महाजाग । तुष्टोऽहं तव सत्त्वतः ॥ य एवं पतितोऽप्याप—त्समुद्रे स्थिरमानसः ॥ ७९ ॥ अ-
धीराणां च धीराणां । नेद आपदि वेद्यते ॥ स्थूलाश्मनां च तूलानां । प्रचंडे पवने यथा ॥
॥ ८० ॥ नो देवदिन्न तस्मात्त्वं । वरं कंचिद्वरं वृणु ॥ तेनोक्तं नास्ति मे किंचि—त्प्रार्थनीयं
सुरोत्तम ॥ ८१ ॥ जिनधर्मो मयावापि । दर्शनं च तवोत्तमं ॥ अप्राप्तं विद्यते किंचि—त्वदु-
पांते यदर्थ्यते ॥ ८२ ॥ आख्यत्सुस्थितयक्षोऽथ । सत्त्ववंतो नवादृशाः ॥ उत्तमाः प्रार्थनां क-
र्तुं । विदंति न कदाचन ॥ ८३ ॥ यतः— दौर्गत्येन समीरिता हृदयतः कंठं समालंबते । कं-
ठाकृष्टशतैः कथं कथमपि प्राप्नोति जिह्वांतरं ॥ लज्जाकीलककीलितेव सुदृढं तस्मान्न निर्या-
त्यहो । वाणी प्राणपरिक्षयेऽपि महतां देहीति नास्तीति च ॥ ८४ ॥ दाडिम्याः फलमेतद् ।
गृहाणानुगृहाण नोः ॥ यास्यत्येतत्प्रजावेण । योजनानि शतं नवान् ॥ ८५ ॥ तत्र वेविद्यते य-
क्षो । मामकीनो मनोरमः ॥ त्वन्मनाश्चिंतितं सर्वं । स दास्यति न संशयः ॥ ८६ ॥ ततस्त-
स्मै फलं दत्वा । स्वस्थानं सुस्थितोऽगमत् ॥ संप्राप्तो देवदिन्नोऽपि । तत्क्षणं यक्षमंदिरे ॥
॥ ८७ ॥ तद्गृहादेशे प्रविश—न्नेकामालोकतेस्म सः ॥ युवतीमर्धजरतीं का । नवंतीति च सो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽवदत् ॥ ७७ ॥ दत्वैकमासनं तत्र । देवदिन्नं निवेश्य च ॥ शृणु वृत्तांतमित्युक्त्वा । सा तद्व-
क्तुं प्रचक्रमे ॥ ७९ ॥ यथा—

अस्त्यत्र धातकीखंडे । भरतक्षेत्रमंतरा ॥ वैताढ्यपर्वतस्तत्र । नगरं जनवल्लभं ॥ ८० ॥
तत्र सूरप्रभो राजा । युवराजः शशिप्रभः ॥ अनुजातामुभौ राज्य–मन्योन्यं स्नेहशालिनौ
॥ ८१ ॥ सुरकांताभवत्कांता । सूरप्रभनरेशितुः ॥ तस्याः कन्या मनोज्ञांग्य–श्चतस्रो जज्ञिरे
क्रमात् ॥ ८२ ॥ आद्या वेगवती तासु । द्वितीया दीप्तिमत्यभूत् ॥ तृतीया रंगवल्यासी–च्चर-
मा च रमावती ॥ ८३ ॥ ताभ्यो बाल्येऽपि योग्याभ्यः । सद्भाग्याभ्यस्ततः पिता ॥ प्रज्ञ-
प्त्याद्या महाविद्याः । प्रायच्छदुत्सवाशयः ॥ ८४ ॥ अन्यस्मिन् वासरे तौ द्वौ । भ्रातरौ कान-
नांतरे ॥ क्रीडंतौ व्यंतरेणैके–नालोक्यैवं विचिंतितं ॥ ८५ ॥ एवंविधो न बंधूनां । स्नेहः क-
चन दृश्यते ॥ स्वपत्नीप्रणयापास्ता–शेषप्रेम्णां नृणामिह ॥ ८६ ॥ अकृत्रिममिव प्रेम । दृ-
श्यते तावदेतयोः ॥ तथापि संध्यासमये । करिष्ये तत्परीक्षणं ॥ ८७ ॥ तयोः संप्राप्तयोः
स्वस्व–वासमंदिरमंतरा ॥ निश्चयदृश्यः सुरः प्राप । शशिप्रभगृहांगणे ॥ ८८ ॥ उच्चैरूचे नि-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

श्रितः । किं भोः स्वपिषि सांप्रतं ॥ सूरप्रभस्तव भ्राता । मृतो धिक्त्वां सुनिष्ठुरं ॥ ९९ ॥
इत्याकर्ण्य महादुःख—समीरणसमीरितः ॥ क्षणाच्छशिप्रभप्राणा । उड्डीय तृणवद्ययुः ॥१००॥
मृत्वोत्पन्नः स एतस्मिन् । स्थाने यक्षो मनोरमः ॥ व्यंतरोऽपि तथा दृष्ट्वा । विखिन्नो निःस्व-
तस्ततः ॥ १ ॥ शशिप्रभप्रियाः सर्वा । रोदनं चक्रुरुच्चकैः ॥ श्रुत्वाक्रंदान् समायात—स्तत्र
सूरप्रभो नृपः ॥ २ ॥ भ्रातरं मृतमालोक्या—लिंग्य तत्कंठकंदलं ॥ मां विहाय निराधारं ।
भ्रातः कुत्र गतो भवान् ॥ ३ ॥ स एवं विलपन्नेव । दीर्णवक्षःस्थलः क्षणात् ॥ सर्वत्र भ्रातरं
दृष्टु—मिवैकोऽप्याप पंचतां ॥ ४ ॥ प्रयुज्यावधिविज्ञान—मथो यक्षो मनोरमः ॥ आगत्य न-
गरस्यांत—रमात्यादीनदोऽवदत् ॥ ५ ॥ शशिप्रभोऽहं मृत्वातो । जातो यक्षो मनोरमः ॥ सू-
रप्रभोऽपि नगरेऽस्मि—न्नेवाभूद्व्यंतरोत्तमः ॥ ६ ॥ तदात्मनामनाथत्वं । न मंतव्यं मनागपि
॥ पालनीयमिदं राज्यं । युष्माभिर्न्यायमार्गगैः ॥ ७ ॥ कियत्यपि गते काले । राज्यभारधुरंधरं
॥ नरं कंचिदिहानीय । दास्ये युष्मभ्यमुत्तमं ॥ ८ ॥ इत्याश्वास्य नरान् सर्वान् । चतस्रः क-
न्यिकाश्च ताः ॥ समानीय स आयासी—दस्मिन्नेव निजास्पदे ॥ ९ ॥ पातालमंदिरे तेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। धृतास्तिष्ठंति ता इह ॥ अहं तासां पुनर्धात्री । चंद्रलेखेतिसंज्ञिका ॥ १० ॥ चंद्रलेखेव ताः सर्वा । वार्धिवेला इवोल्वणाः ॥ अत्र तिष्ठामि पुष्णंती । वात्सल्यामृतवर्षिणी ॥ ११ ॥ अथ ताः कन्यिकाः सर्वा । जज्ञिरे यौवनोन्मुखाः ॥ तद्योग्याय वरायैष । यक्षो दातुं समीहते ॥ १० ॥ परं वरपरीक्षायै । स नृणां सत्वमीक्षितुं ॥ चक्रे कुंडद्वयं ज्ञद्र । जलस्य ज्वलनस्य च ॥ ११ ॥ जलकुंडे कृतस्नानो । वह्निकुंडेऽत्र यो विशेत् ॥ तस्मै संतुष्टचित्तः सन् । कन्या यक्षो ददाति वा ॥ १२ ॥ वैताढ्याचलमौलिस्थे । नगरे जनवल्लज्ञे ॥ तं सत्त्वशालिनं नूनं । स्वामिनं कुरुते द्रुतं ॥ १३ ॥ कुतः कुतोऽपि संस्थाना–दनेकेऽप्यैयरुर्नराः ॥ पुरस्तेषां मयाख्यायि । वृतांतः सकलोऽप्ययं ॥ १४ ॥ परं साहसहीनत्वा–त्कश्चिदेवं करोति न ॥ पश्यन्नपि मणिं पाणिं । को वा क्षिपति पन्नगे ॥ १५ ॥ तद्भोः पुरुष सत्त्वं चे–त्तव किंचन वर्तते यदि वांछसि ताश्चात्र । तथा कुरु यथोदितं ॥ १७ ॥ इत्याकर्ण्य झटित्येव । देवदिन्नस्तयोदितं ॥ स्नानं विधाय नीरेण । वह्निकुंडांतरेऽपतत् ॥ १८ ॥ तावन्मनोरमो यक्ष–स्तत्सत्त्वावर्जितः क्षणात् ॥ तत्रापतंतमेवामु–मुध्धृत्याग्रे स्फुटोऽज्नवत् ॥ १९ ॥ ऊचे च तव सत्त्वेन ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तुष्टोऽहं वृणु त्तो वरं ॥ देवदिन्नोऽवदद्देव । तवांते तिष्टतादयं ॥ २० ॥ पुनः स्नानं जले कृत्वा । झंपां निष्कंपमानसः ॥ सोऽदादग्निमये कुंडे । किं दुःसाध्यं महीयसां ॥ २१ ॥ पुनर्यक्तस्त-मुध्धृत्य । सत्यवागित्यन्नाषत ॥ पुनर्वृणु वरं स्वैर-मग्रणीर्गुणशालिसु ॥ २२ ॥ स प्राह तावदे-षोऽपि । नांमागारेऽवतिष्टतां ॥ ततः स विहितस्नान-स्तूर्णं वह्न्यंतरेऽपतत् ॥ २३ ॥ तत उ-ध्धृत्य तं यक्तो । वरं वरतरं ददौ ॥ तमपि स्थापयामास । यक्तस्यैव स सन्निधौ ॥ २४ ॥ उ-त्पतंतं तथा कर्तुं । पुनस्तमवदत्सुरः ॥ त्तो देवदिन्न ते सत्त्व-ममर्यादं पयोधिवत् ॥ २५ ॥ परं परिमितैवास्ति । मम शक्तिर्महाशय ॥ अथ प्रसादमाधाय । साहसं संवृणु स्वकं ॥ ॥ २६ ॥ वरत्रयं गृहाण त्वं । ततो मामनृणं कुरु ॥ देवदिन्नोऽवदद्यक्त । साक्तात्वं वीक्तितो यदि ॥२७॥ तन्मेऽपरप्रार्थनीयं । किं वा वेविद्यते वद ॥ तेनोक्तं मा विलंवस्व । प्रार्थयस्व स्व-मीप्सितं ॥ २७ ॥ देवदिन्नोऽवदत्तर्हि । वरेणैकेन देहि मे ॥ कन्या अनन्यसामान्य-मान्या देवस्त्रियामपि ॥ २ए ॥ द्वितीयेन त्वयेतव्यं । ममांते स्मृतिमात्रतः ॥ तृतीयेन च मे देहि । विद्यां गगनगामिनीं ॥ ३० ॥ तत्क्तणं यक्तराजोऽदा-त्तदर्थितमपि त्रयं ॥ विवाहोत्सवसाम-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्री। समग्रां शक्तितोऽकरोत् ॥ ३१ ॥ देवदेवीभिरारब्धे। गीतनृत्यादिकोत्सवे ॥ गुह्यकः स-
हे कन्याभि—स्ताभिस्तमुदवाहयत् ॥ ३२ ॥ क्रीडन्नथ स पत्नीभि—रप्सरोभिः सुरेंद्रवत् ॥
सुखं तस्थौ दिनान् कांश्चि—त्तत्र पुण्यलतालये ॥ ३३ ॥ अन्यदा प्रचुरप्रेम—कलिता वनिता
जगुः ॥ स्वामिंस्तवापरा कापि। वल्लभा विद्यते न वा ॥ ३४ ॥ अत्राणि देवदिन्नेन। काप्य-
न्या मास्ति मे प्रिया ॥ संसिद्धसर्वविद्यास्ता। इत्यूचुश्चतुराशयाः ॥ ३५ ॥ स्वामिन्नकृत्रि-
मप्रेम—सुंदरीं देवसुंदरीं ॥ तवापलपतस्ताव—न्नौचिती नातिवर्तते ॥ ३६ ॥ यतो विदेशमा-
श्रित्य। प्रस्थानं त्वयि कुर्वति ॥ योऽभिग्रहो गृहीतोऽभू—द्भवतः पुरतस्तया ॥ ३७ ॥ आ-
चाम्लैः पारणं षष्ट—तपोंते तेन साकरोत् ॥ षण्मासांतेऽधुना वह्नि—प्रवेशायोद्यतास्ति च ॥
॥ ३८ ॥ तन्नाथ नाथ ते युक्तो। विलंबः क्षणमप्ययं ॥ गत्वा प्राणप्रियाप्राणान्। रक्ष दक्ष-
शिरोमणे ॥ ३९ ॥ प्रस्थानमनुमेने य—त्तव सा हर्षशालिनी ॥ जानीहि केवलं तत्र। ज-
ननिंदानिबंधनं ॥ ४० ॥ प्रज्ञप्तीदेवता सर्व—मेवमस्मभ्यमभ्यधात् ॥ तन्नाथ सत्वरं गत्वा। त्वं
तां मृत्योर्निवारय ॥ ४१ ॥ इति ताभ्यः समाकर्ण्य। देवदिन्नः स खिन्नहृत् ॥ अभूतपूर्वप्रिया-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संगा—कुंगोत्कंगसमाकुलः ॥ ४२ ॥ संस्मृत्य यक्षदत्तां तां । विद्यामाकाशचारिणीं ॥ यत्नमा-
पृच्छ्य पतीन्भिः । सहैवोदपतन्नभः ॥ ४३ ॥ आजगाम विमानस्थो । लक्ष्मीपुरपुरोपरि ॥ त-
दाद्राक्षीदंतरिक्षं । समग्रं धूमधूमरं ॥ ४४ ॥ किमेवमिति संभ्रांतो । यावत्सम्यक् स प-
श्यति ॥ तावच्चितासमीपस्थां । स्नानभिन्नकचांचितां ॥ ४५ ॥ समौलिकंपं लोकेन । वीक्ष्य-
माणां कृपालुना ॥ तत्साहसेक्षणोत्पन्ना—मिताश्चर्ययुतेन च ॥ ४६ ॥ वत्से त्वमुत्सुका माभू—
रागमिष्यति ते प्रियः ॥ बुभुक्षितानुरोधेन । पच्यते किमुदुंबरः ॥ ४७ ॥ मृतायास्तव भविता
। कथं वल्लभसंगमः ॥ चिताप्रवेशं कः कुर्या—दविवेकिजनोचितं ॥ ४८ ॥ एवमादिप्रकारे-
ण । मिलितैः स्वजनैर्घनैः ॥ सप्रसादं सरोषं च । वार्यमाणां मुहुर्मुहुः ॥ ४९ ॥ प्रस्थानस्थित-
पत्यग्रे । या मया माययाश्रिता ॥ प्रतिज्ञा विहिता तां हि । हिताः सत्यां करोम्यहं ॥ ५० ॥
प्राणा यांतु श्रियो यांतु । यांतु सर्वसुखानि च ॥ एकैव शाश्वती वाणी । सर्वदैवावतिष्ठतां
॥ ५१ ॥ बोधयंतीं समस्तांस्ता—नुत्तरैरित्युनत्तरैः ॥ उत्पतंतीं महोत्साहा—त्सोऽपश्यद्देव-
सुंदरीं ॥ ५२ ॥ अष्टभिः कुलकं ॥ हा मया शीलशालिन्यां । कुविकल्पो विनिर्ममे ॥ अस्यां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सत्त्वप्रशस्यायां । धिग्मां मुग्धशिरोमणिं ॥ ५३ ॥ देवदिन्नो विचिंत्येति । विमानादवतीर्य च ॥ वह्निज्वालावलीढाशां । पतंतीं स्राक् चितांप्रति ॥ ५४ ॥ समेत्य सत्वरं तत्र। धृत्वा हस्तद्वयेन तां ॥ किमर्थं रक्षसीत्येवं । वदंतीं दूरमानयत् ॥ ५५ ॥ त्रिभिर्विशेषकं ॥ कोऽयमस्तीति यावत्सा । संमुखं तस्य पश्यति ॥ तावत्प्रीतिकरं प्राण—वल्लभं तमुदैक्षत ॥ ५६ ॥ हर्षोत्कर्षोऽभवद्योऽस्या—स्तं वक्तुं नेश्वरः परः ॥ तृषितस्यामृतं पीत—मत्यंतं तृप्तिहेतवे ॥५७॥ अकस्मादागतं वीक्ष्य । देवदिन्नं जना जगुः ॥ अहो सत्त्वमहो सत्त्व—फलं सत्वरमुज्ज्वलं ॥ ॥ ५८ ॥ सत्त्वानां सत्त्वसंबंधा—त्फलत्याशु मनोगतं ॥ अंकुल्लकतैलयोगा—द्बीजमाम्रतरोरिव ॥ ५९ ॥ अवातरन्मरुन्मार्गा—द्विमानं तत्र दीप्तिमत् ॥ कुतूहलाकुलस्वांता । मिमिलुर्नागरा नराः ॥ ६० ॥ विमानात्तूर्णमुत्तीर्णाः । पूर्णांगाश्वंगिमाभृतैः ॥ तैस्तैर्जनैर्वीक्ष्यमाणा—श्चतस्रस्तस्य वल्लभाः ॥ ६१ ॥ पंचभिः सह पत्नीभिः । शोभतेस्म शुभाकृतिः ॥ शोभितः पुण्यरूपाभिः । साधुः समितिभिर्यथा ॥ ६२ ॥ वधूं निवारणायातं । तातं संतोषितांतरं ॥ स प्रियासहितः सौवं । नमोऽकार्षीत्सभक्तिकः ॥ ६३ ॥ पितृपृष्टनिजोदंतः । कथितस्वकथोऽथ सः ॥

क्षे. ई. स्टी. कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोत्सवं प्राविशल्लोकै—र्लोक्यमानः पुरांतरे ॥ ६४ ॥ बहुष्वथो वासरेष्वथोऽसौ । श्रेयःश्रीस्त्री-
युतः सुतः ॥ समायात इति तातो । निमंत्र्याभोजयज्जनान् ॥ ६५ ॥ द्रव्यालंकारवस्त्रादि-
दानादानंदिता जनाः ॥ अभ्यनंदन् यशश्चंद्र—यशसश्चंद्रनिर्मलं ॥ ६६ ॥ मंत्रिमुख्यपरिवा-
रं । लक्ष्मीदेवनरेश्वरं ॥ गृहे आमंत्रयामास । स वासवसमश्रियं ॥ ६७ ॥ सवेगा वेगवत्या-
ख्या । विद्याधर्यौ धरेशितुः ॥ सारसुस्फारशृंगार—धारिण्यः पर्यवेषयन् ॥ ६८ ॥ लावण्यरस-
कुंप्याभा । भूपाभासः समीक्ष्य ताः ॥ देवीर्लक्ष्मीरिवाध्यक्ष्य । लक्ष्मीदेवोऽन्वरज्यत ॥ ६९ ॥
नाभुंक्त केवलं बाला । निर्निमेषाक्षिरैक्षत ॥ विद्धोऽपि कामबाणेन । स तिष्ठत्यक्षतांगकः
॥ ७० ॥ किंचिद्भुक्त्वाक्षिप्तचेताः । स्थित्वा दाक्षिण्यतः क्षणं ॥ उत्थाय सपरिवारो । राज-
मंदिरमासदत् ॥ ७१ ॥ अनुरक्तमनास्तासु । व्यमृशत्स विशांपतिः ॥ देवदिन्नप्रियाभिर्मे ।
संगमो भविता कथं ॥ ७२ ॥ तासामास्यस्य शस्यस्य । स्पर्शः स्यान्मन्मुखे कदा ॥ तदोष्ठवि-
द्रुमैर्दंत—मुक्तानां संगमोऽपि च ॥ ७३ ॥ नखरत्नालंकृताभि—स्तद्भुजाभिस्तनुर्मम ॥ वे-
ष्टिता भास्यति कदा । मुद्रिकाभिरिवांगुली ॥ ७४ ॥ तासां चंगतमोत्तुंग—स्तनकुंभोपरि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थिताः ॥ पल्लवा इव रक्ता मे । शोभिष्यंते कदा कराः ॥ ७५ ॥ एता यदि प्रिया मे स्यु-रितरेण सुखेन किं ॥ अथ नो चेदिमा मे स्यु-रितरेण सुखेन किं ॥७६॥ तत्प्रेष्याशु निजः प्रेष्या—नहमानाययामि ताः ॥ परं पराक्रमधरे । परेषां क्षोभकारिणि ॥ ७७ ॥ दिव्यरूपे देवदिन्ने । तासां भर्तरि जीवति ॥ न कश्चिदपि ता बाला । बलादादातुमीश्वरः ॥७८॥ अ-लुब्धप्रतिज्ञः को वा । मणिमुच्छेतुमिच्छति ॥ पन्नगे स्फारफूत्कारे । क्रूराकारेऽथ जाग्रति ॥७९॥ भयंकरे शूकरे वा । तद्दंष्ट्रां हरिणेश्वरे ॥ सटाछटां स्फुटामेव । व्याले वा दशनावलीं ॥ ॥ ८० ॥ तत्तं व्यापाद्य सद्योऽहं । पूरये स्वमनीषितं ॥ परं प्रकटमेवामुं । निहंतुं कोऽपि ने-श्वरः ॥ ८१ ॥ रचयित्वा प्रपंचं त—त्पंचत्वं प्रापयाम्यमुं ॥ एवं विचिंतयन् राजा । तस्थौ दुःस्थितमानसः ॥ ८२ ॥ लब्धोपायः समुत्थाय । देवदिन्नादिसंगतः ॥ निर्गत्य नगरात्प्राप-त्क्रमात्नीरधिसन्निधौ ॥ ८३ ॥ क्रीडंस्तत्र तटेऽकस्मा-न्मुक्ताहारं मनोहरं ॥ मुक्तवान् क्षार-नीरांत—र्मायया विचखाद च ॥ ८४ ॥ हा हारो मे मनोहारी । पतितोंबुधिमंतरा ॥ न प्रा-णान् धर्तुमीशोऽह—माहारमिव तं विना ॥ ८५ ॥ हृदयात्पतितो हारः । प्रहार इव चालगत् ॥

P.P. Ac. Gunratnasuri M.S. Jun.Gun Aaradhak Trust

अनागते पुनस्तस्मि—न्नाहारनियमो मम ॥ ७६ ॥ तद्गो नृत्या अमात्याश्च । श्रेष्ठिनो नव-
तोंतरा ॥ अस्ति कश्चिद्विपश्चियो । हारमाहर्तबुधेः ॥ ७७ ॥ वदंतमिति नूपालं । श्रुत्वा स-
र्वेऽपि मानवाः ॥ अधो निधाय वक्त्राणि । तस्थुश्चिंतातुरा इव ॥ ७७ ॥ परकार्यैकनिरतो ।
विरतो दंभलोभतः ॥ एवं साहसमालंब्य । देवदिन्नस्तदावदत् ॥ ७ए ॥ महाराज न कर्त-
व्यो । मनस्तापो मनागपि ॥ प्रविश्यावश्यमेवाब्धौ । समानेष्यामि वस्तु ते ॥ ए० ॥ अनौ-
षधमयं व्याधि—र्गबन्नस्तीति चिंतयन् ॥ तडुक्तमेवमाकर्ण्य । सप्रकर्ष जहर्ष सः ॥ ए१ ॥
ऊचे च देवदिन्न त्वं । गुणी सत्पुरुषाग्रणीः ॥ इदं साधय साध्यं मे । किमसाध्यं महात्मनां
॥ ए२ ॥ तावत्कंपितमूर्धानो । जजल्पुः सकला जनाः ॥ अयं सत्पुरुषत्वेन । स्वामिकार्यं
प्रपद्यते ॥ ए३ ॥ परं देवायमादेशो । दातुं नैव तवोचितः ॥ हितोऽगाधे पयोनिधौ । प्रवेशं
कोऽनुमन्यते ॥ ए४ ॥ युग्मं ॥ श्रुत्वेति लोकवाक्यानि । मौनमाधाय भूधवः ॥ प्रतिपन्नमयं
नूनं । पालयिष्यति सत्तम ॥ ए५ ॥ लोककोलाहलं हाला—हलवत्कटुकं स्फुटं ॥ आकर्णयामि
किमहं । गडामि स्वीयमाश्रयं ॥ ए६ ॥ ध्यात्वेति सपरीवारः । पुराय प्राचलन्नृपः ॥ एका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्येव देवदिन्न–स्तत्रादिनमनाः स्थितः ॥ ९७ ॥ जीवितव्यं च भव्यं च । कार्यं स्यात्स्वामि-
नो यथा ॥ हारनिःकासनोपायां–श्चिंतयामास भूरिशः ॥ ९८ ॥ क्षणांतरे यक्षराजं । स म-
नोरममस्मरत् ॥ वाचा बद्धः स वै यक्ष–स्तत्क्षणं तत्पुरोऽभवत् ॥ ९९ ॥ देवदिन्नो जगादेति ।
समानय पयोनिधेः ॥ मुक्ताफलमयं हारं । कुरु भूपं निराकुलं ॥ २०० ॥ ततो यक्षः क्षणा-
त्क्षारां–बुधेरुत्क्षिप्य शक्तितः ॥ हंसवद्धारमानीय । तस्य हस्तांबुजे ददौ ॥ १ ॥ भवता प्र-
तिपत्तव्यं । न कार्यं नगरेशितुः ॥ त्वत्स्त्रीषु मोहितो यत्स । त्वां निहंतुं समीहते ॥ २ ॥ इ-
त्युदीर्य ययौ यक्षो । हर्षरोषसमाकुलः ॥ आजगाम निजं धाम । श्रेष्ठिसूर्हारमुद्वहन् ॥ ३ ॥
प्रभाते भूपतेरंते । समागत्य तमार्पयत् ॥ जीवंतं तं समायांतं । दृष्ट्वा राजा चमत्कृतः ॥ ४ ॥
हा दैव किमयं वैरी । पुनर्जीवन्निहागतः ॥ हनिष्यामि कथं हंत । हताशः शक्तिशालिनं ॥
॥ ५ ॥ इति चिंतातुरः स्वामी–भूतस्तस्थिवांश्चिरं ॥ पापः कृतोपकारोऽप्य–पकारं कर्तुमि-
च्छति ॥ ६ ॥ कालांतरेऽवदद्दंभी । पतितोऽगाधनीरधौ ॥ त्वयायं त्वरयानीतः । कथं हारो म-
नोहरः ॥ ७ ॥ सर्वत्रास्खलिता एव । त्वदीया देव सेवकाः ॥ श्रेष्ठिसूरित्युदीर्याथ । निजमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्पदमासदत् ॥ ८ ॥ तस्य व्यापादनोपाया–न्नृपोऽनेकान् विभावयन् ॥ लब्धबुद्धिः समाहूय
। देवदिन्नं जगाविति ॥ ९ ॥ अस्माकं धीरवीरेषु । ननूत्तमतमो भवान् ॥ प्रत्यलः सर्वकार्या-
णि । कर्तुं कीर्त्या त्वमुज्ज्वलः ॥ १० ॥ दुःसाध्यं विहितं साध्यं । हारमाहरता त्वया ॥ त-
स्मा धीराधुना कार्य—मस्माकमपरं कुरु ॥ ११ ॥ स स्मरन्नपि यद्वोक्तं । दाक्षिण्यांभोधिरन्य-
धात् ॥ समादिश विशामीशा–देश्याथ स्वप्रयोजनं ॥ १२ ॥ लक्ष्मीदेवनृपोऽवादी–ददीनव-
चन त्वया ॥ विजेतव्यो ममाराति–र्महानलमहीपतिः ॥ १३ ॥ तस्यास्ति राजधानीतो । यो-
जनानां शतत्रये ॥ माकंदी नाम नगरी । बलिनानेन पाल्यते ॥ १४ ॥ गृहाण मे समग्रास्त्वं
चतुरंगचमूरमूः ॥ शनैरध्वनि गंतव्यं । समेतव्यं विजित्य तं ॥ १५ ॥ तत्स्मरन्नपि यद्वोक्तं ।
। देवदिन्नः प्रपन्नवान् ॥ विधातुं प्रार्थनाभंगं । विदंत्यपि न सत्तमाः ॥ १६ ॥ प्रणम्य पितरौ
दृष्ट्वा । प्रबोध्य च महाग्रहात् ॥ प्राचालीदचलाधीश–दत्तातुलबलस्ततः ॥ १७ ॥ यावद्द् द्वि-
त्रान् पवित्रात्मा । प्रयाणानकरोत्पुरात् ॥ हर्षोत्कर्षधरो राजा । तावदेवं व्यचिंतयत् ॥ १८ ॥
सिद्धं साध्यं मदीयं य–न्निर्गतो नगरादयं ॥ नूनं तत्र गतस्तेन । बलिनैष हनिष्यते ॥१९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथात्यंतबलिष्टत्वा—त्तं विजित्य समेष्यति ॥ जविष्यति तथाप्यस्य । चिरकालविलंबनं ॥
॥ २० ॥ तत्प्रेयसीनां निकटे । तत्प्रेष्य निजदूतिकां ॥ दानादिना वशीकृत्य । प्रीत्या ता रम-
याम्यहं ॥ २१ ॥ इति जूमिपतिर्ध्यात्वा । दूतीं मायामिवांगिनीं ॥ प्रैषीत्साप्यंतिके तासां ।
गत्वैकांतेस्म जाषते ॥ २२ ॥ हे सुंदर्यः स्वसौंदर्य—विनिर्जितपुरंदरः ॥ लक्ष्मीदेवक्ष्मेशो वो ।
मन्मुखेनेत्यबीजणत् ॥२३॥ ईहे कलयितुं लीलां । मराल इव लालसः ॥ गांगेऽब्धिवत्तरंगेषु
। युष्मदंगेषु जोगजाक् ॥ २४ ॥ सारालंकारमाणिक्य—पट्टकूलादिवस्तु यत् ॥ युष्माकं युज्यते
सर्वं । तद्भयात् पूरयिष्यते ॥ २५ ॥ एवमाकर्ण्य कर्णौ ताः । पिधायान्यधुरुद्धतं ॥ आः पा-
पेपसरेतस्त्व—मुपदेष्ट्री घनैनसा ॥ २६ ॥ प्रजानां जायते राजा । न्यायान्यायविवेककृत् ॥
इबंतं स्वयमन्यायं । धिगमुं निस्त्रपं नृपं ॥ २७ ॥ सकामगर्दजीजूय । भूपश्चेदिति जल्पति ॥
तदैतदर्थमायांती । किं त्वमपि न लज्जसे ॥ २८ ॥ एतदर्थे कथं वाणी । कृपाणीव निराग-
सि ॥ सारणीवोच्चदेशे च । व्यूढा मूढमते तव ॥ २९ ॥ इति निर्भर्त्सिता दूती । तत उ-
त्थाय निर्ययौ ॥ आगत्य भूपतेः पार्श्वे । स्वरूपं निखिलं जगौ ॥ ३० ॥ भूपो विकल्पकल्पांत—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वातोद्भ्रांतमनोंबुधिः ॥ अधीरतां रतस्तासु । भेजे वृत्तमवेत्य तत् ॥ ३१ ॥ जने निर्व्यजने स्थाने । वने चांतःपुरे पुरे ॥ रतिः क्वाप्रतिपालेन । नापि कापि मनागपि ॥ ३२ ॥ अनुत्पन्नापरोपायः । प्रजिघाय स्मरातुरः ॥ सोऽनुशिष्य विशेषेण । दूतीं तामेव तद्गृहे ॥ ३३ ॥ अस्मिन्नवसरे यक्षः । प्रत्यक्षीभूय तत्पुरः ॥ नृपेण प्रहिता दूती । सागछंत्यस्ति सांप्रतं ॥ ॥ ३४ ॥ मान्यं तस्या वचः पश्चा—त्करिष्येऽहं यथोचितं ॥ इत्युक्त्वा जाग्यवत्तस्थौ । स हितात्मा तिरोहितः ॥ ३५ ॥ युग्मं ॥ दूती मंदपदा गत्वा । तत्र मंदपदावदत् ॥ हे मुग्धा दुग्धवन्मुग्धं । स्निग्धं दिग्धमिवामृतैः ॥ ३६ ॥ मुधा मेने न मानेन । जवतीन्निर्वचो मम ॥ कथयाम्यथ किंचिच्चेद् । हृदयं तत्र दीयते ॥ ३७ ॥ ईषद्धिहस्य शस्यास्या—स्ता ऊचुश्चतुराशयाः ॥ नूनं त्वं प्रेषिता राज्ञा । निर्विकल्पं प्रजल्प तत् ॥ ३८ ॥ दूत्यलापीत्कलापीन—शशिवत्सुंदरोऽपि सः ॥ जवतीविरहातस्तः । श्यामिकामादधेऽधुना ॥ ३९ ॥ तादृक्षः क्षोणिनृन्मुख्यो । दह्यमानः स्मराग्निना ॥ स्वांगसंगजलौघेनो—चितः शमयितुं हितः ॥ ४० ॥ जजल्पुस्ता यदस्मान्निः । पूर्वं त्वमिति नर्त्सिता ॥ भूपस्नेहपरीक्षार्थे । समस्तमपि विद्धि तत्

P.P. Ac. Gunratnasuri.M.S.   Jun Gun Aaradhak Trust

॥ ४१ ॥ अन्यथा का न वांछेत । तादृशं नृपतिं पतिं ॥ गृहस्थेऽपि गृहाधीशे । किं पुनर्दूर-
वर्तिने ॥ ४२ ॥ परं नृपागुणैर्बद्धा । वयं किल कुलस्त्रियः ॥ कथमागंतुमावासे । क्ष्मापस्य
क्षमामहे ॥ ४३ ॥ तया मुदितयावादि । नृपावत्सु मता कृपा ॥ एकांते तर्हि घस्रांते–ऽत्रै-
वायातु महीपतिः ॥ ४४ ॥ एवमस्त्वित्यनुज्ञाता । सा हर्षोत्कर्षशालिनी ॥ भूपाय त्वरितं
गत्वा । वृत्तांतं तं न्यवेदयत् ॥ ४५ ॥ तदाकर्ण्यामृतेनेव । सिक्तो मृत इवोत्थितः ॥ लब्ध-
त्रैलोक्यसाम्राज्य । इव राजा जहर्ष सः ॥ ४६ ॥ वासरं गमयामास । कथंचिद्गणयन् क्ष-
णान् ॥ संध्यायां कृतशृंगारो । जनेनैकेन संगतः ॥ ४७ ॥ गतः प्रछन्नमुछिन्न—न्यायश्छन्ना-
ननश्छली ॥ देवदिन्नप्रियावास—मंदिरद्वारि सुंदरे ॥ ४८ ॥ तावद्भुजंगमीभूय । यक्षरा-
जो मनोरमः ॥ तं दुष्टं दष्टवानंह्रौ । पतितो मूर्छितस्ततः ॥ ४९ ॥ मान्यो मान्यो जनो रा-
ज्ञो–ऽन्यायं वेत्त्विति चिंतयन् ॥ जनो भुवनसुंदर्याः । पट्टराज्ञ्या न्यरूपयत् ॥ ५० ॥ तया-
प्यप्रकटं प्रेष्यान् । प्रेष्यानीय नरेश्वरः ॥ शुश्रूषयितुमारब्धो—ऽनेकानामंत्र्य मांत्रिकान् ॥
॥ ५१ ॥ मंत्रैस्तंत्रैश्च यंत्रैश्च । तैरतीवचिकित्सितः ॥ अनवद्यैः सविद्यैश्च । स वैद्यैर्विविधौ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षधैः ॥ ५२ ॥ परं केनाप्युपायेन । नाभूद्भूपो निरामयः ॥ चेतनारहितो जज्ञे । काष्टवच्चेष्ट-
योज्झितः ॥ ५३ ॥ तत्र मंत्री सुमत्याख्यो । मुख्यो मतिमतां जगौ ॥ देवदिन्नो दिव्यशक्ति
—र्यद्यायाति कथंचन ॥ ५४ ॥ तदा जीवति राजायं । नान्यथा व्याप्तविष्टपं ॥ ध्वांतं शांतं
न्नवेत्किं वा । यावन्नोदेति न्नानुमान् ॥ ५५ ॥ इत्युक्त्वा देवदिन्नांते । सोऽप्रैषीन्निजसेवकान्
॥ अध्वन्यनेकराजानो । येनाजीयंत सत्वरं ॥ ५६ ॥ तैर्गत्वा कथितं देव । लक्ष्मीदेवनरेश्वरः
॥ दष्टो दुष्टाहिना नाना—विधोपायैर्मुधाजनि ॥ ५७ ॥ मंत्रिणामंत्रणकृते । तवाग्रे प्रेषिता व-
यं ॥ आगच्छ सह सैन्येन । स्वपुरंप्रति संप्रति ॥ ५८ ॥ इत्याकर्ण्योपकारैक—कारकः सैनि-
कान्निजान् ॥ दत्तव्यावर्तनाज्ञः स । नभस्युत्पतितः स्वयं ॥ ५९ ॥ गच्छन् गगनगामिन्या ।
विद्यया गगनांगणे ॥ आगादागारमात्मीयं । सोऽचिराच्चारुलोचनः ॥ ६० ॥ स्वामिनं वीक्ष्य
चंगांग्यः । प्रोचुरालिंग्य तत्प्रियाः ॥ स्वामिन्नत्र त्वमायातो । जीवनाय नरेशितुः ॥ ६१ ॥
परं तस्य न दातव्यं । जीवितव्यं दुरात्मनः ॥ प्राज्ञो निद्रितसिंहस्य । चक्षुषी को विबोधयेत्
॥ ६२ ॥ पूर्वप्रवृत्तवृत्तांत—स्ततस्ताभिस्तदग्रतः ॥ समग्रोऽपि न्यरूप्याप । परं कोपं नृपे न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सः ॥ ६३ ॥ कोशोऽनुक्रोशबुद्धीनां । स गत्वा राजमंदिरं ॥ निश्चेष्टं क्ष्मातलक्षिप्तं । क्षमापा-
लमलोकत ॥ ६४ ॥ समुज्ज्वलत्कृपावारि—क्षालितेषद्रुषानलः ॥ लोकान्निष्कास्य तत्कर्णा—
भ्यर्णेत्यैवमभ्यधात् ॥ ६५ ॥ मयि प्रसादमाधाय । यक्षराज कृपापर ॥ अमुं मुंच ततो यक्षो
। भूपास्येनेत्यभाषत ॥ ६६ ॥ अमुमेनःकरं नूनं । गुरोस्ते वचनादहं ॥ त्यजन्नस्म्यधुना श्रा-
द्धः । शुद्धधीः कुगुरुं यथा ॥ ६७ ॥ इत्युक्त्वा यक्षनिर्मुक्तो । मुक्तनिद्र इवोत्थितः ॥ भूपति-
स्तेन चाहूताः । प्रभूतास्तत्र पूरुषाः ॥ ६८ ॥ अहो भाग्यमहो विद्या । धृतिरहो महीयसी
॥ देवदिन्नं जना एवं । हृष्टास्ते सुष्टु तुष्टुवुः ॥ ६९ ॥ राजा जीवितमात्मानं । वैरिणं च
पुरः स्थितं ॥ देवदिन्नं समालोक्य । हर्षशोकाकुलोऽभवत् ॥ ७० ॥ पुनश्चिंतयितुं लग्नो । मग्नो
मदनवारिधौ ॥ जीवितं सफलं तर्हि । मिलंति यदि ता मम ॥ ७१ ॥ तदुत्थायाधुनैवाहं ।
तासामावासमाश्रये ॥ नैवं यतो देवदिन्नो । दुर्धर्षोऽयमुपाययौ ॥ ७२ ॥ अस्मिन् सत्यस्य वे-
श्मांतः । प्रवेष्टुं कः क्षमो भवेत् ॥ जाग्रत्यपि मृगारातौ । तद्गुहायां हि को विशेत् ॥ ७३ ॥
अथ केनाप्युपायेन । हन्म्येतमिति चिंतयन् ॥ धराधनो जनौऽप्यन्यः । स्वं स्वमास्पदमाश्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यत् ॥ ७४ ॥ अथान्यदावनीपालो । वस्त्रेणावेष्ट्य मस्तकं ॥ स मायामंदिरं तस्थौ । वासमंदिरसंतरा ॥ ७५ ॥ मंदीभूतं नृपं श्रुत्वा—न्नाषणायाययुर्नराः ॥ अन्यदा देवदिन्नोऽपि । तत्रागत्येत्यन्नाषत ॥ ७६ ॥ मुक्तामयं शरीरं ते । हारवद्दृश्यते विन्नो ॥ समाधिसहितं चास्ति । समाधिरहितं मनः ॥ ७७ ॥ तेनावादि यदाद्यासं । दष्टो डुष्टतराहिना ॥ तदादि पित्तयोगेन । तन्निरोर्त्तिरियर्त्ति मे ॥ ७७ ॥ अमुं व्याधिं निराकर्तुं । वैद्या नुन्ना बन्नाषिरे। औषधैर्विविधैरेष । व्याधिश्छेत्तुं न शक्यते ॥ ७ए ॥ परं कथंचिदायाति । व्याघ्रीदुग्धं यदा तदा ॥ मृगो मृगारिणेवायं । तेन पीतेन नश्यति ॥ ७० ॥ अस्मद्राज्ये त्वमेवासि । धीरवीरधुरंधरः ॥ हारवन्मामपि व्याधि—वारिधौ मग्नमुद्धर ॥ ७१ ॥ स राजवचनैर्निन्न—मानसस्तत्प्रपन्नवान् ॥ एत्य स्वप्रेयसीपार्श्वे । स्वरूपं च तदुक्तवान् ॥ ७२ ॥ व्यज्ञापि ज्ञातवृत्तान्नि—स्तान्निः प्राणप्रियप्रन्नो ॥ अस्मास्वासक्तचित्तोऽसौ । न्नवंतं हंतुमिच्छति ॥७३॥ तदयं निर्दयो नित्यं । दत्ते ते दुष्टशासनं ॥ गत्वा कथय नाथाथ । यदेतन्न हि सिध्यति ॥ ७४ ॥ अचलापि चलत्येषा । चलत्यपि सुराचलः ॥ महतां प्रतिपन्नानि । न चलंति कदाचन ॥७५॥ इत्युदीर्य महाचीर्यो।

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

व्याघ्रीमानेतुमुद्यतः ॥ यावच्चलत्यसौ ताव-त्प्रत्यक्षो यक्षराडभूत् ॥ ८६ ॥ अत्राणीच्च म-
हाभाग । तिष्ठ त्वं भवनांतरे ॥ त्वद्रूपेणैव सर्वाणि । कार्याणि करवाणि ते ॥ ८७ ॥ इत्यु-
क्त्वा स्थापयित्वा च । तमंतर्मंदिरं स्वयं ॥ प्रीत्या तद्रूपमाहृत्य । निरगान्नगराद्बहिः ॥८८॥
अरण्यचारिणीं स्वैरं । प्रसूतनवबालकां ॥ गत्वा वने द्रुतं व्याघ्रीं । यक्षश्छागीमिवाधरत् ॥
॥ ८९ ॥ क्रूराकारां धृतां कर्णे । बालकानुगतां स तां ॥ आनिन्ये नगरस्यांत-र्भापयन् ना-
गरान्नरान् ॥ ९० ॥ आश्चर्याद्वदनन्यस्त-हस्तमुन्मीलितेक्षणं ॥ ईक्षितेस्म स लोकेन । मुक्त-
मार्गेण दूरतः ॥ ९१ ॥ देवोऽयं देवदिन्नः किं । यदेवंविधवीर्यवान् ॥ शृण्वन् समस्तपौराणां
। वचश्चयमयं चलन् ॥ ९२ ॥ अचलेशालयं प्राप्य । स क्ष्मापालमालपत् ॥ दुग्ध्वा दुग्धं पि-
बैतस्या । भव भूप निरामयः ॥ ९३ ॥ दुग्ध्वा देहि महाभाग । राज्ञेति प्रतिपादिते ॥ भा-
जनेन तथा चक्रे । विस्मिते स सभाजने ॥ ९४ ॥ उत्कृष्टं तद्बलं दृष्ट्वा । भीतस्तत्पीतवान्नृ-
पः ॥ उक्तवांश्च महासत्व । गत्वैनां मुंच कानने ॥ ९५ ॥ धृत्वेत्याकर्ण्य कर्णे ता-मरण्यांन्यां
विमुच्य च ॥ देवदिन्नगृहेऽभ्येत्य । वार्तां सर्वामचीकथत् ॥ ९६ ॥ राजापि विफलीभूत—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मुपायमवगम्य तं ॥ चित्ते चिंतातुरो जझे । देवदिन्ने दुराशय ॥ ९७ ॥ अन्यदा स समाहूय
। सदसीति तमब्रवीत् ॥ देवदिन्न त्वया कार्यं । सर्वं सिध्यति हेलया ॥ ९८ ॥ अधुना ध-
र्मराजस्य । दूतत्वे सत्वसागर ॥ गच्छ तस्य पुरस्ताच्च । वाच्यमेतत्त्वया रयात् ॥ ९९ ॥ अहं
लक्ष्मीपुरेशेन । लक्ष्मीदेवनरेंदुना ॥ यमराज तवोपांते । रुष्टेन प्रेषितोऽस्म्यहो ॥ ३०० ॥ देशे
ग्रामे पुरे कस्मा-दकस्मात्पातितो भवान् ॥ सर्वदैवहरस्यस्म-न्नररत्नान्यनेकशः ॥ १ ॥ ए-
तावंति दिनानि त्वं । पल्लीपवदुपेक्षितः ॥ अद्यप्रभृति चेदेवं-विधं मुग्ध विधास्यसि ॥ २ ॥
कीनाश स्वविनाशाय । विद्धि मामागतं तदा ॥ पुरीं संयमिनीं भग्नां । भग्नाश्च निजयोषितः
॥ ३ ॥ इत्युक्त्वा मम संदेशान् । वलमानं स वक्ति यत् ॥ अवधार्य समस्तं त-द्दिहैतव्यं
त्वया रयात् ॥ ४ ॥ न त्वं यद्यपि दूतत्वे । प्रेषितुं सत्तमोचितः ॥ परं नैतत्परः कर्तुं । सह-
ते नोत्सहेत च ॥ ५ ॥ नेति वक्तुमजानानो । देवदिन्नस्तमब्रवीत् ॥ केनाध्वना नराधीश ।
गम्यते यमसद्मनि ॥ ६ ॥ बहुशः संति पाशांतः-प्रवेशप्रमुखाः परे ॥ जाज्वल्यमानज्वलनः ।
पंथासन्नतरः परं ॥ ७ ॥ एवं वदति भूपाले । देवदिन्नेन जल्पितं ॥ प्रस्थास्यामि गृहं गत्वा ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तव दौत्याय सत्वरं ॥ ७ ॥ राजकार्यं तदादृत्य । समेत्य स्वनिकेतनं ॥ आचख्यौ यक्षराजाय । स्वरूपं सर्वमप्यसौ ॥ ए ॥ इतो राजा पुरीपार्श्वे । गर्तामेकामखानयत् ॥ ज्वलद्भिः खदिरांगारैः । समस्तां तामपूरयत् ॥ १० ॥ इतश्च गुह्यको देव–दिन्नरूपं विधाय सः ॥ निर्ययौ मंदिरात्तस्मा–त्स्फूर्तिमन्मूर्तिधारकः ॥ ११ ॥ हा हा महारत्नमिदं नरेषु । निहन्यते हीनतरेण राज्ञा ॥ अस्त्यस्य राज्ये सचिवोऽपि कश्चि–दन्यायतोऽमुं विनिवारयेद्यः ॥ १२ ॥ ससित्कारं महाकार–मदीनास्यं नृपाधमं ॥ प्रभूतैरपि निंदद्भि––रीक्ष्यमाणोऽथ नागरैः ॥ १३ ॥ ज्वलज्ज्वालितसर्वांगो । निर्गत्य नगरादसौ ॥ गर्तापार्श्वस्थितज्ञापं । चलन्नस्मीत्यत्राषत ॥ १४ ॥ हा हा मा मा न नेत्यादि । तत्र जल्पत्सु देहिषु ॥ ज्वालालिविकरालायां । गर्तायां सोऽपतद्द्रुतं ॥ १५ ॥ लोकाः कंपितमूर्धानः । कष्टान्मीलितलोचनाः ॥ ततो निवर्तितुं लग्ना । जहसैको नृपाधमः ॥ १६ ॥ क्षणमग्न्यंतरं स्थित्वा । निर्ययौ सोऽद्भुतं दिशन् ॥ अदग्धवपुरुत्तीर्य । ज्वलनं जललीलया ॥ १७ ॥ आगत्य नृपतिं नत्वा । श्यामीभूताननश्रियं ॥ पश्यत्सु सर्वलोकेषु । स्मेरास्येषु जजल्प सः ॥ १८ ॥ गतोऽहं यमराजस्य । राजधान्यां त्वदाज्ञया ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संदेशा नवतः सर्वे। तत्पुरः प्रतिपादिताः ॥ १ए ॥ वलमानमिदं तेन। नवंतं प्रतिभाणितं ॥ कृतांत इति मे नाम। कृतस्यांतं करोमि यत् ॥ २० ॥ सुकृतं डुःकृतं वापि। यथा येन कृतं नवेत् ॥ तस्मै तादृक् फलं यछन्। कथमन्यायकार्यहं ॥ २१ ॥ परं पालयितुं न्यायं। नियुक्तोऽस्ति मया नवान् ॥ अन्यायं स्वयमिछंतं। त्वां सहिष्ये न शक्तिमान् ॥ २३ ॥ सिंधुर्बधुरभूद्व्याघ्री। नाजिघ्रन्नाग्निरग्रहीत् ॥ यमोऽपि पक्षपात्येष। तन्नूनमजरामरः ॥ २४ ॥ इति चिंतातुरो नूत—ग्रस्तवद्भ्रून्यमानसः ॥ पीतासव इव प्रापे। राजा राजांगणं ततः ॥ २५ ॥ यक्षोऽपि देवदिन्नाय। स्वरूपं तन्निरूप्य सः ॥ अवतस्थे गृहस्यांत—र्हितचित्तस्तिरोहितः ॥ ॥ २६ ॥ राजापि विफलीनूतान्। विज्ञायोपायपादपान् ॥ उपायमस्मरन्नन्यं। जज्ञे कामज्वरातुरः ॥ २७ ॥ छित्रेष्वहःस्वतीतेषु। गत्वा चंद्रमतीसुतः ॥ अपृछदेव नवतो। वपुरस्ति निरामयं ॥ २७ ॥ निरामयत्वं कुत्रात्रो—द्भरे दाघज्वरे सति ॥ तेनोक्तं तर्हि वैद्योक्ता—न्यौषधानि विधीयतां ॥ २ए ॥ राज्ञोक्तं विहितान्येव। नाभूत्कोऽपि गुणः परं ॥ शेषनागशिसेरत्नं। यद्यायाति तदा नवेत् ॥ ३० ॥ शक्तियुक्तश्च सर्वत्रा—स्खलितप्रसरो नवान् ॥ अनुकंपापरः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कार्य—मेतन्निर्मातुमर्हसि ॥ ३१ ॥ आनेष्याम्यचिरादेव । देवेति पतिपद्य सः ॥ देवदिन्नो गृहं गत्वा । यक्षायाखिलमालपत् ॥ ३२ ॥ निरापायैरुपायैस्तै—र्न रोगो विनिवर्तते ॥ सान्निपातिकरोगः किं । प्रशाम्येन्मधुरौषधैः ॥ ३३ ॥ अधुना तं हनिष्यामि । सस्मितं यक्ष इत्यवक् ॥ न नेति कृपया चंद्र—यशःपुत्रे वदत्यपि ॥ ३४ ॥ स तस्य रूपमाधाय । धराधिपतिसन्निधौ ॥ एकां दिव्यरूपां नारीं । कृत्वा धृत्वा करेऽगमत् ॥ ३५ ॥ दीप्यमानं रत्नमेकं । नृभिपाय समार्पयत् ॥ उवाच च महाराज । नागलोकेऽन्नवं गतः ॥ ३६ ॥ त्वदीयसेवकत्वेन । मया निर्नयचेतसा ॥ शेषराजं पदा हत्वा । रत्नमेतदुपाददे ॥ ३७ ॥ इत्युत्कृष्टं बलं दृष्ट्वा । मयि पातालकन्यकाः ॥ जज्ञिरे सानुरागास्ता । मयैवं नणिताः पुनः ॥ ३८ ॥ अस्ति लक्ष्मीपुरस्वामी । लक्ष्मीदेवनरेश्वरः ॥ गुणानामालयो लक्ष्मी—विनिर्जितपुरंदरः ॥ ३९ ॥ तस्यास्मि नृत्यलेशोऽहं । ततस्त्वय्यनुरागतः ॥ मया सममिमां दासीं । प्रेषयामासुराश्रुताः ॥ ४० ॥ एतया सह हे नाथ । समेतव्यमिह त्वया ॥ इति विज्ञापितं तेऽस्ति । ताभिः सर्वाभिरादरात् ॥ ॥ ४१ ॥ इति श्रुत्वा देवदिन्न—प्रियासु रतिमत्यजत् ॥ यासामेतादृशी दासी । ता नविष्यंति

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किंविधाः ॥ ४२ ॥ अस्या दास्या अपि पुरो । दासीवन्नांति ताः स्त्रियः ॥ नव्येन्योऽपि हि नव्यानि । संति वस्तूनि विष्टपे ॥ ४३ ॥ तत्तासां नागकन्याना–मंगसंगं करोम्यहं ॥ ध्यात्वेति भूपतिः प्राह । तन्मार्गं मे प्रदर्शय ॥ ४४ ॥ दिव्यस्त्रीदर्श्यमानाध्वा । स समुत्तालमानसः ॥ एकं पातालविवरं । प्रविवेशावशेंद्रियः ॥ ४५ ॥ तस्याहं सुमतिर्मंत्री । मयेति नणितो नृपः ॥ प्रस्थानं न तव स्थाने । स्थानेऽस्मिन् नीषणे प्रनो ॥४६॥ यतः–धातुवादे तथा द्यूतें–जनसिद्धौ रसायने ॥ विवरादौ प्रवेशे च । दैवे रुष्टे मतिर्नवेत् ॥ ४७ ॥ अन्यच्च त्वमपुत्रोऽसि । राजन् राज्यं त्यजस्यदः ॥ निराधारं कथंकारं । प्रवेशोऽत्रोचितो न ते ॥ ४८ ॥ इत्यादिनानुशिष्टोऽपि । मोहधूर्तवशीकृतः ॥ सोऽगमद्विवरस्यांतः । कृतांतेन कटाक्षितः ॥४ए॥ अथासीत्तस्य शस्यास्या । देवी नुवनसुंदरी ॥ तया सह मया चक्रे । संकेतो यन्नतो नृपः ॥ ५० ॥ पातालमंदिरादेष । को वेत्त्यायाति नाथवा ॥ यदि ते जायते पुत्री । प्रकाश्यः पुत्र एव हि ॥५१॥ केवलज्ञानिनं साधुं । ततः पृष्ट्वा कमप्यहं ॥ करिष्यामि समं साध्यं । परिणाममनोरमं ॥ ५२ ॥ तत्रैकदा शुक्लध्यान–वह्निदग्धमलेंधनः ॥ तपोधनः प्रापदेकः । केवलज्ञाननास्करः

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥५३॥ स मुनिर्धर्मदेवाख्यो । देवैः कृतमहामहः ॥ देवदिन्नादिभिर्लोकैः । समागत्य स्म वंद्यते
॥५४॥ मज्ञानेन तदैकेन । समेत्यैतन्निरूप्यते ॥ जिज्ञासुर्नृपतेर्वृत्तं । तदंते गतवानहं ॥ ५५ ॥
प्रारेभे स सुधादेश्यां । देशनां दशनांशुभिः ॥ शुद्धसिद्धिशिलावर्ण-वर्णिकामिव दर्शयन् ॥५६॥
भो भो भव्या भवजलनिधौ प्राप्य दुःप्राप्यमेतं । सारद्वीपोपमनरभवं न प्रमादो विधेयः ॥
आदातव्यं सुकृतसलिलं चारुचारित्ररत्नं । ग्राह्यं येनाग्रत इह सुखं जायते सर्वदैव ॥ ५७ ॥
यो निश्चलमतिः कुर्या-द्धर्मं शर्मविधायकं ॥ तस्य विना प्रयासं स्युः । संपदः सकला अपि
॥ ५८ ॥ अवशैर्हृषीकतुरगै-रवश्यं जंतुरुद्धतैः ॥ नीयते नरकारण्ये । लक्ष्मीदेवनृपो यथा ॥
॥ ५९ ॥ दानादिधर्मरक्तानां । विरक्तानां च पाप्मनः ॥ परोपकाररक्तानां । श्रियः स्युर्देवदि-
न्नवत् ॥ ६० ॥ अत्रांतरे समुत्थाय । नत्वा चंद्रमतीसुतः ॥ अप्राक्षीत्किं प्रभो पुण्यं । मया
पूर्वभवे कृतं ॥ ६१ ॥ बभाण केवली साधुः । शृणु वृत्तांतमादितः ॥ अस्त्यत्र धनिलोकेन ।
पूर्णा धनपुरी पुरी ॥ ६२ ॥ तत्र कामध्वजो राजा । तस्य सन्मानभाजनं ॥ जनमान्यो धनैः
श्रेष्ठी । धनसाराभिधोऽभवत् ॥ ६३ ॥ अगण्यपुण्यलावण्य-पीयूषरससारणीः ॥ परिणिन्ये च-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्याः श्रीः । सोऽथ रंभानुकारिणीः ॥६४॥ वसंतसुंदरी प्रेम-सुंदरी रतिसुंदरी ॥ गुणसुंदर्यथो तासां । नामानि क्रमशोऽभवन् ॥ ६५ ॥ द्वितीयमिव चेतास्ति । तृतीयमिव लोचनं ॥ गुण-साराभिधस्तस्य । श्रेष्ठिश्रेष्ठः सुहृत्तमः ॥ ६६ ॥ बभूव धनसारस्य । भांडागारी धनाकरः ॥ सह तेनारुरोहार्थं । यानपात्रं समित्रकः ॥६७॥ द्वीपांतरगतः क्षेमे-णाप्तलाभः स्वभाग्यतः ॥ प्रापैकविंशतिगुणं । गुणानां निलयोपमः ॥६८॥ तत्रैव गुणसारोऽपि । परिणिन्ये शुभाकृतिं ॥ गुणश्रीःसंज्ञिकां कन्यां । साक्षादिव गुणश्रियं ॥६९॥ प्रशस्तवस्तुनिर्भृत्वा । यानं मित्रान्वितोऽचलत् ॥ धनसारोऽनुकूलेन । वायुना कर्मणेरितः ॥७०॥ समुद्रांतर्व्रजन् कामा-तुरचित्तो धनाकरः ॥ गुणश्रिया समं हास्य-- वाक्यानि परिजल्पति ॥ ७१ ॥ सा सती लज्जया नम्रा-नना किंचिन्न भाषते ॥ अन्यदा स तथा कुर्व-स्तत्प्रियेण विलोकितः ॥७२॥ तेनाथ धनसारस्य । स्वरूपं तन्निरूपितं ॥ तेनाकार्यं निजो भांडा—गारीति विनिवारितः ॥ ७३ ॥ भद्रोचितं न पुंसां स्या-त्परस्त्रीणामपीक्षणं ॥ आलापने तु किं वाच्यं । वचनीयमतीव यत् ॥ ७४ ॥ तत्त्वया नैव वक्तव्यं । किंचित्साकं गुणश्रिया ॥ दाक्षिण्याल्लज्जया भीत्या । तद्वचः प्रत्यपद्यत ॥ ७५ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

परं रागातुरत्वेन । तथैव कुरुतेस्म सः ॥ आलोकि धनसारेण । रुष्टचित्तेन चिंतितं ॥ ७६ ॥
धिगमुं निस्त्रपं नृत्यं । दुरात्मानं दुराशयं ॥ अनेन खलु मे नावी । मित्रनेदोऽचिरादपि ॥
॥ ७७ ॥ हेयोऽयमहितो नाग–दष्टांगुष्ठसमो मया ॥ इति ध्यात्वा स निक्षिप्त । उत्क्षिप्य क्षा-
रवारिधौ ॥ ७८ ॥ स पूर्वजन्मपोतस्य । पुर्वपुण्यतरोः फलं ॥ फलकं प्राप्तवानेकं । विवेकमिव
संसृतौ ॥ ७९ ॥ तदाधाराच्चिरादाप । तीरं नीरनिधेरयं ॥ समीरणेन शीतेनो–त्तस्थौ संप्राप्त-
चेतनः ॥ ८० ॥ ज्ञानाकरकुलपतेः । प्रबुध्धो वचनोच्चयैः ॥ धनाकरो विरक्तात्मा । तापसं व्र-
तमाददे ॥ ८१ ॥ चिरमज्ञानकष्टानि । विविधानि विधाय सः ॥ मृत्वा विद्याधराधीशो । वा-
युवेगाभिधोऽजनि ॥ ८२ ॥ इतो गुणश्रिया ज्ञात्वा । पातितं तं पयोनिधौ ॥ विषादोऽकारि
चित्तेऽयं । वराको मत्कृते हतः ॥ ८३ ॥ शतधन्या ये न जायंते । परेषां घातहेतवे ॥ प्रत्न-
वंत्युपकाराय । सर्वेषामपि देहिनां ॥ ८४ ॥ अद्राक्षीद्गुणसारस्तां । विषादापन्नमानसां ॥
सोऽचिंतयदियं नूनं । न प्रिया शीलशालिनी ॥ ८५ ॥ अन्यथा कथमेतस्मिन् । पातितेऽब्धौ
धनाकरे ॥ एषा विषादमापन्ना । तं ध्यायंतीव तिष्ठति ॥ ८६ ॥ कुशीलया परासक्त—चि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तया किं ममैतया ॥ ध्यात्वेति प्रणयिनीं स । न जल्पयति नेक्षते ॥ ७७ ॥ तया प्रयुक्तं प्रणया—च्छिनयं न प्रतीच्छति ॥ क्रमात्प्रवहणं प्राप । तीरं क्षेमेण वारिधेः ॥ ७८ ॥ गृहीत्वा स्वस्ववस्तूनि । ययुः सर्वे पुरांतरा ॥ धनसारः समित्रोऽपि । प्राप्तो निजनिकेतनं ॥ ७९ ॥ स्वपत्युरपमानेन । गुणश्रीर्दूनमानसा ॥ चिंतयामास हा स्वामी । कुपितः किमकारणं ॥ ८० ॥ कारिता मंत्रतंत्राद्याः । सौभाग्योत्पत्तये तया ॥ परं तैर्न गुणो जज्ञे—ऽसाध्यव्याधाविवौषधैः ॥ ८१ ॥ पृच्छतिस्मैकदा साथ । साध्वीः सौभाग्यकारणं ॥ ता ऊचुर्नाधिकारो नो । भद्रे सांसारिके विधौ ॥ ८२ ॥ परं सुखार्थिनी चेत्त्वं । तदा धर्मं समाचर ॥ सर्वकार्याणि सिध्यंति । येनाचीर्णेन हेलया ॥ ८३ ॥ रोहिणीकल्पवृक्षादि—विशेषेण प्रवर्तते ॥ दौर्भाग्यध्वांतविध्वंसि—तपनातपवत्तपः ॥ ८४ ॥ साध्वीनां ताः सुधाकुल्या—तुल्याः पीत्वा सरस्वतीः ॥ सश्रद्धया यथोद्दिष्टं । तप्यतेस्म तपस्तया ॥ ८५ ॥ इतश्च धनसारस्या । मंदिरे सुंदराकृतिः ॥ प्रपन्नजिनकल्पश्री—रागाद्धर्मधनो मुनिः ॥ ८६ ॥ उत्थाय धनसारेण । प्रतिपत्तिपुरस्सरं ॥ ववंदे स ययाचे च । चातुर्मासिकमाश्रयं ॥ ८७ ॥ स्वगृहैकप्रदेशे त—त्तस्मै तेन ददे मुदा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ कायोत्सर्गं स च ध्यानं । कुर्वंस्तत्रावतिष्ठते ॥ ९८ ॥ अन्यदा धनसारोऽगा—त्स्वजनामं-
त्रितः क्वचित् ॥ निश्यपश्यन् प्रियास्तस्य । तं मुनिं मदनातुराः ॥ ९९ ॥ जजल्पुः स्निग्धवा-
क्यानि । चंगस्वांगान्यदर्शयन् ॥ आलिंगनं ददुर्गाढं । कायोत्सर्गजुषो मुनेः ॥ ४०० ॥ चित्र-
लिखितवत्काष्ट—घटितान्नः स संयमी ॥ तिष्टतिस्म विचेष्टः सन् । जितकामा हि साधवः ॥
॥ १ ॥ प्रजाते तेन जातेऽथ । समस्तास्ताः प्रबोधिताः ॥ जगृहर्निश्चलं शीलं । गृहमेधिजनो-
चितं ॥ २ ॥ धनसारो गृहायातो । मुनिसेवनतत्परः ॥ परममार्हतं धर्म—मर्जयामास सप्रियः
॥ ३ ॥ धनसारस्ततो मृत्वा । देवदिन्न जवानभूत् ॥ तत्प्रिया वेगवत्याद्या । विद्याधर्योऽजवन्न-
मूः ॥ ४ ॥ गुणसारप्रिया मृत्वा । गुणश्रीरिह जन्मनि ॥ देवसुंदर्यभूदेषा । त्वदीयापूर्वव-
ल्लजा ॥ ५ ॥ पूर्वरागाद्वायुवेग । एतस्यामन्वरज्यत ॥ पूर्ववैराद्भवंतं च । क्षिप्तवान् जलधे-
र्जले ॥ ६ ॥ पूर्वपुण्यानुजावेना—चिराद्राज्यं लजिष्यसे ॥ अवसाने समाश्रित्य । प्रव्रज्यां
शिवशर्म च ॥ ७ ॥ इति केवलिनः श्रुत्वा । वचनं रजतोज्ज्वलं ॥ सप्रियोऽपि देवदिन्नो । द्वा-
दशाणुव्रतान्यलात् ॥ ८ ॥ नत्वा मुनिं निजं स्थानं । प्राप पापपराङ्मुखः ॥ यक्षेणोत्क्षिप्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नीतश्च । स पुरं जनवल्लभं ॥ ९ ॥ तत्र संस्थाप्य तं राज्ये । गुह्यकोऽगान्निजास्पदं ॥ सलीलं पालयामास । देवदिन्नः सुखेन तत् ॥ १० ॥ अथो मया मुनिः पृष्टो । भगवन् किमजायत ॥ विवरांतः प्रविष्टस्य । लक्ष्मीदेवनरेशितुः ॥ ११ ॥ ततो मुनिवरोऽभाणी-द्विवरांतर्गते नृपे ॥ यक्षो मनोरमो दिव्य-स्त्रीरूपं परिहृत्य तत् ॥ १२ ॥ नानाराक्षससंभूतानां । रूपाण्याविश्चकार सः ॥ भक्षितो भूपतिर्मृत्वा । प्रथमं नरकं ययौ ॥ १३ ॥ मयापृच्छि पुनः साधु—र्भगवन् ज-नयिष्यति ॥ किं पुत्रं पुत्रिकां वा सा । देवी भुवनसुंदरी ॥ १४ ॥ तेनोक्तं पुत्रिकां सा च । करिष्यति कियच्चिरं ॥ राज्यं ततो हरिषेणः । कुमारः परिणेष्यति ॥ १५ ॥ स राज्यं पाल-यन्नेत—ज्जित्वाखिलमहीपतीन् ॥ भरतत्रिखंडनाथो । वासुदेवो भविष्यति ॥ १६ ॥ इति श्रु-त्वा मुनिं स्तुत्वा । स्वगृहं प्राप्तवानहं ॥ काले चाजीजनत्पुत्रीं । देवी भुवनसुंदरी ॥ १७ ॥ लोके प्रकाशितः पुत्रो । महदुत्सवपूर्वकं ॥ समुद्रदत्त इत्यदः । तस्या नाम प्रतिष्ठितं ॥ १८ ॥ प्रच्छन्नं वर्धिता बाला । पौरुषं वेषमाश्रिता ॥ राज्यं च पालयामास । सिंहासनस्थिता सुखं ॥ ॥ १९ ॥ हरिषेणकुमारेंद्र । शृण्वेवयं सा कुमारिका ॥ अहं च सुमतिर्मंत्री । भवदंते स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मागतौ ॥ २० ॥ अस्या दृष्ट्वा शुभाकारं । भवंतं चंद्रमाःसमं ॥ क्षुब्धो मनोबुद्धिस्तस्मा–ज्जल्पिता स्खलिताक्षरं ॥२१॥ तत्कुमारवरैतस्या–स्त्वं पणिग्रहणं कुरु ॥ लक्ष्मीपुरपुरे पश्चा–ज्जत्वा राज्यमलंकुरु ॥ २२ ॥ हरिषेणकुमारोऽवक् । सचिवेश पितुः पुरः ॥ गत्वैवं वद वृत्तांतं । पश्चाद्योग्यं करिष्यते ॥ २३ ॥ ततः सुमतिमंत्रीशः । सूरसेननृपांतिके ॥ गत्वा निरूपयामास । स्वरूपं पूर्ववर्णितं ॥ २४ ॥ हृष्टेनाकारि भूपेन । विवाहोत्सवपूर्वकं ॥ समग्रापि च सामग्री । कालादल्पतरादपि ॥ २५ ॥ स्थानात्स्थानात्समायातै–र्जनजातैरपूरि तत् ॥ पुरं तथा यथा स्थालाः । पेतुर्नोच्छालिता भुवि ॥ २६ ॥ समुद्रदत्तया साकं । प्रदत्तजनकौतुकः ॥ हरिषेणकुमारस्य । जज्ञे पाणिग्रहोत्सवः ॥ २७ ॥ पक्षद्वयतटस्पर्शी । सरसः कमलालयः ॥ महारंगतरंगौघ–स्तरंगिण्योघवद्भृतौ ॥ २८ ॥ अथो सुमतिमंत्रीशः । सूरसेननरेश्वरं ॥ व्यजिज्ञपदिति प्रीति–प्रोल्लसद्वदनांबुजः ॥ २९ ॥ लक्ष्मीपुरे पुरे प्रेष्य । हरिषेणं निजांगजं ॥ एणाक्षीमिव तन्नाथ । सनाथं कुरु सांप्रतं ॥ ३० ॥ भूमीपालोऽथ हर्षेण । हरिषेणं समंत्रिणं ॥ रामसेनान्वितं प्रैषी–द्गणाढ्या सहितं ततः ॥ ३१ ॥ प्राप लक्ष्मीपुरोपांते । कुमारः सारवस्तु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नृत् ॥ प्राविशत्सोत्सवं लोकै–र्लोक्यमानः सकौतुकं ॥ ३२ ॥ नृपासने निवेश्याथ । मंत्रिसा-
मंतमंडलैः ॥ हरिषेणकुमारस्य । चक्रे राज्याभिषेचनं ॥ ३३ ॥ समं स रामसेनेन । प्रजापा-
लनलालसः ॥ सुखं करोति साम्राज्यं । न्यायांबुजदिवाकरः ॥ ३४ ॥ अन्यदा देवदिन्नः स ।
विद्याधरनरेश्वरैः ॥ तस्मिन् पुरे समायासी–त्सेवायै पितृपादयोः ॥ ३५ ॥ श्रुत्वा व्यतिकरं
सर्वं । हरिषेणनरेशितुः ॥ नररत्नैर्वृतायां स । सभायां समुपाययौ ॥ ३६ ॥ हरिषेणेन हर्षे-
ण । स्वासनार्धे निवेश्य सः ॥ अपृछि कुशलोदंतं । दंतपंक्तिप्रकाशिना ॥ ३७ ॥ तदादरात्प्रस-
न्नेन । देवदिन्नेन साग्रहं ॥ प्रज्ञप्त्याद्या महाविद्या । ददिरेऽस्मै प्रमोदतः ॥ ३८ ॥ तेनापि
ददिरे सर्वा । रामसेनाय बंधवे ॥ विधिना साधनायासा–मुपविष्टावुभावपि ॥ ३९ ॥ तद-
धिष्टायिका देव्यः । प्रत्यक्षीभूय तत्क्षणं ॥ सिध्ध्यंतिस्म हि महतां । विलंबो न समीहते ॥
॥ ४० ॥ भाविने वासुदेवाय । हरिषेणाय ता ददुः ॥ दिव्यानि नीलवासांसि । सप्त रत्नान्य-
मूनि च ॥ ४१ ॥ संग्रामिको रथः शार्ङ्गं । धनुः कौमुदकी गदा ॥ श्रीवत्सो नंदकः खड्ग–
स्तूणीरद्वयमक्षयं ॥ ४२ ॥ रामाय नीलवासांसि । तथा रत्नचतुष्टयं ॥ दिव्यं हलं च मुशलं ।

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

धनुस्तूणीरमक्षय्यं ॥ ४३ ॥ रत्नानि नररत्नाख्यां । प्रदायैतानि देवताः ॥ स्मारणीयाः पुनः कार्ये । इत्युक्त्वा स्वास्पदान्ययुः ॥ ४४ ॥

अथान्यदा नृपास्थाने । दूतः श्रीगृहपत्तनात् ॥ समाजगाम पद्मेन । प्रेषितः प्रतिचक्रिणा ॥ ४५ ॥ स प्राह साहसाधारो । भरतार्धधराधवैः ॥ संसेव्यपादपद्मेन । पद्मेन प्रेषितोऽस्म्यहं ॥ ४६ ॥ तेनादिष्टं तवास्त्येतद् । भृत्यानां वस्तु यद्भवेत् ॥ तत्स्वामिसत्कमेवेह । यत्ते तद्दत्तजीविनः ॥ ४७ ॥ अस्मत्सेवकसत्कस्य । राज्यस्य स्वामिनो वयं ॥ कन्या समुद्रदत्ता सा । युज्यतेऽस्माकमेव च ॥ ४८ ॥ तदस्मान्निरदत्तं स्व-राज्यं नारीमिमां च नः ॥ भुंजानो न कथं भावी । निग्राह्यश्चौरजारवत् ॥४९॥ रे मुग्ध दुग्धवदन । त्वं न जानासि कंचन ॥ व्यवहारं महीपीठे । बाल्ये किं नाम विद्यते ॥ ५० ॥ विद्यते यदि नो मेधा । तव तातस्य चेतसि ॥ तदा मान्यो न मंत्री किं । मतिमांस्तमशिक्षयत् ॥ ५१ ॥ सूरसेनो धिया हीनो । येनेह प्रेषितो भवान् ॥ संक्लेशबहुले स्थाने । को दक्षः स्वं शिशुं क्षिपेत् ॥ ५२ ॥ सुमतिः कुमतिश्चायं । यस्त्वामाहूतवानिह ॥ सुधीः कः करिणो ग्रासं । रासभाय प्रयच्छति ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५३ ॥ राज्यं सुमतिनानेन । दत्तं चानुमतं कृतं ॥ सूरसेनेन स्नेहेन । त्वया चांगीकृतं मुदा ॥ ५४ ॥ तन्मे त्रयोऽपि निग्राह्याः । परं क्षांतमिदं हि वः ॥ वारमेकं विमुच्यंते-ऽत्यंतमप्यपराधिनः ॥ ५५ ॥ अतःपरं परं राज्यं । परित्यज्य व्रजेरितः ॥ कन्या समुद्रदत्ता च । कर्तव्या तदुपायनं ॥ ५६ ॥ अन्यथा निगृहीष्यामि । जवंतमपराधिनं ॥ समं समेत्य भूपालै-र्भरतार्धनिवासिभिः ॥ ५७ ॥ तातस्त्राता न मंत्री च । जवंतमप्युपस्थिते ॥ सिंहे कर्षति वालं स्वं । शृगालैः किमु जायते ॥ ५८ ॥ सर्वैः समीहते स्थाने । स्थातुमुच्चैस्तरे न हि ॥ परमुच्चैर्गतो नीचः । सह्यते नेह काकवत् ॥ ५९ ॥ तद्भो बाल द्विधा बालो । माभूर्गर्वैः पुरादितः ॥ जीवद्भिः प्राप्यते सर्वं । पुना राज्यांगनादिकं ॥६०॥ इति पद्मनृपादेशं । दूतो निर्दिश्य तस्थिवान् ॥ हरिषेणस्तदावादी-द्भ्रुकुटीभीषणेक्षणः ॥ ६१ ॥ दूत ते न विचारज्ञः । स्वामी कामी हि केवलं ॥ परिणीतां परेणैतां । कथं कामयतेऽन्यथा ॥ ६२ ॥ अदत्तं स्वामिना राज्यं । वांछन्नन्यायकृत्खलु ॥ चौरो जारः कथं चाहं । यो दत्तं द्वयमाप्तवान् ॥ ६३ ॥ अनयो राज्यांगनयो-र्यदि वांछां विधास्यति ॥ सोऽतःपरंतदा तस्य । दास्ये शिक्षां यथो-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

चिंतां ॥ ६४ ॥ रामसेनोऽप्यथाचष्ट । पटिष्टवचनोच्चयैः ॥ मन्ये दूत तवेशस्य । सन्मंत्री नास्ति कश्चन ॥ ६५ ॥ यस्य बुद्धिर्नवेत्स्वेन । दक्षः को वा विचक्षणः ॥ स प्रसुप्तस्य सिंहस्य । कर्णाग्रेरुं करोति किं ॥ ६६ ॥ केयं कुबुद्धिस्त्वद्भर्तु—र्यदियं मम मेदिनी ॥ राज्यानि वीरजोज्यानि । कस्य सत्कानि संत्यहो ॥ ६७ ॥ अदत्तं यदि पश्चेन । हरिषेणनरेश्वरः ॥ राज्यं गृह्णन् नवेच्चौरो । जारश्चैनां शुन्नांगनां ॥ ६८ ॥ तदा श्रीहरिषेणेना—दत्तं राज्यं च योषितः ॥ ज्ञुंजानो न कथं जावी । चौरो जारश्च पश्चराद् ॥ ६९ ॥ दूतः प्रभूतमाटोप—माधायेत्यन्यधात्पुनः ॥ युवाज्यां बालबुद्धिज्यां । कश्चिन्न ज्ञायते नयः ॥ ७० ॥ श्रियः सद्मापि पद्मोऽपि । न स राज्ञः कुतश्चन ॥ संकोचं याति मित्रस्य । प्रत्युतोल्लासकारकः ॥ ७१ ॥ यस्य गायंति संग्राम—ज्ञूमौ प्रेतांगना यशः ॥ पतितारिशिरोमाला—तालास्फालनलालसाः ॥ ॥ ७२ ॥ यस्य हुंकारमात्रेण । सिंहस्येव जयातुराः ॥ शृगाला इव भूपाला । न चरंति महीतले ॥ ७३ ॥ यस्याप्रतिहतं चक्रं । कृतांतवदनाकृति ॥ ज्ञ्रांत्वा छिनत्ति शीर्षाणि । वैरिणां नालवीलया ॥ ७४ ॥ यक्षा यस्य वसंति सज्जाभुजयोरष्टौ सहस्रास्तथा । यस्याग्रे जरतार्धभू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सिपतयस्तिष्ठंति सेवापराः ॥ क्षोभं यांति विलोक्य यं सुरगणाः का मानवानां कथा । हा
हीनैः समशीर्षिकासममहो तेनापि निर्मीयते ॥ ७५ ॥ का स्पर्धा भवतोस्तेना–हिना दर्दु-
रयोरिव ॥ सर्पयोरिव ताक्ष्येणा–ग्निना शलभयोरिव ॥ ७६ ॥ युवयोर्मरणायेयं । स्पर्धा पद्म-
नरेंडुना ॥ पक्षोद्गमः कीटिकानां । नूनं मृत्यव एव हि ॥ ७७ ॥ तिष्ठतात्स स्वयं राजा ।
त्वं तत्सैन्यांतरागतः ॥ बिंदुवृष्टिरिवांभोधौ । ज्ञास्यसे न ससैनिकः ॥ ७८ ॥ सेवका अपि
मोक्ष्यंति । त्वां तेनोपद्रुता द्रुतं ॥ वृक्षं दावानलालीढं । खगा इव चिराश्रिताः ॥ ७९ ॥ त्य-
ज्यतां त्यज्यतां राज्यं । दीयतां दीयतां च सा ॥ पश्चात्तापहृतेः पश्चा–दपि स्मार्येति वा-
ग्मम ॥ ८० ॥ इति श्रुत्वा रामसेनः । क्रोधोद्भूतारुणेक्षणः ॥ समुच्छ्वसितसर्वांगो । रणांग-
णमिवाश्रितः ॥ ८१ ॥ पादेनास्फोट्य भूपीठं । प्रकंपितधराधरं ॥ पाणिनास्फाल्य दोर्दंडं ।
प्रतिगर्जितविष्टपं ॥ ८२ ॥ इत्यूचे रे तवेशस्य । दत्तः पादोऽस्ति मूर्धनि ॥ आवाभ्यां दोःस-
हायाभ्यां । तथा तत्पक्षपातिनां ॥ ८३ ॥ किं तस्य पौरुषं ब्रूषे । सामान्यजनभीतिकृत् ॥ ए-
ते ते न परं वृक्षा । वात्यया प्रपतंति ये ॥ ८४ ॥ इतो गच्छ यथेच्छं त्वं । प्रभो रोषं पुषाण च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ समायातु स संनह्य । सत्वरं सह सेनया ॥ ७५ ॥ सिंधुराज्यामिवावाज्या—मालोड्य
पृतनासरः ॥ पद्मं पद्ममिवादाया—मृदु मर्दिष्यते क्षणात् ॥ ७६ ॥ अतःपरं न वक्तव्य—मसं-
बद्धमिह त्वया ॥ त्वरया गच्छ स्वस्थेः । स्वं स्वामिनमिहागमे ॥ ७७ ॥ इति निर्भर्त्सितो दू-
तः । सेवकैर्गलहस्तितः ॥ ततो निःसृत्य कालास्यः । कालवत् श्रीगृहं ययौ ॥ ७८ ॥ द्विगु-
णीकृत्य वृत्तांतं । तं नृपाग्रे न्यवेदयत् ॥ सोऽपि कोपितचेतस्कः । तूर्यं जंत्रामवादयत् ॥७९॥
तत्क्षणं तन्निनादेन । सज्जीभूय महाभुजाः ॥ षोडशसहस्रसंख्या । मिमिलुः पद्मसद्मनि ॥
॥ ८० ॥ मंत्रिवृद्धाननापृच्छ्या—वगणय्य कुवासरं ॥ सुभटानप्यसत्कृत्य । प्राचालीत्स नरेश्व-
रः ॥ ८१ ॥ दुर्निमित्तेषु जातेषु । वार्यमाणोऽपि मंत्रिभिः ॥ कालपाशैरिवाकृष्टो । नास्था-
न्नुन्नः कुकर्मभिः ॥ ८२ ॥ क्षुब्धाब्धिरिव दुःप्रेक्ष्यो । वाहिनीनामवस्थितिः ॥ प्रससार नरा-
धीशो । धुवानः पृथिवीतलं ॥ ८३ ॥ सहस्रपत्रसंपन्ने । कमलालंकृते तते ॥ पद्मपद्महृदे चि-
त्रं । वाहिन्यो न्यपतन्निह ॥ ८४ ॥ रजोनिर्धूम्रिता आशा । विदधानोऽखिलाश्चलन् ॥ क-
ल्पांतानलकल्पोऽसौ । कस्यातंकाय नाभवत् ॥ ८५ ॥ सोऽविच्छिन्नप्रयाणेना—ययौ तद्देशस-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्निधौ ॥ हरिषेणनृपोऽप्युच्चै-श्चरैर्वृत्तं निवेदितः ॥ ४९६ ॥ सोऽप्युच्छ्वसितसर्वांग । आपृच्छ्याखिलमंत्रिणः ॥ सत्कृत्य सुभटान् शुद्ध-वेलायामचलत्पुरात् ॥४९७॥ शोभनैः शकुनैर्वृद्धै-रिव सूचितमंगलः ॥ चतुरंगबलैर्युतो । हरिषेणनृपो ययौ ॥ ४९८ ॥ आययौ महतस्तस्य । सैन्यस्य सविधेः क्षणात् ॥ पद्मालंकृतमध्यस्य । पिताब्धिरिव वारिधेः ॥४९९॥ तत्रामिलद्देवदिन्नो-ऽसंख्यविद्याधरैः समं ॥ जनकः सूरसेनोऽपि । तत्रागात्सह सेनया ॥ ५०० ॥ अन्येऽपि केऽपि भूपालाः । श्रुत्वा ज्ञानिमुखांबुजात् ॥ तस्य शस्यतरोदर्कं । संप्रर्कं चक्रिरे हरेः ॥ १ ॥ युद्धाय बुद्धिं स विधाय धीरः । श्रीपद्मनामा प्रतिवासुदेवः ॥ चक्रे सहस्रारविभाजि चक्र-व्यूहं स्वसैन्ये कृतवैरिदैन्ये ॥ २ ॥ उद्दामधामा हरिषेणनामा । न्निजध्वजिन्यां गुरुरूपानुकारं ॥ व्यूहं व्यधाद्वैरिनरेंद्रनाग—विध्वंसकं चित्रविचित्रपत्रं ॥ ३ ॥ उभे अपि महासैन्ये । क्षुब्धौ पूर्वापरांबुधी ॥ इत्युत्कटभटोल्लोलै-र्लोले आसन्नमीयतुः ॥ ४ ॥ वाद्येषु वाद्यमानेषु । नृत्यत्सु सुभटेषु च ॥ मिथो बले अभ्यास्येतां । विशालोत्तालतालवत् ॥ ५ ॥ बप्प बप्पेति जल्पंतो । भटाः सुभटसंहतेः ॥ ऊचिरे बिरुदश्रेणी-रधिकोत्साहकारिणीः ॥ ६ ॥ रथेशो रथि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ना सादी । सादिना च निषादिना ॥ निषादी पत्तिना पत्ति-रास्फलद्दलगार्जितः ॥ ७ ॥ उ-त्पतंतिस्म शस्त्राणि । द्वयोरास्फलतोर्मिथः ॥ युगांतपवनोद्भ्रांत—वारिध्योरिव वीचयः ॥ ॥८॥ करवालझलत्कार-ज्वालामालाकरालितं ॥ रणाग्निं प्रीणयंतिस्म । जटाः प्राणैस्तृणैरिव ॥ ए ॥ तूर्यनादैर्विवादैश्च । सिंहनादैः कृतैर्जटैः ॥ प्रहारध्वनिन्निर्विश्वे । शब्दाद्वैतमिवाजनि ॥ १० ॥ नृत्यंतिस्म कबंधौघाः । पतंतिस्म च सिंधुराः ॥ उत्पतंतिस्म तुरगा । छिन्नशीर्षपदो-दराः ॥ ११ ॥ शरधाराधोरणीन्नि-र्वर्षतोऽस्त्रांशुविद्युतः ॥ मेघा इव जटास्तत्र । चक्रू रुधिरक-र्दमं ॥१२॥ शरांधकारे संजाते । रजोरुद्धे दिवाकरे ॥ तारायिते स्फुलिंगौघै—र्दिवा रात्रिरि-वान्नवत् ॥ १३ ॥ सर्वतः शूरमेघेषु । वर्षत्सु शरवारिन्निः ॥ शस्त्रन्निन्नेन्नन्नूजृद्न्यो—ऽवहन् कीलालनिम्नगाः ॥ १४ ॥ तत्र छिन्नातपत्राणि । पुंमरीकोपमां दधुः ॥ पद्मिनीपत्रवत्कर्णाः । कृत्ताः करटिनां बभुः ॥ १५ ॥ छिन्नकुंजकरा नाल-लीलां दधुरथांगवत् ॥ रथांगानि तरंति-स्म । मज्जंतिस्म गजा अपि ॥ १६ ॥ धीवरा इव धीराः स्म । तरंति तरणातुराः ॥ तटद्रुमा इव जटा । आकृष्यंतेस्म वेगतः ॥ १७ ॥ एवं चिरतरं युद्धं । सैन्ययोरुन्नयोरपि ॥ तुल्यमेव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रेक्षकाणां । देवानामपि भीतिकृत् ॥ १८ ॥ बहुत्वात्पद्मसेनायाः । शूरा अपि हरेर्भटाः ॥ अ-
भज्यंत घनाः श्वानः । सिंहं नाकुलयंति किं ॥ १९ ॥ प्रवाहा इव गंगाया । कृतमार्गाः स्वयं
बलात् ॥ त्रयोऽपि निःसरंतिस्म । पातयंतोऽरिपादपान् ॥ २० ॥ दिक्षु क्षिपंतोऽस्त्रजाल—ज्वा-
ला वैश्वानरा इव ॥ त्रयस्ते प्राविशन् वैरि—सैन्यकाननमंतरा ॥ २१ ॥ एकोऽप्येतादृशः स-
र्वं । सैन्यं क्षोभयितुं क्षमः ॥ मंदराद्रिरिवांभोधिं । किं पुनस्तादृशास्त्रयः ॥ २२ ॥ सूरसेनो
महाशूरः । शरैरापूरयन् दिशः ॥ शुशुभे भाद्रपदीयः । पयोद इव वारिभिः ॥ २३ ॥ सूर-
सेनशराः क्रूराः । सरलाः पन्नगा इव ॥ प्राणवायुं पिबंतिस्म । वैरिणां क्रूरदृष्टयः ॥ २४ ॥ त्र-
स्यंतिस्म तृणानीव । तद्भयात्पद्मसैनिकाः ॥ अनेकाशुगपक्षोत्थ—वाताघातादिवेरिताः ॥२५॥
महासेनो नृपः पद्म—पादपद्ममधुव्रतः ॥ वीरव्रतं समुत्तस्थौ । सूरसेनस्य संमुखं ॥ २६ ॥ स-
पक्षैर्बाणसंघातै—रखलजातिप्रकाशिनौ ॥ उभावास्फलतां वीरौ । जिगीषू वादिनाविव ॥
॥ २७ ॥ इतश्च रामसेनोऽपि । हलेनाकृष्य दूरतः ॥ कणवन्मुशलेनाशु । खंडयामास वैरि-
णः ॥ २८ ॥ यत्रापतत्तन्मुशलं । कुशलं तत्र विद्विषां ॥ बभूव तत्क्षणं स्वर्ग—स्त्रीपरिष्वंगसं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमात् ॥ २९ ॥ एकोऽपि कोपितात्मा स । । चूर्णीकृत्य सहस्रशः ॥ पद्मसैन्ये ददौ दैन्य-मसद्‌प्यात्मसंनिधौ ॥ ३० ॥ घ्नंतं मुशलदंडेना-पतंतं तं गजेंद्रवत् ॥ रुरोध क्रोधाद्दंतीव । पद्मपुत्रो जयद्रथः ॥ ३१ ॥ विविधैरायुधैर्युद्धं । विदधानौ धराधरं ॥ धूनंतौ सिंहनादेन । सिंहाविव विरेजतुः ॥ ३२ ॥ इतश्च देवदिन्नोऽपि । व्यवहारमिवादधे ॥ व्यवहारी प्रहाराणां । दानात्प्राणानुपाहरन् ॥ ३३ ॥ दोर्बलेन विशालेन । शस्त्राभ्यासबलेन च ॥ विद्याबलेन सकलं । चक्रेऽरिकुलमाकुलं ॥ ३४ ॥ विद्याप्रज्ञावतः प्रादु-श्चकार महतीं शिलां ॥ यां दृष्ट्वा वैरिणो मूर्ध-संस्थितां भीतिमासदन् ॥ ३५ ॥ रे रे नश्यंतु नश्यंतु । पतत्येषा शिरःस्विति ॥ दूरगैरुच्यमानेऽपि । मुच्यमानेऽपि चाध्वनि ॥३६॥ भटैराकृष्य विशिखै-र्हन्यमानापि सा शिला ॥ निखिलांश्चूर्णयामास । पश्यतो नश्यतोऽप्यरीन् ॥ ३७ ॥ युग्मं ॥ विद्याधरो वायुवेगः । क्रुद्धो युद्धाय बद्धधीः ॥ पद्मपक्षो दुढौकेऽथ । देवदिन्नाय चेत्यवक् ॥ ३८ ॥ यदि विद्याबलं तेऽस्ति । तदागच्छ मया समं ॥ युध्यस्व रे वराकान् किं । काकानिव निहंस्यमून् ॥ ३९ ॥ एह्येहि गेहिनीं स्वीया-महो त्वमपि रोदय ॥ देवदिन्नो वदन्नेवं । करवालमुदक्षिपत् ॥ ४० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वायुवेगः स्वखड्गेन । तदाहत्य विनिर्ममे ॥ स्फुलिंगानूर्ध्ववेगान् दीपान् । स्वर्गे गंतुमना इव ॥ ४१ ॥ एवमेते महाशूराः । सूरसेनादयस्त्रयः ॥ शस्त्रैश्चिरमयुध्यंत । महासेनादिभिस्त्रिभिः ॥ ४२ ॥ अजेयमपरास्त्रौघै—श्चिराद्विज्ञाय वैरिणं ॥ अस्मार्षीत्सूरसेनः स्वां । देवताधिष्ठितां गदां ॥ ४३ ॥ भ्रमयित्वा तया शत्रु—मुत्पतंतं तमुद्धतं ॥ निहत्य सहसा चक्रे । द्विखंडं चंडविक्रमः ॥ ४४ ॥ योधयित्वा चिरं रामो । रणकौतूहलादिव ॥ न्यपातयच्छिरो भित्वा । मुशलेन जयद्रथं ॥ ४५ ॥ देवदिन्नोऽपि वर्षित्वा । दिव्यास्त्रांबुभिरब्दवत् ॥ बिभेद विद्युतं मुक्त्वा । वायुवेगं गिरींद्रवत् ॥ ४६ ॥ अथो निष्कंटकं पद्म—सैन्यं ते पद्मखंडवत् ॥ अखंडं खंडयामासु—रनायासं गजा इव ॥ ४७ ॥ ध्वस्यमानं त्रस्यमान—मेव पश्यद्दिशो दश ॥ दृष्ट्वा सैन्यं निजं योध्धु—मुत्तस्थौ पद्मभूपतिः ॥ ४८ ॥ एकेनापि प्रहारेण । पातयन् स सहस्रशः ॥ अरीन् पुरः स्थितान् मार्गे । विदधे वेगदुर्गमं ॥ ४९ ॥ रामसेनं रिपून् घ्नंत—मकस्मादेत्य दैत्यवत् ॥ जघान शक्तिशस्त्रेण । यथाशक्ति स पद्मराट् ॥ ५० ॥ पपात मूर्छितो रामो । मुखेन रुधिरं वमन् ॥ हाकार उत्पपातोच्चै—र्हरिषेणबलेऽखिले ॥ ५१ ॥ जीवंतं तं

P.P. Ac. Gunratnasuri M.S.          Jun Gun Aaradhak Trust

पुनर्ज्ञात्वा । दंतुं शक्तिमुदक्षिपत् ॥ आकृष्य चानयद् दूरं । देवदिन्नस्तदैत्य तं ॥ ५२ ॥
चिक्षेप पद्मभूपस्य । सूरसेनः शरोत्करान् ॥ युयुत्सुराजगामाग्रे । धनुरादीनखंडयत् ॥ ५३ ॥
रामसेनो हतोऽनेन । जरता निहतेन किं ॥ हन्यते हरिषेणोऽथा—पराधी सैन्यनायकः ॥
॥ ५४ ॥ विगणय्येति तं पद्मः । प्रबलः प्राचलत्ततः ॥ सकलं व्याकुलं कुर्व—न्नुग्रास्त्रैर्वैरिणो
बलं ॥ ५५ ॥ तस्मिन् विपक्षवृक्षौघान् । पातयत्युग्रवातवत् ॥ दूरेण रेणुवच्चूर्ण—मुड्डीनं ह-
रिसैनिकैः ॥ ५६ ॥ क्व रे स हरिषेणाख्य । इति जल्पंतमुद्धतं ॥ हरिः प्रतिहरिं प्राप । भ्रू-
कुटीभीषणाननः ॥ ५७ ॥ यद्यदस्त्रं मुमोचायं । तत्तत्पद्मस्तदाच्छिदत् ॥ पद्मश्चिक्षेप यद्यच्च ।
हरिस्तत्तदखंडयत् ॥ ५८ ॥ युध्यमानावुभौ वीरौ । पश्यंत्यो व्योम्नि देवताः ॥ नैव तस्थुर्न
जग्मुश्च । भीतिकौतूहलाकुलाः ॥ ५९ ॥ चिरात्खंडितसर्वास्त्रः । पद्मो रोषारुणेक्षणः ॥ आत-
तान तमःस्तोमं । स्मृत्वा प्रस्वापनास्त्रकं ॥ ६० ॥ गजस्था गजकुंभेषू—पशीर्षेष्विव मस्तकं
दत्वा सुषुपुरस्वस्था । अश्वस्था अपि निद्रिताः ॥ ६१ ॥ ध्वजदंडानवष्टभ्य । रथिनो भित्ति-
तेक्षणाः ॥ खड्गान् धनूंषि चालंब्य । निद्रां चक्रुश्च पत्तयः ॥ ६२ ॥ एवं विसंस्थुलं सैन्यं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजं दृष्ट्वा हरिः क्षणात् ॥ सिद्धविद्याधरीः स्मृत्वा । सूर्यास्त्रं प्रकटं व्यधात् ॥ ६३ ॥ तस्मि-
न् स्फुरति तत्सैन्य–प्रमीला तमसा समं ॥ अनश्यत्तत्पुनश्चित्रं । पद्मः संकोचमाप यत् ॥६४॥
क्रूराकारं सफूत्कारं । पन्नगास्त्रमथामुचत् ॥ गरुडास्त्रेण सद्योऽपि । हरिः सर्पाननाशयत्
॥ ६५ ॥ करालप्रज्ज्वलज्ज्वाला–वह्निशस्त्रं ततोऽक्षिपत् ॥ हर्याविःकृतमेघेन । जातः शांतः
स पावकः ॥ ६६ ॥ इत्यादि दिव्यमस्त्रं य–त्पद्मश्चिक्षेप तंप्रति ॥ हेलयैवाच्छिनद् दूर—मतु-
च्छमहिमो हरिः ॥ ६७ ॥ इतश्च शक्तिघातार्त्त । देवदिन्नो विशल्यया ॥ सज्जं रामवपुश्चक्रे ।
दूरं नीत्वा रणांगणात् ॥ ६८ ॥ अथ पद्मो विलक्षात्मा । चिरं ध्यात्वा च चेतसि ॥ अवार्य-
मपरैरस्त्रै—रस्मार्षीच्चक्रमंशुमृत् ॥ ६९ ॥ चक्रं सहस्त्रयक्षाढ्यं । द्रागागात्पाणिपल्लवे ॥ स्मरे-
ष्टदेवतामेवं । जल्पन् पद्मो मुमोच तत् ॥ ७० ॥ कृतांतवक्त्रवत्क्रूरं । ज्वालामालाकरालितं ॥
पतद्विद्युदिवाप्रेक्ष्य—कल्पांतानलदारुणं ॥ ७१ ॥ सूरसेनरामसेन—देवदिन्नादिभिर्भटैः ॥
आहन्यमानमप्युग्रै–रस्त्रैरस्खलितागमं ॥ ७२ ॥ खेचरैरपि वै मुक्त—मार्गं भयभरातुरैः ॥
घटितं द्वादशादित्यै–रिवात्यंतं सुदुरासुरं ॥ ७३ ॥ चक्रं प्रदक्षिणीकृत्य । हरिषेणमुरस्तले ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ईषद्धि तारुयामास । स च किंचन मूर्छितः ॥ ७४ ॥ चतुर्भिः कलापकं ॥ क्षणाद्धावृत्तचैत-
न्य-हरिषेणनरेशितुः ॥ तच्चक्रवाकवच्चक्रं । पाणिपंकजमाश्रयत् ॥ ७५ ॥ निःपत्रपद्मवत्पद्मं ।
निरस्त्रं विगतश्रियं ॥ विलोक्य जातकारुण्यो । हरिषेणनृपोऽवदत् ॥ ७६ ॥ परस्त्रीपरराज्या-
दि । वांछंस्त्वमपराध्यपि ॥ अधुना मुच्यसे याहि । भुंक्ष्व भोगान् यथोचितान् ॥ ७७ ॥
वोहखंरूमिदं प्राप्य । किं रे गर्वं विधास्यसि ॥ मुष्टिघातेन हन्मि त्वां । सचक्रं पद्म इत्यव-
क् ॥ ७८ ॥ हरिषेणो हसन्नाह । तव शिक्षा प्रदीयते ॥ सज्जीभव नराधीश । भोक्तुम-
न्यायजं फलं ॥ ७९ ॥ इत्युक्त्वा सोऽमुचच्चक्रं । ज्वालामालाकरालितं ॥ पद्मं प्रदक्षिणीकृ-
त्य । जघान नाललीलया ॥ ८० ॥ पपात पृथिवीपीठे । पद्मपार्थिवमस्तकं ॥ हरेरुपरि मुक्ता
च । पुष्पवृष्टिः सुरोत्तमैः ॥८१॥ चक्रुर्जयजयारावं । प्रहृष्टा हरिसैनिकाः ॥ जयताद्वासुदेवो-
ऽय-मित्याकाशे गिरोऽभवन् ॥८२॥ एत्याज्ञां मे प्रपद्यध्वं । रे रे तिष्ठत तिष्ठत ॥ अन्यथैकैक-
शः कृत्वा । हनिष्याम्यखिलानपि ॥८३॥ इत्युक्त्वा वासुदेवेन । नश्यंतो हतनायकाः ॥ षो-
डशसहस्रभूपाः । प्रणेमुस्तत्पदांबुजं ॥८४॥ सहायीकृत्य तानेव । हरिषेणनरेश्वरः ॥ षड्भिर्मासैः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परिभ्रम्य । भरतार्धमसाधयत् ॥ ७५ ॥ तातेन सूरसेनेन । स्वपुरे रत्नमंदिरे ॥ अर्धचक्री समानीतः । कृत्वा प्रावेशिकोत्सवं ॥ ७६ ॥ सर्वविद्याधराधीश–धराधीशसमन्वितः ॥ वासुदेवपदं सोऽदा–दभिषेकविवेकवित् ॥ ७७ ॥ षोडशसहस्रभूपाः । सहान्यैः समुपायनैः ॥ भद्रे भद्रे शुभे कन्ये । प्रमोदाद्धरये ददुः ॥ ७८ ॥ समाप्ते विधिना राज्या–भिषेकाख्यमहोत्सवे ॥ भूपान् सन्मान्य सन्मान्य । विससर्जाखिलानपि ॥ ७९ ॥ जयद्रथानुजो देव–रथः पद्मनृपात्मजः ॥ योऽस्ति तस्मै ददौ राज्यं । श्रीश्रीदपुरस्य सः ॥ ८० ॥ दृष्ट्वा स्वपुत्रसाम्राज्यं । सूरसेननरेश्वरः ॥ मन्यमानः कृतकृत्य–मात्मानं निर्वृतोऽभवत् ॥ ८१ ॥ प्राप्य सद्गुरुसंयोगं । प्रव्रज्याराज्यमाददे ॥ को वा स्वावसरं सर्वं । न जानाति विशुद्धधीः ॥८२॥ समुद्रदत्तया पट्ट––राज्ञ्या सममनेकशः ॥ भुंजानो भोगभंगीः स । हरिरस्थाद्यथासुखं ॥ ॥ ८३ ॥ अन्यदा सा महादेवी । स्वप्ने स्ववदने विशत् ॥ अद्राक्षीत्क्षीरपाथोधि–युगं कल्लोलसंकुलं ॥ ८४ ॥ प्रबुद्धा सा पुरः पत्युः । स्वप्नमेतन्न्यवेदयत् ॥ सोऽप्याख्यत्तत्फलं पुत्र–युगलं ते भविष्यति ॥ ८५ ॥ इति वाक्यात्प्रहृष्टाया–स्तस्याः कुक्षिसरोवरे ॥ पुष्पसिंहरत्न-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सिंह–जीवौ हंसवदीयतुः ॥ ९६ ॥ अथो समुद्रदत्ता सा । प्रासूत सुतयामलं ॥ पुत्रजन्मो-
त्सवं हर्षा—द्वासुदेवो व्यचीकरत् ॥ ९७ ॥ दत्ते स्वप्नानुसारेण । पुत्रयोरभिधे इति ॥ आद्यः
सागरदेवोऽभू—दन्यः सागरदत्तकः ॥ ९८ ॥ लालितौ पंचधात्रीभि–र्वृद्धिमासादितौ क्रमा-
त् ॥ विदधानौ कलाभ्यासं । जग्मतुर्यौवनं वयः ॥ ९९ ॥ अन्यदा रामसेनेन । पुत्राभ्यां च
समं सभां ॥ अलंकृत्य स्थितोऽद्राक्षी–ज्ज्योतिः स हरिरंबरे ॥ ६०० ॥ किमेतदिति लोकेन
। चिंत्यते यावदंतरा ॥ तावद्विमानमायासी–देकं तत्र सभांतरे ॥ १ ॥ ततो एको विनि-
र्गत्य । विद्याधरवरो हरिं ॥ ननाम तदनुज्ञात—स्तत्पुरस्तादुपाविशत् ॥ २ ॥ ऊचे चतुरम-
त्याख्यो । देवदिन्नेन देव ते ॥ अंतेऽस्मि प्रेषितो मंत्री । विज्ञप्तं चेति वर्तते ॥ ३ ॥ अस्ति
भानुमती कन्या । मनोज्ञांगी ममोत्तमा ॥ जयंतीमपि रूपेण । जयंती मृगलोचना ॥ ४ ॥
अनेकागतगंधर्व–मुखात् श्रुतगुणोत्करं ॥ पुत्रं सागरदत्तं ते । वरत्वेनावृणोद् हृदि ॥ ५ ॥
विद्याधरकुमारेभ्यो । दीयमानापि सा न हि ॥ अमन्यतैकमेवैनं । ध्यायत्यर्कमिवाब्जिनी ॥६॥
विज्ञाय तदभिप्रायं । मयायं प्रहितः प्रभो ॥ त्वदंते वर्तते मंत्री । पुत्रीवांछितपूर्तये ॥ ७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुत्रः सागरदत्ताख्यः । प्रेष्योऽनेन सहाधुना ॥ यथास्य स्वसुतायाश्च । विवाहं रचयाम्यहं ॥ ८ ॥ हरिषेण इति श्रुत्वा । हर्षेणाख्यत्सखे मम ॥ देवदिन्नो महामान्यो । विद्यादानाङ्गणांगणे ॥ ए ॥ यत्तस्यानुमतं कार्यं । तत्राज्ञिमतमेव हि ॥ अथवैवंविधे साधु–विधेये निरुपद्धिकः ॥ १० ॥ इत्युक्त्वा पुत्रमाकार्य । पुरस्तादित्यशिक्षयत् ॥ वत्स गच्छ त्वया कार्यं । देवदिन्नसमीहितं ॥ ११ ॥ यदादिशति तातस्त––त्प्रमाणमिति जल्पता ॥ श्रितं सागरदत्तेन । विमानं सह मंत्रिणा ॥ १२ ॥ उत्पत्य प्रचलत्याशु । विमाने संस्थितो व्रजन् ॥ विचित्रनगरग्रामा–रामादीनि स ऐक्षत ॥ १३ ॥ स्वर्णप्राकारसंबद्ध–कपिशीर्षविभूषितं ॥ सर्वस्वर्णमयावासं । स्वर्णबद्धमहीतलं ॥ १४ ॥ अनेकरत्नरोचिष्णु–रोचिःपिंगीकृतांबरं ॥ एकं नगरमद्राक्षी–दधस्तात्स मनोहरं ॥ १५ ॥ युग्मं ॥ विस्मितो मंत्रिणं प्राह । किमेतन्नगरं वरं ॥ सोऽप्याख्यन्मया पूर्वं । श्रुतं नैतद्विलोकितं ॥ १६ ॥ कुमारः प्राह तन्मंत्रि–न्न किमत्रावतीर्यते ॥ दृश्यते कौतुकततिः । स्वरूपं चास्य पृच्छ्यते ॥ १७ ॥ सोऽथ मुक्त्वा विमानं त–त्पुरोपांतवनांतरे ॥ आगात्समं कुमारेणा–कस्माद्भूपसभांतरं ॥१८॥ देवाविव समायांतौ । तत्र तौ वी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्य भूपतिः ॥ प्रियध्वजाभिधो मान्यं । बहुमानमदान्मुदा ॥ १९ ॥ कौ युवां कुत आयाता-
विति पृष्टे नरेंदुना ॥ आख्यच्चतुरमत्याख्यो । मंत्री वृत्तं पुरोदितं ॥ २० ॥ वासुदेवसुतं ज्ञा-
त्वा । मान्यं निखिलभूभुजां ॥ हृष्टः पृष्टः कुमारेण । किमेतच्चित्रकृत्पुरं ॥ २१ ॥ केन चैतत्-
कृतमिति । तत्स्वरूपप्ररूपणे ॥ सुमत्यमात्य आदिष्टो । राज्ञा सोऽप्येवमूचिवान् ॥ २२ ॥

इहैव धातकीखंडे । भरते भोगवद्वृता ॥ अस्ति भोगवतीनाम्नी । पुरी सुरपुरीसमा ॥
॥ २३ ॥ तत्संनिधौ महाग्रामः । शालिग्राम इति श्रुतः ॥ ग्रामेशः सिंहपालोऽत्र । सारसा-
रोऽस्ति सिंहवत् ॥ २४ ॥ रूपेण निर्जितानंग-वल्लभा वल्लभाजनवत् ॥ पूर्णचंद्रमुखी तस्य ।
सुंदरी प्रियसुंदरी ॥ २५ ॥ तस्याभूदंगजो राज-पालो दानविशोभितः ॥ एको दोषोऽभवत्त-
स्य । दुरोदररसाभिधः ॥ २६ ॥ अथान्यदा पिता तस्य । काले पंचत्वमासवान् ॥ ततोऽनेन
निजं निन्ये । सर्वतो निधनं धनं ॥ २७ ॥ अवादीज्जननी वत्स । लक्ष्मीस्त्यजति दूरतः ॥
द्यूतासक्तं नरं भृंगो । निर्गंधं कुसुमं यथा ॥ २८ ॥ सपंकं हंसवत्स्थान-मन्यासक्तां प्रियां
पतिः ॥ स्थानभ्रष्टं यथा भूमि-पालकं सेवकोत्करः ॥ २९ ॥ युग्मं ॥ गृहकार्यभरं तस्मा-दु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वदंगज संप्रति ॥ दुरोदररसं दूरी–कृत्य द्रव्यमुपार्जय ॥ ३० ॥ ततः स प्राह हे मातर्द्यू-
तोद्योगो धनाय मे ॥ तयावादि कथं ध्वांतं । कुरुते दिवसोदयं ॥ ३१ ॥ एवमुक्तोऽपि मा-
त्रायं । व्यरमन्न दुरोदरात् ॥ व्यसनं नोपदेशेन । प्रायो मुंचति मानवः ॥ ३२ ॥ एकदासौ
समादिष्टो । मात्रा लात्वा कुठारकं ॥ ययौ वनांतरं लातुं । दारूणींधनहेतवे ॥ ३३ ॥ स वि-
लोक्य महावृक्षं । यक्षेणाधिष्ठितं ततः ॥ तच्छेदं कर्तुमारेभे । काष्टं लातुमना घनं ॥ ३४ ॥ प्र-
त्यक्षीभूय यक्षः सो—ऽवदत्साहसिकोत्तम ॥ आस्थानं मम मा भांक्षी—र्वरं यच्छामि ते वरं
॥ ३५ ॥ जगाद स महायक्ष । यदैतं प्रार्थये वरं ॥ तदा यच्छेरथो यक्ष । ॐमित्युक्त्वा ति-
रोदधे ॥ ३६ ॥ कुमारः स ततोऽन्यस्मा—दगात्काष्टान्युपाददे ॥ मात्रे चामूनि दत्वासौ । भू-
यो द्यूतालयं ययौ ॥ ३७ ॥ एकदा निजवासांसि । हारयामास तत्र सः ॥ आजगाम गतक्षौ-
मो । मंदिरं हसितो जनैः ॥ ३८ ॥ पर्यावृतप्रियावस्त्र—खंडः तदनु वीक्ष्य तं ॥ लोकः प्रि-
यध्वजं नाम्ना । कथयामास हासतः ॥ ३९ ॥ स्पर्धयेव श्रिया पूर्व—नाम्नाप्येष ॥ विवर्जितः अ-
थ ग्रामाद्विनिर्गत्य । भेजे भोगवतीं पुरीं ॥४०॥ तत्रापि चेज्जयेद्द्युतं । न चेन्निरशनोऽनिशं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिष्ठति व्यसनासक्त । एवं कतिपयवासरान् ॥ ४१ ॥ अन्यदा हारिते द्रव्ये । प्रचुरे द्यूतका-
रिभिः ॥ उद्वेजितः स निर्गत्य । पुरात्प्राप वनांतरं ॥ ४२ ॥ हंसश्रेणीमहामुक्ता—वृतं वृत्त-
तयान्वितं ॥ पृथिवीनायिकाकर्ण—भूषणायेव कुंमलं ॥ ४३ ॥ शेषराजेन पाताल—ज्ञानोपकृ-
तिहेतवे ॥ पीयूषकुंरुमानीत—मिवाभोगविभूषितं ॥ ४४ ॥ चंचलोत्फुल्लकल्लोल—हस्तैस्ता-
पोपशांतये ॥ आकारयदिव श्रांतान् । स सरः सारमैक्षत ॥ ४५ ॥ त्रिभिर्विशेषकं ॥ सरसेतु-
गते तुंग—प्रासादे दुःस्थितः स्थितः ॥ गच्छतं व्यवहाराय । सार्थवाहं ददर्श सः ॥ ४६ ॥ प-
तंतीं वृषभस्कंधा—द्गोणीं तत्र सरोवरे ॥ तदा प्रियध्वजोऽद्राक्षी—ज्जानातिस्म तु नापरः ॥४७॥
वृषभो वृषचक्रेण । जवेनाथ मिमेल सः ॥ सभया स्त्री वरेणेव । जनन्या बालको यथा ॥
॥ ४८ ॥ वीक्ष्याभारमनरूवाहं । सार्थवाहः स्वसेवकान् ॥ गोणीविलोकनायाशु । प्रादिशत्सर्व-
तो भृशं ॥ ४९ ॥ भ्रेमुस्ते सकलामाशां । स्थानभ्रष्टाः खगा इव ॥ मठोपविष्टमैक्षिष्ट । सा-
र्थेशोऽथ प्रियध्वजं ॥ ५० ॥ ऊचे सत्त्वनिधे साधो । गोणी क्व पतिता मम ॥ इति जानासि
किं वा नो । यदि वेत्सि तदा वद ॥ ५१ ॥ जलान्निष्कास्य तां गोणीं । विभज्य प्रचुरं धनं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ दास्यामि द्यूतकारेभ्यो । नविष्यामि सुखी ततः ॥ ५२ ॥ अथवा धिगिमां बुद्धिं । परद्र-
व्याभिलाषिणीं ॥ यादृशी मम पीमास्ति । निर्द्रव्यस्यास्य सा न किं ॥ ५३ ॥ चिंतयन्निति
स प्राह । सत्यमेव प्रियध्वजः ॥ परोपकारं मन्यंते । संतो जीवान्महत्तमं ॥ ५४ ॥ त्रिभि-
र्विशेषकं ॥ जनैस्तदुदितस्थाना—त्तां गोणीं निरकासयत् ॥ तया प्रमुमुदे श्रेष्टी । सार्थसर्व-
स्वयुक्तया ॥ ५५ ॥ गोण्यर्धं दिशति द्रव्यं । सार्थनाथे लखौ न सः ॥ संतः प्रत्युपकारार्थ-
मुपकारकराः किमु ॥ ५६ ॥ किमप्यनाददानस्य । तस्य निर्लोनतागुणात् ॥ रंजितः सार्थवाहः
स । आचचक्षे कृतांजलिः ॥ ५७ ॥ सशोन लोननिर्मुक्त । नाग्यसौनाग्यनाजन ॥ अन्यथा-
पि प्रसादं मे । कुरु निर्वृतिहेतवे ॥ ५८ ॥ इदं रत्नमयं दीप्रं । दीपवद्दैवताहूय ॥ फलकं च
हिरण्यस्य । गृहाणानुगृहाण मां ॥ ५९ ॥ अथ तस्यानुरोधस्य । ज्ञाता निगमनं तदा ॥ ए-
तद्द्वयं पुरो मुक्तं । गृह्णातिस्म प्रियध्वजः ॥ ६० ॥ एतद् द्यूतालयं प्राप्तो । हारयिष्यामि चे-
त्तदा ॥ जायेत निःफलं काको—ड्डायनायेव सन्मणीं ॥ ६१ ॥ रत्नमेतन्नृरत्नाय । योग्यमेवं
विचिंत्य सः ॥ ऊचे क्व प्रस्थितोऽसि त्वं । को राजा तत्र किं गुणः ॥ ६२ ॥ गुणश्रेष्टोऽवदत्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रेष्ठी । श्रीमद्दक्षिणमंडले ॥ कुंडलाजमिलानारी—मंडनं कुंडिनं पुरं ॥ ६३ ॥ तत्रास्ति मा-
निनीमान्यः । सुरूपो विषमायुधः ॥ मकरध्वजवत्साक्षा—न्मकरध्वजभूपतिः ॥ ६४ ॥ अ-
रयः सरयं सारे । यन्नामोच्चरणे रणे ॥ दंडके पतिते काका । इव जग्मुर्दिशो दश ॥ ६५ ॥
प्रियध्वजोऽवदत्तर्हि । गृहाणैतत्त्वमेव हि ॥ मकरध्वजराजाय । देयं मदभिलापतः ॥ ६६ ॥
दास्यामीति प्रपद्यास्य । वाक्यं लात्वा च तद् द्वयं ॥ स्वसिद्धये चचालाथ । स प्रणम्य प्रि-
यध्वजं ॥ ६७ ॥ क्रमेण कुशली श्रेष्ठी । कुंडिनं नगरं गतः ॥ आत्मोपढौकनं चक्रे । राज्ञो
रत्नादिसंचयं ॥ ६८ ॥ प्रियध्वजाभिधानेन । तद्द्वयं ढौकितं पुरः ॥ विलोक्य विस्मयापन्नो ।
नृप एवं व्यभावयत् ॥ ६९ ॥ स्वार्थसिद्ध्यमत्यर्थ—मर्थं यच्छंति सर्वदा ॥ न च दातापरः को-
ऽपि । तादृग्दृक्पथमागतः ॥ ७० ॥ उदारचरितो नूनं । स कोऽप्यस्ति प्रियध्वजः ॥ गुणराजी
रजोमुक्तो । विश्वप्रासादसुध्वजः ॥ ७१ ॥ ध्यात्वेति नृप आचष्ट । श्रेष्ठिनं सार्थनायक ॥ इ-
तः क्व यास्यति भवान् । सोऽवग्भोगवतीं पुरीं ॥ ७२ ॥ मिलित्वा तर्हि गंतव्यं । त्वत्करे प्रेष-
यिष्यते ॥ तस्मै किंचित्प्रतिदानं । स्वं साध्यं साधयाधुना ॥ ७३ ॥ इत्युक्तः क्षोणिपालेन ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सार्थेशः क्रयविक्रयं ॥ कुर्वाणः प्रचुरं वित्तं । दिनैरल्पैः समार्जयत् ॥ ७४ ॥ अथास्य चलतः सार्थे सार्थेऽस्य । प्राहिणोन्नृपः ॥ प्रियध्वजार्थमुन्मत्त–गजपंचशतीं सितां ॥ ७५ ॥ तामादाय समायासीत् । श्रेष्ठी भोगवतीं पुरीं ॥ प्रियध्वजं मिलित्वा स । प्रोचे प्रांजलमानसः ॥ ७६ ॥ रे धीर भूभुजे रत्नं । फलकं च तदर्पितं ॥ हृष्टः प्राहिणोत्तुभ्यं । गजपंचशतीमिमां ॥ ७७ ॥ तदागत्य गृहाणैता—मित्युक्ते स व्यचिंतयत् ॥ अहो कश्चिदुदारात्मा । स राजा मकरध्वजः ॥ ७७ ॥ पूर्वमल्पे प्रदत्तेऽपि । महांतोऽनल्पदायिनः ॥ कीरं क्षरंति गावो हि । तृणदानेन तोषिताः ॥ ७ए ॥ राज्यचिह्नमिदं हस्ति–वृंदं तावदुपागतं ॥ एषां शुद्धिं करिष्यामि । कथं बाहुसहायकः ॥ ७० ॥ अस्ति कश्चिदुपायो यो । भृत्यांश्च नगरादिकं ॥ संपादयति मे राज्यं । ततः कुर्वे यथासुखं ॥ ७१ ॥ एवं चिंतां चिरं कृत्वा । स्मृतोपायोऽयमूचिवान् ॥ श्रेष्ठिंस्ता-वज्जा रक्ष्या । गत्वा यावदिहैम्यहं ॥ ७२ ॥ श्रेष्ठिना प्रतिपन्नार्थां । वाचि तस्यां चचाल सः ॥ स्कंधे कृत्वा तीक्ष्णधारं । कुठारं सारसाहसः ॥ ७३ ॥ गत्वा तस्यैव वृक्षस्य । संनिधौ धै-र्यवान् जगौ ॥ तं वरं यच्छ यक्षेश । प्रपन्नो यस्त्वया पुरा ॥ ७४ ॥ अन्यथा प्रतिभूरेष । कु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गारो भवदास्पदं ॥ वृक्षं छेत्स्यति यक्षोऽथ । प्रत्यक्षः सन्नदोऽवदत् ॥ ७५ ॥ वरं वृणीष्व धीरात्मं–स्ततोऽवादीत्प्रियध्वजः ॥ रचयैकं पुरं स्वर्ण–मयं रत्नविभूषितं ॥ ७६ ॥ अनेकद्रविणश्रेणीः । क्षिप्त्वा तत्र पुरांतरे ॥ अनृणीभूय भूयोऽत्र । यथेष्टं तिष्ट पादपे ॥ ७७ ॥ यक्षोऽपि तादृशं तत्र । तत्क्षणं सकलं व्यधात् ॥ मुधा भवंति नो वांछा । महत्योऽपि महात्मनां ॥७८॥ प्रियध्वजोऽप्युपादाय । द्रव्यं किंचित्पुरात्ततः ॥ प्राप्तो भोगवतीपुर्यां । वर्यवेषविभूषितः ॥७९॥ तत्र द्रव्यबलेनैष । चक्रे नव्यान् घनान् जनान् ॥ स्वजनांश्च शालिग्रामा–दाकारयदसौ सुधीः ॥८०॥ हस्तिनस्तानुपादाय । सह स स्वजनैर्जनैः ॥ पुरे यक्षकृते प्राप । विमाने इव देवराट् ॥८१॥ सोऽदाद्विभज्य सर्वेभ्य । आवासान् द्रविणं च तत् ॥ सर्वैर्महामहःपूर्वं । राज्येऽस्थापि प्रियध्वजः ॥ ८२ ॥ पुरं यक्षपुरं ह्येत–त्सोऽयं राजा प्रियध्वजः ॥ स्वजनाश्च जनाश्चैते । त एते मत्तसिंधुराः ॥ ८३ ॥ इति प्रियध्वजामात्य–वाक्यमाकर्ण्य विस्मितः ॥ कुमारः प्राह राज्ञोऽस्य । नूनं पुण्योदयो महान् ॥ ८४ ॥ वृक्षोदयो विना बीजं । न स्यान्नार्कं विना दिनं ॥ प्रकाशो न विना तेजः । सुखं नो सुकृतं विना ॥ ८५ ॥ राजा प्राह कुमारेंद्र । सत्यमेतत्परं

आ० के० श्री० कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यदि ॥ केवली कश्चिदायाति । पृच्छामि स्वजवं तदा ॥ ए६ ॥ इति कुर्वाणयोर्वार्ता । तयोः श्रीधर्मसागरः ॥ नजसोऽवातरत्तत्र । चारणर्षिश्च केवली ॥ ए७ ॥ राज्ञोत्थाय ऊटित्येष । स्थापितः स्वासने मुनिः ॥ वंदितो बहुजक्त्या च । योजितांजलिना स्तुतः ॥ ए८ ॥ अवृक्षा कुसुमोत्पत्ति–रनभ्रं मेघवर्षणं ॥ अचंद्रश्चंद्रिकोल्लासो–ऽकस्माद्यस्त्वं निरीक्षितः ॥ एए ॥ अद्यैतदजयत्स्वर्णा–चलं स्वर्णमयं पुरं ॥ कल्पद्रुमाधिका यत्र । श्रीमत्पादा उपाययुः ॥ १०० ॥ स्तुत्यंते मुनिना चक्रे । देशना जवनाशनी ॥ तदंते भूभुजोत्थाय । पृष्टं स्पष्टतराक्षरं ॥ १ ॥ संदेहध्वांतविध्वंस—दिवाकर मुनीश्वर ॥ प्रसद्य वद किं नाम । मया पूर्वजवे कृतं ॥ २ ॥ पूर्वं पापमहं जातो । येन दुःखजरातुरः ॥ किं कृतं सुकृतं पश्चा–द्येनैवं सुखमाप्तवान् ॥ ३ ॥ ॥ युग्मं ॥ ततः केवलिनावादि । राजन् पूर्वजवे जवान् ॥ जिनदत्त इति श्रेष्ठी । गोष्टिकोऽभूज्जिनालये ॥ ४ ॥ जिनेंद्रद्रविणं तेन । निःशूकत्वेन जक्षितं ॥ मृतेन तेन पापेन । प्रापे नरकगह्वरं ॥ ५ ॥ चिरं भ्रांत्वा जवांजोधौ । निःस्वस्यैकस्य मंदिरे ॥ जातः पुत्रो जनेः काले । माता ययौ यमालयं ॥ ६ ॥ क्रमान्मृतः पिता तस्य । भ्रमन्नपि निराश्रयः । कष्टेन लजते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भिक्षां । स निजोदरपूर्तये ॥ ७ ॥ सखर्परकरो बाल्या–दपि भिक्षोपजीविकः ॥ अनेकान् भोगिनो लोका–नालोक्यैवं व्यचिंतयत् ॥ ८ ॥ एते लभंते सन्मान–मिष्टं शिष्टं च भोजनं ॥ गलहस्तं पुनरहं–महो कर्मविचित्रता ॥ ९ ॥ एकदा तस्य भाग्येन । मिलितो ज्ञानसागरः ॥ केवली तं प्रणम्याय–मपृच्छद् दुःखकारणं ॥ १० ॥ मुनिना कथितास्तस्या–दितः पूर्वभवाः समे ॥ उक्तं च ते जिनद्रव्य–भक्षणाद् दुःखमीदृशं ॥ ११ ॥ इति वाक्यं मुनेः श्रुत्वा । जातजातिस्मृतिः क्षणात् ॥ आत्मकर्म निनिंदायं । पश्यन् पूर्वभवान् निजान् ॥ १२ ॥ ऊचे च भगवन् पापा–न्मुच्येऽहं कथमीदृशात् ॥ मुनिनोक्तं निजं द्रव्यं । व्ययीकुर्या जिनालये ॥ ॥ १३ ॥ ततस्तेन समुत्थाया–भिग्रहो जगृहे मया ॥ यदर्जयिष्यते द्रव्यं । तन्मोद्ये जिनमंदिरे ॥ १४ ॥ एकं विहाय कौपीनं । वारमेकं च भोजनं ॥ साहाय्यं च विधास्यामि । प्रासादेषु शरीरतः ॥ १५ ॥ इत्यभिग्रहपूर्वं स । सम्यक्त्वं समुपाददे ॥ श्रद्धावान् श्राद्धधर्मं च । मुनिं नत्वाव्रजत्ततः ॥ १६ ॥ अभिग्रहग्रहोत्पन्न–पुण्यात्किंचन किंचन ॥ अर्जयन् द्रव्यमात्मीय–मभिग्रहमपालयत् ॥ १७ ॥ स मृत्वा त्वमभू राजन् । जिनद्रव्यादनादितो ॥ पाप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शेषाद्भूर्दुःखी । सुखी च सुकृतात्ततः ॥ १७ ॥ इति पूर्वभवान् श्रुत्वा । केवलज्ञानिनो मुखात् ॥ जातजातिः भयान् साक्षा—द्राजाद्राक्षीत्प्रियध्वजः ॥ १९ ॥ अथो चतुरमत्याख्य—मंत्रिणापृछि केवली ॥ भगवन् देवदिन्नस्य । यास्ति भानुमती सुता ॥ २० ॥ तस्याः सागरदत्ताख्ये । कुमारेऽस्मिन् कुतो महान् ॥ अनुरागस्ततोऽवादी—त्केवलज्ञानभास्करः ॥ २१ ॥ गुणचंद्रोऽभवत् श्रेष्टी । गुणश्रीस्तस्य गेहिनी ॥ भ्राता गुणधरस्तस्य । तद्भार्या गुणमालिका ॥ ॥ २२ ॥ चत्वारोऽपि सुरा जाता । देवलोके ततश्च्युताः ॥ तेष्वेकः पुष्पसिंहोऽभू—द्रत्नसिंहो द्वितीयकः ॥ २३ ॥ भार्ये जाते तयोर्जीवौ । गुणश्रीगुणमालयोः ॥ आद्या कुसुममालाख्या । द्वितीया वनसुंदरी ॥ २४ ॥ मित्रत्वेनाभवन् सर्वे । पुनर्देवालये सुराः ॥ पुष्पसिंहरत्नसिंह—जीवौ काले ततश्च्युतौ ॥ २५ ॥ आद्यः सागरदेवोऽभू—दन्यः सागरदत्तकः ॥ जीवः कुसुममालायाः । कन्या चंद्रमतीत्यभूत् ॥ २६ ॥ जीवस्तु वनसुंदर्या । बाला सा भानुमत्यभूत् ॥ अतः पंचभवस्नेहा—त्कुमारे सानुरागिणी ॥ २७ ॥ इति सागरदत्तोऽपि । कुमारः स्वभवाभ्मुनेः ॥ आकर्ण्य जातिस्मरणा—त्प्रत्यक्षं तानलोकत ॥ २८ ॥ अथोत्थाय समस्तैस्तैः । प्रबु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ङ्गैः समुपाददे ॥ श्राद्धधर्मः शर्मदायी । सम्यक्सम्यक्त्वपूर्वकं ॥ २९ ॥ इति कृत्वा धर्मलाभं । धर्मलाभं प्रदाय च ॥ उत्पपात मुनिर्व्योम्नि । सतृष्णं पश्यतां नृणां ॥ ३० ॥ सागरदत्तकुमारोऽपि । प्रियध्वजनृपाग्रहात् ॥ तत्र स्थित्वा कियत्कालं । चचाल सह मंत्रिणा ॥ ३१ ॥ व्रजन् विमानमारुह्य । क्षणात् श्रीवल्लभं पुरं ॥ प्राप राजा देवदिन्नो । मुमुदे तस्य दर्शनात् ॥ ३२ ॥ दानसंतोषितास्तोक-लोकमुत्सवपूर्वकं ॥ साकं सागरदत्तेन । स्वपुत्रीं पर्यणाययत् ॥ ॥ ३३ ॥ दंडेनेव पताकाया । गंगाया इव वार्धिना ॥ सुपर्वशैलमूलायाः कल्पकल्पद्रुणेव च ॥३४॥ मुद्राया इव रत्नेन । विष्णुनेव च स श्रियः ॥ तानुमत्यास्तेन योगः । लोकैः कैः कैर्न वर्णितः ॥ ३५ ॥ युग्मं ॥ अथ राजा कुमाराग्रे । वक्तुमारब्धवानिति ॥ कुर्वतोऽत्र सुखं राज्यं । घनः कालो ममागमत् ॥ ३६ ॥ हरेः प्रसादान्निश्चिंत-चित्तोऽहं सदने स्थितः ॥ अश्रौषमन्यदा दाह-करीं पित्रोः परोक्षतां ॥ ३७ ॥ तदैवोत्पन्नवैराग्य-चेतसा चिंतितं मया ॥ धिक् संसारमसारं धिग् । मोहं धिग्ममतामिमां ॥ ३८ ॥ पुत्रं राज्ये निधायाशु । प्रव्रज्यामाददास्यहं ॥ जन्ममृत्युवियोगादि-दुःखांतो जायते यतः ॥ ३९ ॥ मय्येवं चिंतयत्ये-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व । सुतः पंचत्वमाप्तवान् ॥ कर्मणां प्रतिकूलत्वे । सर्वत्र क्षतिरेव हि ॥ ४० ॥ शाखाभिर्वितनिष्यति दलैस्तेजांसि तिग्मद्युते-रंतर्धास्यति पास्यतीह मधुपश्रेणी रसं कौसुमं ॥ अध्वन्यान् सुखिनीकरिष्यति फलैर्यस्येत्थमाशाभवत् । दूरादेव हहा स मार्गविटपी दग्धो दवार्चिष्मता ॥ ४१ ॥ मम विज्ञातसंसार-स्वरूपस्यासुखं तदा ॥ नाकरोत्पुत्रमरणं । दीक्षाविघ्नदुःखं यथा ॥ ४२ ॥ अथोर्ध्वदेहिकं तस्य । कृत्वान्यं राज्यधूर्धरं ॥ सुतं विना नवोद्विग्नो-ऽभवं चिंतातुराशयः ॥ ४३ ॥ अन्यदा केवलज्ञानी । मिलितो धर्मसागरः ॥ राज्यस्यास्ति हि को योग्य । इति पृष्टो जगाद सः ॥ ४४ ॥ पुत्रीभानुमतीभर्ता । हरिषेणनृपात्मजः ॥ नाम्ना सागरदत्तोऽस्य । योग्यो राज्यस्य वर्तते ॥ ४५ ॥ अथो कुमार साम्राज्य—मिदमादाय सांप्रतं ॥ कुर्याः प्रव्रज्याग्रहणे । साहाय्यं प्राज्यविक्रम ॥४६॥ नगतस्ताततुल्यस्या-देशो नो खंड्यते मया ॥ इत्युत्तरे कुमारेण । दत्ते स प्रीतिमाप्तवान् ॥ ४७ ॥ विद्याधरान् समाहूय ।समस्तान् देवदिन्नराट् ॥ तीर्थोदकानि चानाय्य । स्वासने विनिवेश्य तं ॥ ४८ ॥ अभिषेकं विनिर्माय । तिलकं च शिरस्तले ॥ देवदिन्नो ददौ राज्यं । विद्याश्च निखिला निजाः ॥ ४९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विज्ञायावसरं ज्ञानी । समागाद्धर्मसागरः ॥ स्वयं संसारनिर्विण्णो । देवदिन्नो व्रतं ललौ ॥५०॥
अल्पेन कालेन स रागरोष–विवर्जितो ध्वस्तसमस्तदोषः ॥ श्रीकेवलज्ञानमवाप्य धाम । निः-
श्रेयसं नाम मुनिर्जगाम ॥ ५१ ॥ राजा सागरदत्तोऽथ । सर्वविद्याधरार्चितः ॥ श्रीवल्लभपुरे
राज्यं । कुरुतेस्म यथासुखं ॥ ५२ ॥ इतः प्रियध्वजाख्यस्व । राज्ञश्चंद्रमती सुता ॥ मागधा-
त्सागरदेव–मश्रौषीद्गुणसागरं ॥ ५३ ॥ सानुरागाथ सा जज्ञे । तस्मिन् नानाविधाङ्गिनी ॥
तमभिप्रायमज्ञासी–दिंगितैर्जननी शनैः ॥ ५४ ॥ तया निवेदितः राज्ञः । स एवं पर्यभाव-
यत् ॥ जीवः कुसुममालायाः । कन्या चंद्रमती तथा ॥ ५५ ॥ पूर्वानुरागबद्धाया–स्तदस्या
विदधाम्यहं ॥ विवाहोत्सवमाकार्य । तं कुमारं मनोहरं ॥ ५६ ॥ ध्यात्वेति प्राहिणोद् नृत्या-
न् । हरिषेणनृपांतिके ॥ तैर्गत्वा प्रणतिं कृत्वा । योजितांजलयोऽभ्यधुः ॥ ५७ ॥ स्वामिन्
यद्पुरस्वामि–प्रियध्वजनरेशितुः ॥ अस्ति चंद्रमती पुत्री । पवित्रीकृतभूतला ॥ ५८ ॥ म-
हाराज कुमारं ते । सागरदेवसंज्ञकं ॥ श्रुत्वा सा सानुरागाभू–द्युज्यते हि समः समे ॥
॥ ५९ ॥ अथ प्रसद्य सद्यः स्वं । कुमारं प्रेष्य सांप्रतं ॥ नृपस्य नृपपुत्र्याश्च । पूरयस्व मनो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रथान् ॥ ६० ॥ श्रुत्वेति वासुदेवोऽवक् । कोऽयं राजा प्रियध्वजः ॥ नाद्य यावन्मया दृष्टो । नागाच्च श्रुतिगोचरं ॥ ६१ ॥ ततस्तैरुदितं सर्वं । तच्चरित्रं पुरोदितं ॥ निशम्य विस्मयं भेजे । हर्षं च हरिषेणराट् ॥६२॥ पुत्रं सागरदेवाख्य–माख्यदाकार्य कार्यवित् ॥ वत्स गच्छ समागच्छेः । परिणीयोत्सवेन तां ॥६३॥ इत्यादिष्टो नरेंद्रेण । कुमारः सारजाग्यजाक् ॥ चतुरंगचमूयुक्तो–ऽचालीयच्चपुरंप्रति ॥ ६४ ॥ क्रमेण स प्रयाणानि । कुर्वाणोऽतीत्य निवृतः ॥ प्राप्याकीर्णं महारण्यं । प्राप्य सैन्यमवासयत् ॥६५॥ अथैकस्य तरोस्तार–तरशाखावलंबितं ॥ स्वर्णपंजरमध्याक्षी–त्स काकाधिष्टितांतरं ॥६६॥ अहो किमेतदाश्चर्यं । कुमार इति चिंतयन् ॥ तस्याभ्यर्णे समेत्योचे । वायसं पंजरस्थितं ॥६७॥ किं कीरवत्किंचन पाठकस्त्वं । किं केकिवत्किंचन नृत्यकारी किं सुस्वरः कोकिलवच्च काक । हैमं कुतः पंजरमाश्रितोऽसि ॥६८॥ काक उवाच–काकेन साकं ॥ समशीर्षिका का । केक्यादिकानां बलिमद्मि योऽहं ॥ प्रदाय जागं निजबांधवेभ्यो । हैमं ततः पंजरमाश्रितोऽस्मि ॥ ६९ ॥ कस्त्वं केन कृतश्चैवं–विधरूपः प्ररूपय ॥ अस्मिन्निर्मानुषेऽरण्ये । क्षिप्तः किं केन पंजरे ॥ ७० ॥ काकः प्राह कुमारेंद्र । बुभुक्षाकुलितोदरः ॥ अहं वक्तुं न

शक्नोमि । तन्मे पूर्वं दिशाशनं ॥ ७१ ॥ कुमारस्तत्क्षणं भृत्यै-रानाय्य वरभोजनं ॥ अदापय-
द्यदा ताव-द्वायसः पुनरभ्यधात् ॥ ७२ ॥ कुमार त्वं स्वहस्तेन । यदि दास्यसि भोजनं ॥ त-
दा दास्येऽन्यथा नैव । दाक्षिण्यात्स तथाकरोत् ॥ ७३ ॥ कुमारे निजहस्तेन । तस्मै दिशति
भोजनं ॥ काको विद्याधरो जज्ञे । दिव्यरूपमनोहरः ॥ ७४ ॥ पंजरं तत्क्षणं चाभू-द्विमानं
विस्मयप्रदं ॥ कुमारश्चावदद्विद्या-धर विस्फारितेक्षणः ॥ ७५ ॥ विमानमीदृशं केन । किमर्थं
पंजरं कृतं ॥ काकाकारो भवांश्चेति । ततो विद्याधरोऽब्रवीत् ॥ ७६ ॥ कुमार शृणु वृत्तांतं ।
सावधानेन चेतसा ॥ वैताढ्यशैलालंकार-मस्ति श्रीवल्लभं पुरं ॥ ७७ ॥ तत्रेशो देवदिन्नोऽभू-
त्तत्पट्टे सांप्रतं नृपः ॥ भ्राता सागरदत्तस्ते । प्रतिपालयति प्रजाः ॥ ७८ ॥ तद्भृत्यस्तीव्रवे-
गोऽहं । विद्याधरनरेश्वरं ॥ सुखावस्थानसाम्राज्य-लाभज्ञापनहेतवे ॥ ७९ ॥ एतद्विमानमा-
रोप्य । स्वामिना प्रेषितोऽभवं ॥ हरिषेणनृपोपांते । स्वांते संतोषमावहन् ॥ ८० ॥ स्वामि-
मानसमुत्पन्ना-मानमानो विमानभाक् ॥ संचरन् गगने वेगा--त्समागामिह तत्क्षणं ॥८१॥
अत्र ध्यानवनांतःस्थ-मनासिंहो महामुनिः ॥ आसीद्भुवनभान्वाख्यो । देवसंसेवितक्रमः ॥

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

॥ ८२ ॥ अहमुल्लंघ्य तं साधुं । तच्छीर्षोपरि संचरन् ॥ यावद् व्रजामि तावन्मे । विमानमप-
तद्भुवि ॥ ८३ ॥ विलक्षः पतितो व्योम्नो । बिडाल इव सिक्ककात् ॥ यावत्पश्यामि तावत्त-
मद्राक्षं मुनिपुंगवं ॥ ८४ ॥ अरे पापिष्ट गर्विष्ट । मुन्यवज्ञाविधायक ॥ विद्याभ्रष्टो भवान्
भूया-त्काकाकारश्च सांप्रतं ॥ ८५ ॥ इदं च पंजराकारं । विमानं भवतादिति ॥ शशाप रोष-
तः साधु-परिचर्यापरः सुरः ॥ ८६ ॥ युग्मं ॥ तत्क्षणं तत्तथा जज्ञे । ततः काकाकृतीकृतः ॥
पंजरे निर्जरेणाहं । बलादादाय चिक्षिपे ॥ ८७ ॥ दीनास्यं विलपंतं मां । दृष्ट्वोत्पन्नकृपः सुरः
॥ शापस्यावधिमाचष्ट । विशिष्टमुनिसेवकः ॥ ८८ ॥ उत्तमः पुरुषः कोऽपि । निजहस्तेन भो-
जनं ॥ यदा ते दास्यति तदा । शापमोक्षो भविष्यति ॥ ८९ ॥ इत्युक्त्वास्मिन् महारण्ये ।
मदधिष्टितपंजरं ॥ निबध्य शाखिशाखायां । सुरः स्वस्थानकं ययौ ॥ ९० ॥ अस्मिन्निर्मानुषेऽ-
रण्ये । क एष्यति नरोत्तमः ॥ इति चिंतातुरः काल-मतिवाहितवानहं ॥ ९१ ॥ मत्पुण्यैरधु-
नाकृष्टः । कुमार त्वमिहागतः ॥ त्वया भोजनदानेन । स्वभावस्थो विनिर्मितः ॥ ९२ ॥ इति
वृत्तांतमाकर्ण्य । विद्याधरवरोदितं ॥ कुमारो विस्मयं प्राप-चिंतयच्चेति चेतसि ॥ ९३ ॥ अ-

P.P. Ac. Gunratnasuri M.S.                                                   Jun Gun Aaradhak Trust

हो स मुनिरन्यून–महिमो देवसेवितः ॥ अहो शक्तिधरः साधु–साधुभक्तिपरः सुरः ॥९४॥
अहो दुःखकरोदर्कः । पूज्यपूजाव्यतिक्रमः ॥ अहो अस्य शुभं कर्म । ममात्रागतिकारणं ॥९५॥
विभाव्येति कुमारेंद्र–स्तं विद्याधरमभ्यधात् ॥ तीव्रवेग तीव्रवेगाद्र । व्रज त्वं मा विलंबय
॥ ९६ ॥ बंधोः साम्राज्यसंप्राप्तिं । पितुरग्रे निवेदय ॥ इत्यादिष्टः कुमारेण । नत्वा तं सोऽच-
लत्ततः ॥ ९७ ॥ तस्मिन् विमानमारुह्य । पुरं श्रीरत्नमंदिरं ॥ प्रस्थिते स कुमारेंद्रो–ऽचाली-
च्चक्रपुरंप्रति ॥ ९८ ॥ प्रियध्वजनरेंद्रेण । प्रवेशोत्सवपूर्वकं ॥ नगरांतः समानीतो । विनीता-
त्मा कुमारराट् ॥ ९९ ॥ भवांतरस्वरूपं य–द्धर्मसागरसाधुना ॥ उक्तमासीत्समस्तं त–त्कु-
माराग्रे नृपो जगौ ॥ ८०० ॥ सोऽपि श्रुत्वा भवान् सौवान् । जातजातिस्मृतिः स्वयं ॥ अप-
श्यच्चंद्रमत्यां चा–बध्नात्स्नेहमकृत्रिमं ॥ १ ॥ नृपो लग्ने शुभे लग्ने । कुमारेण सुतां निजां ॥
अयोजयत्स्वर्णकारो । रत्नेनेव सुमुद्रिकां ॥ २ ॥ स भोगभंगी सुभगः । स्थित्वा तत्र कियच्चिरं ॥ अमानमानदानेन । सततं पोषितांतरः ॥ ३ ॥ कथंचिच्च शुभक्ष्मापा–द्विमोच्यात्मान-
माग्रहात् ॥ कुमारः प्रियया युक्तः । प्रचल्य स्वपुरं ययौ ॥ ४ ॥ युग्मं ॥ तत्र चंद्रमतीं दृष्ट्वा ।

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

चंद्रिकामिव मोदिनीं ॥ समुद्रदत्ता सोल्लासा । वेलावृद्धेरिवार्णवत् ॥ ५ ॥ लक्ष्मीपुरस्य सा-
म्राज्यं । हरिषेणनृपोऽन्यदा ॥ दत्वा सागरदेवाय । प्राव्राजीत्तत्र पत्तने ॥ ६ ॥ तत्र सागर-
देवोऽथ । सुखं राज्यं चिरं व्यधात् ॥ तथा सागरदत्तोऽपि । श्रीवर्द्धनपुरे स्थितः ॥ ७ ॥ तयो-
योर्भुंजतोर्भोगान् । भूयानपि निमेषवत् ॥ कालो जगाम परम-सौख्यसंततिनोजिनोः ॥ ८ ॥
भ्रातुः सागरदेवस्य । मिलनायान्यदोत्सुकः ॥ आगात्सागरदत्तः स । क्षणाद्विद्याधरेश्वरः ॥
॥ ए ॥ तौ भिन्नौ देहमात्रेण । प्रीतिमंतौ परस्परं ॥ अतिष्ठतां सलक्ष्मीके । लक्ष्मीपुरपुरे चिरं
॥ १० ॥ इतश्च नृपतिर्यक्ष-पुरे राज्यं प्रियध्वजः ॥ चिरं प्रपाल्य प्राव्राजी—द्धर्मसागरसंनि-
धौ ॥ ११ ॥ उत्पन्नकेवलज्ञानो । भविकान् भुवि बोधयन् ॥ लक्ष्मीपुरवनस्यांतः । स मुनिः
समवासरत् ॥ १२ ॥ विज्ञप्तौ वनपालेना—वनीपालौ समेत्य तौ ॥ अवंदेतां महाभक्त्या ।
मुनिश्चक्रे च देशनां ॥ १३ ॥ भो भव्या भवरूपकूपपतिता मोहांधकारावृता । निश्चिंता वि-
षयादिसौख्यसलिलास्वादेन जाताः कुतः ॥ एवं पश्यथ किं न मृत्युभुजगं व्यात्ताननं पार्श्व-
गं । तस्माद्रुद्धरणक्षमं जिनमतं रज्जुं श्रयंतु द्रुतं ॥ १४ ॥ इत्यादिदेशनाप्रांते । समुत्थाय

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

नरेश्वरौ ॥ हरिषेणनृपस्यायु—र्निजं चायुरपृच्छतां ॥ १५ ॥ ततो मुनिवरः प्राह । हरिषेणनृपश्चिरं ॥ नुक्त्वेमां पृथिवीं प्राप । पृथिवीं नरकांतिमां ॥ १६ ॥ दिनत्रयमानमायु—र्युवयोरवशिष्यते ॥ कालो हि सकलग्रासी । निश्चितं किमिदं जगत् ॥ १७ ॥ इत्याकर्ण्य शोकन्नीति—व्याकुलौ तौ बनूवतुः ॥ तातमृत्योरनृच्छोको । स्वमृत्योश्च नयं महत् ॥ १८ ॥ वेपमानशरीरौ तौ । सागरदेवदत्तकौ ॥ ऊचतुर्नगवन् नावी । निस्तारः कथमावयोः ॥ १९ ॥ पुनर्मुनिवरः प्राह । साध्यते साध्यमुत्तमौ ॥ क्षणमात्रेण युवयो—रायुश्चास्ति दिनत्रयं ॥२०॥ तत्सत्वरं व्रतं जैनं । गृह्णीतं निर्वृतिप्रदं ॥ नयशोकौ न कर्तव्यौ । ताभ्यां किं नाम सिद्ध्यति ॥ २१ ॥ इति श्रुत्वा समुत्थाय । पुरं गत्वा निजं निजं ॥ समारोपयतां राज्ये । स्वं स्वं नंदनमादिमं ॥ २२ ॥ विधाय बंदिनां मोक्ष—मुद्योत्य जिनशासनं ॥ एत्य भूत्या महत्या तौ । मुनेराददतुर्व्रतं ॥ २३ ॥ तत्क्षणं गुरुपादांते । गृहीत्वानशनं मुनी ॥ महारण्ये गतौ कायोत्सर्गं विदधतुश्च तौ ॥ २४ ॥ तयोः शुक्लध्यानानलकलमनोवृत्तिविलस—त्तकव्या नैकव्यान्नयमकरोद्गीतनिकरः ॥ न तापः संतापं शमरसरसाप्लावितवपुषो—र्न वर्षोत्कर्षो वा वरतरवि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेकाश्रयवतोः ॥ २५ ॥ ध्यानैकतानचित्तत्वा—त्किंचिद् दुःखमजानतोः ॥ तयोर्दिनत्रयप्रांते
—ऽकस्मान्मूर्ध्न्यपतत्तमित् ॥ २६ ॥ यथा यथादहद्देहं । विद्युद्वह्निस्तयोर्बहिः ॥ ध्यानाग्निः
कर्मकाष्टानि । दहंति च तथांतरा ॥ २७ ॥ क्षणान्निर्दग्धसर्वांगौ । मृत्वा ताविंद्रसन्निभौ ॥
महाशुक्रदेवलोके । देवौ जातौ महर्द्धिकौ ॥ २८ ॥ पतिभ्यां सममेवात्त—प्रव्रज्ये ते प्रिये भन्ने
॥ चंद्रमतीभानुमत्यौ । मृत्वा पूर्णायुषौ सुखं ॥ २९ ॥ तयोर्वयस्यभावेन । महाशुक्रे सुराल-
ये ॥ तस्मिन्नेव विमाने ते । देवौ जातौ महर्द्धिकौ ॥ ३० ॥ युग्मं ॥ इतश्च रामसेनाग्रे । ह-
रिषेणनरेश्वरः ॥ अकस्माच्छूलरोगेण । मृतोऽस्येति जगुर्जनाः ॥ ३१ ॥ वज्रेणेवाहतस्तेन । वा-
क्येन पृथिवीतले ॥ पपात मूर्छितो रामः । कथंचिच्चाप चेतनां ॥ ३२ ॥ तदंते प्राप्य पतितं
। निश्चेष्टं काष्टवद्भुवि ॥ तं दृष्ट्वा कुट्टयन् वक्षो । विललापेति दुःखितः ॥ ३३ ॥ हा भ्रातः
किमिदं जातं । कावस्थेयं तवेदृशी ॥ त्वां विना न क्षणं राम—स्तिष्टतीत्यवगच्छसि ॥ ३४ ॥
तन्मां विहाय हा बंधो । कुत्र त्वं सांप्रतं गतः ॥ हा विधे यद्ययं नीतः । किं नो नयसि मा-
मपि ॥ ३५ ॥ सदैव भोजनस्नान—स्थानास्थानादिकं मया ॥ कुरुषे सर्वदैकाकी । सांप्रतं कि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मिदं वृथा ॥ ३६ ॥ एवं विलपतस्तस्य । विकलीभूतचेतसः ॥ इति चेतसि वार्ताभू-न्मृतो
यन्मे न बांधवः ॥ ३७ ॥ हेलया येन संग्रामे । हातः पद्मः ससैनिकः ॥ स कथं शूलमात्रेण
। विनश्यति महाबलः ॥ ३८ ॥ परं शूले समुत्पन्ने । यत्सारा न मया कृता ॥ ततोऽयं बांधवो
रुष्टो । न मया सह वक्त्यपि ॥ ३९ ॥ अथैनं मानयिष्यामि । भ्रातरं स्वं यथा तथा ॥ ध्या-
त्वेति कंठमालिंग्य । जल्प जेल्पैकदैत्यवक् ॥ ४० ॥ उत्तिष्ठोत्तिष्ठ हे भ्रातः । प्रातःसमय
एषकः ॥ सज्जालंकरणीभूय । भूयो नाषय भूपतीन् ॥ ४१ ॥ प्रसीद प्रणतोऽस्म्येषो-ऽपराधं
तं क्षमस्व मे ॥ नतानामपराधं त्वं । क्षमसे वैरिणामपि ॥ ४२ ॥ आलिलिंग मुहुः कंठं ।
प्रणनाम पदौ मुहुः ॥ जल्प जल्पेति जल्पन् स । रामोऽतीयाय तां निशं ॥ ४३ ॥ प्रातः
प्रक्षाल्य तस्यास्यं । निधायाभरणानि च ॥ उत्थाप्यारोपयद्रामो । हरेर्देहं सज्जांतरे ॥४४॥ य-
स्तं पश्यसुमाचष्ट । तं परासुं विनिर्ममे ॥ निहत्य मुशलेनाशु । रामसेनो रुषातुरः ॥ ४५ ॥
स्नानांगरक्षाभरण—स्थापनोत्थापनादिकं ॥ रामः स्वयं शवस्यापि । चक्रे स्नेहविमोहितः
॥ ४६ ॥ रामजीत्या समस्तैस्तै-र्नृपैः संसेवितं सदा ॥ हरिर्देहं समानीय । स सज्जायां न्य-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

वीविशत् ॥ ४७ ॥ षण्मास्यंतेऽन्यदा तत्र । गायनाः समुपाययुः ॥ आसने हरिमारोप्य । स तैर्गीतान्यगापयत् ॥ ४८ ॥ अत्रांतरेऽवधिज्ञाना—त्पितृव्याखिलचेष्टितं ॥ हरिषेणात्मजात्माचौ । देवावेतदपश्यतां ॥ ४९ ॥ पितृव्यप्रतिबोधाय । तौ देवौ देवलोकतः ॥ विप्ररूपधरौ क्षिप्रं । समेतौ तत्सन्नांतरे ॥ ५० ॥ जायमाने गीतगाने । निश्चले निखिले जने ॥ उच्चैस्तावूचतुर्विप्रौ । संगभंगकरं वचः ॥ ५१ ॥ आवामतींद्रियज्ञान—शालिनौ समुपागतौ ॥ दृष्ट्वा किंचिदिहारिष्टं । महाराज त्वदंतिके ॥ ५२ ॥ रामोऽवददरिष्टं किं । द्वितीयं भविता पुनः ॥ एकं तावत्पुराप्यस्ति । बांधवो यन्न जल्पति ॥ ५३ ॥ तावूचतुर्न ते भ्राता । त्वयैव सह जल्पति ॥ यथेहं सममावाभ्यां । नानावार्ताः करोत्यसौ ॥ ५४ ॥ रामोऽवग्घटते नैतदाबाल्यादपि लालितः ॥ जीविताभ्यधिकः साकं । न जल्पन्नस्ति यो मया ॥ ५५ ॥ कथं सोऽदृष्टपूर्वाभ्यां । युवाभ्यां सह जल्पति ॥ मावूचतुर्ज्ञास्यतेऽदः । सांप्रतं प्रत्यये सति ॥५६॥ इत्युक्त्वा हरिदेहं त—मधिष्ठाय द्विजावुभौ ॥ व्यधत्तां विविधा वार्ताः । सप्रीति हरिणा सह ॥ ५७ ॥ तद्द दृष्ट्वा चिंतयद्रामो । धिग्धिग्मोहमनर्तुकं ॥ एकपक्षो वृथा स्नेहो । मम देहे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वहत्यसौ ॥ ५७ ॥ एवं रामे धरत्यंत–रूचतुस्तौ सुरद्विजौ ॥ अरिष्टं भावि शृणु भो । तत्त-
श्चिंतां कुरुष्व च ॥ ५८ ॥ उच्यतामिति रामेण । प्रोक्ते तावूचतुर्पुनः ॥ आशूत्तरस्या दिशो-
ऽस्या । अभ्रमत्र समेष्यति ॥ ६० ॥ मुशलाधिकधाराभि—रत्र वर्षिष्यति क्षितौ ॥ तत्त-
तः सकलो देशो । जलराशी भविष्यति ॥ ६१ ॥ तावदेवोत्तराशाया । एकमभ्रं समुद्ययौ ॥
आरुरोहाचिराद्व्योम । लोक्यमानं सभाजनैः ॥ ६२ ॥ तद् वृष्टिं कर्तुमारेभे । समागत्य पुरो-
परि ॥ तत्क्षणं गतिविच्छेदं । सर्वेऽप्यापुर्जलाहताः ॥ ६३ ॥ पूर्वं सरांसि पूर्णानि । समानि च
ततः परं ॥ प्लावितं नीरपूरेण । ततो वृक्षगृहादिकं ॥ ६४ ॥ पतंतीर्विपणिश्रेणी–र्भ्रस्यतस्त्र-
स्यतस्तथा ॥ मज्जतीर्गजराजीश्च । तुरगान् मरणातुरान् ॥ ६५ ॥ कलकलकरान् लोकान् ।
बालानाक्रंदकारिणः ॥ नीरपूराहतानेवं । रामोऽद्राक्षीत्सदःस्थितः ॥ ६६ ॥ युग्मं ॥ उपरि-
ष्टान्महावृष्ट्या । वर्धमानांभसा क्रमात् ॥ कासारांतरवत्पूर्णं । व्यानशे तत्सभांतरं ॥ ६७ ॥
हरिदेहं तमारोप्य । स्कंधे रामः ससंभ्रमः ॥ आरुरोह निजावास–स्यैकविंशं क्षणात्क्षणं ॥
॥ ६८ ॥ अंतःपुरं पुरं सर्वं । ब्रुडद् दुःखभरातुरं ॥ रामः कृपापरः क्षाम–मनास्तत्र व्यलो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कयत् ॥ ६ए ॥ हा हा परिजनः सर्वो । मयि पश्यति सत्यपि ॥ ब्रुमत्येष ततो धिग्मा—मकिं-
चित्करमीश्वरं ॥ ७० ॥ एवं विलापयत्येव । रामे तत्रापि तज्जलं ॥ आगात्कल्पांतपाथोधेः ।
सादृश्यं दर्शयत्ततः ॥ ७१ ॥ आकंठमागते नीरे । जलरूपेऽखिले स्थले ॥ स किं कर्तव्य-
तामूढो । रामोऽपश्यद् द्विजद्वयं ॥ ७२ ॥ अवदत्स युवां नूनं । गुणिनौ ज्ञानशालिनौ ॥ अ-
तःपरं परं ब्रूतं । द्रुतं किं किं भविष्यति ॥ ७३ ॥ अभ्यधत्तां ततो विप्रा—वेकं प्रवहणं क्ष-
णात् ॥ अत्रैष्यति महाराज । श्रयणीयं त्वया हि तत् ॥ ७४ ॥ तावदेव समायातं । तत्र
बोहित्थमुत्तमं ॥ एकं कुतोऽपि चिक्षेप । तत्र रामो हरेस्तनुं ॥ ७५ ॥ स्वयं समाललंबे स ।
यावत्तावन्न तज्जलं ॥ न नावं किंतु तत्सर्वं । यथावस्थमलोकत ॥ ७६ ॥ हरिं सिंहासना-
सीनं । स्वं च सर्वान् जनानयं ॥ सर्वं यथास्थितं चान्य—त्पश्यन् रामः स विस्मितः ॥ ७७ ॥
किमेतदिति तौ विप्रौ । पृष्टौ रामेण सादरं ॥ जजल्पतुरिंद्रजाल—मिदं प्रकटितं नृप ॥ ७८ ॥
क्षणादृष्टविनष्टोऽसौ । प्रपंचो रचितो यथा ॥ तथा सर्वोऽपि संसारो । निःसार इति निश्चि-
तं ॥ ७ए ॥ जलं सर्वस्थलप्लावि । तत्क्षणं व्यगलद्यथा ॥ तथा कथं न ते भ्राता । विन-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्त्यैष पद्मजित् ॥ ८० ॥ संसारे शाश्वतः कोऽपि । धर्मचक्री न चक्र्यपि ॥ प्रतिविष्णुश्च विष्णुश्च । बली नाप्यपरो बली ॥ ८१ ॥ रामसेन तवेयं का । भ्रांतिर्यन्मम बांधवः ॥ म्रियेतायं हि पूर्णायु-र्मरिष्यति भवानपि ॥ ८२ ॥ ततो मोहममुं मुक्त्वा । कृत्वा चास्योर्ध्वदेहिकं ॥ उपादाय परिव्रज्यां । स्वसाध्यं साधयाधुना ॥ ८३ ॥ सागराद्देवदत्ताख्यौ । यौ हरेर्नंदनावुभौ ॥ अभूतां तौ सुरौ भूत्वा । त्वत्प्रबोधार्थमागतौ ॥ ८४ ॥ द्विजरूपधरावावा-मित्युक्त्वा तावुभावपि ॥ देवौ जातौ दिव्यरूपौ । चलत्कुंडलमंडितौ ॥ ८५ ॥ तथा श्रुत्वा तथा दृष्ट्वा । रामोऽथ प्रतिबुद्धवत् ॥ चकाराकृत्रिमस्नेहो । हरिदेहोर्ध्वदेहिकं ॥ ८६ ॥ हरिषेणसुतं राज्ये । निधायैकं विधानवित् ॥ अकस्मादागतज्ञानि-मुन्यंते व्रतमग्रहीत् ॥ ८७ ॥ कृतकृत्यावथो देवौ । देवलोके गतौ पुनः ॥ अतिष्ठतां महासौख्यं । भुंजानौ तावुभावपि ॥ ॥ ८८ ॥ चत्वारोऽप्यथ ते देवा । एकदा समुपाययुः ॥ नेमेः समवसृत्यंत-रपृच्छन् भाविनं भवं ॥ ८९ ॥ स्वामी नेमीश्वरः प्राह । सुधासन्निभया गिरा ॥ मिथिलायां महापुर्यां । जयसेननृपात्मजः ॥९०॥ जीवः सागरदेवस्य । नाम्ना पद्मरथो नृपः ॥ एष चंद्रमती जीव-स्तस्य रा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ह्री नविष्यति ॥ ८१ ॥ सुदर्शनपुरेशस्य । युगबाहुनरेशितुः ॥ एष नानुमतीजीवो । नावि चंद्रयशा सुतः ॥ ८२ ॥ जीवः सागरदत्तस्य । युगबाहोर्महीपतेः ॥ तस्यैव तनयो नावी । नमिनामा द्वितीयकः ॥ ८३ ॥ श्रुत्वेति ते हर्षनरेण पूर्णाः । श्रीनेमिनाथं प्रणिपत्य नक्त्या ॥ नंदीश्वराद्येषु विधाय यात्रां । स्वस्थानमासाद्य सुखेन तस्थुः ॥ ८८४ ॥ इति श्रीप्रत्येकबुद्धचरित्रे तृतीयप्रस्तावे नमिपंचमषष्ठनववर्णनो नाम तृतीयः प्रकारः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ चतुर्थः प्रकारः प्रारभ्यते ॥

पृथिवीकामिनीकाम—वंदनाकारधारिणि ॥ जंबूद्वीपेऽस्ति नरत—क्षेत्रे नालस्थलाकृति ॥ १ ॥ तत्रास्ति तिलकश्रीका । पृथुला मिथिलापुरी ॥ यस्यामशिथिला लोकाः । शर्मैकधर्मकर्मणि ॥ २ ॥ यत्र श्रीमल्लिनाथस्य । श्रीनमेश्च जिनेशितुः ॥ जन्मदीक्षादिका जाता । महास्तीर्थमियं ततः ॥ ३ ॥ तत्रासीदहितत्रासी । राशीनूतगुणालयः ॥ शत्रुध्वांतदिवानाथो । जयसेनो नरेश्वरः ॥ ४ ॥ तत्र शस्यतरछाया । पत्रवल्लर्यलंकृता ॥ चलंती वनमालेव । वनमालेति राड्यनूत् ॥ ५ ॥ अन्यदा सुखसुप्ता सा । स्वप्नेऽनाकुलमानसा ॥ निश्चेकं

रथमद्राक्षी—त्पद्मपत्रविभूषितं ॥ ६ ॥ अस्मिन्नवसरे च्युत्वा । सप्तमाद्देवलोकतः ॥ जीवः सागरदेवस्य । तस्याः कुक्षाववातरत् ॥ ७ ॥ असूत समये साधु—यशःसौख्यसुधाप्रदं ॥ वनमाला शुभं सूनुं । चंद्रबिंबमिवोज्ज्वलं ॥ ८ ॥ स्वप्नानुसारतः पद्म—रथ इत्यभिधामदात् ॥ ॥ जयसेननृपस्तस्य । परमोत्सवपूर्वकं ॥ ९ ॥ अथ पद्मरथो मेरौ । कल्पद्रुम इव क्रमात् ॥ वृद्धिमासादयंस्तत्रा—खिला अभ्यस्तवान् कलाः ॥ १० ॥ स प्राप्तयौवनः पित्रा । सोत्सवं परिणायितः ॥ श्रीबंधुराजराजस्य । दुहित्रा पुष्पमालया ॥ ११ ॥ पुत्रं तमुद्धरस्कंधं । राज्ये संन्यस्य शस्यधीः ॥ जयसेनो नराधीशो । गुरूपांते ललौ व्रतं ॥ १२ ॥ अथो पद्मरथो राजा । स समं पुष्पमालया ॥ बुभुजे प्राज्यसाम्राज्य—मनिवार्यैकशासनः ॥ १३ ॥ इतश्चासन्नरत्नौघ—द्योतितांतरहर्निशं ॥ दिनस्य राजधानीव । सुदर्शनपुरं पुरं ॥ १४ ॥ अमानदानसंपूरि—तार्थिसार्थमनोरथः ॥ मनोरथो नृपस्तत्र । न्यायाध्वगमनोरथः ॥ १५ ॥ समुज्ज्वलयशोगंगा—जलक्षालितविष्टपः ॥ युगबाहुर्युवराजा । राज्ञो मान्यः सहोदरः ॥ १६ ॥ अन्यदाल्पपरिवारो । युगबाहुनृपानुजः ॥ जीर्णोद्याने ययौ क्रीडां । कुर्वन् दूरतरं गतः ॥ १७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्रैकं प्रस्फुरज्ज्वालं । ज्वालनं कुंडमैक्षत ॥ तस्योपरि च वृक्षस्य । शाखायां बद्धसिक्ककं ॥
॥ १८ ॥ तत्रारोहावरोहादि । कुर्वंतं नरमेककं ॥ अपृच्छत्किमिदं जड । क्रियते सोऽप्यवक्ततः
॥१९॥ कुमार साधयन्नस्मि । विद्यां गगनगामिनीं ॥ विधिरत्रोपदिष्टोऽस्ति । यदत्रारुह्य सिक्कके
॥ २० ॥ जपित्वैकाग्रचित्तेन । मंत्रस्याष्टोत्तरं शतं ॥ छिंद्याच्च तनिकैकैकं । भूयः कुर्यादिमं
विधिं ॥ २१ ॥ छिन्नासु तनिकास्वेवं । चतसृष्वपि साहसी ॥ साधकः सिद्धविद्यः सन्नुत्प-
तेद्गगनांगणं ॥ २२ ॥ आरोहाम्यहमेतस्मिन् । विद्यासाधनहेतवे ॥ अवरोहामि चातंका—
न्मृतेः कातरमानसः ॥ २३ ॥ कस्त्वं केन च विद्येयं । दत्ता तुभ्यं महाफला ॥ इति पृष्टः कु-
मारेण । सोऽभिधातुं प्रचक्रमे ॥ २४ ॥ अत्रास्ति हरिदत्ताख्यो । व्यवहारी महाधनी ॥ त-
त्पुत्रो जिनदत्तोऽहं । जिनधर्मरतांतरः ॥ २५ ॥ बालत्वेऽपि मृता माता । निःपुण्यस्यान्य-
दा मम ॥ परिणीता ततः पित्रा । सुंदरीत्यपरांगना ॥ २६ ॥ न स्नानभोजनादीनि । सा
मे कारयते स्वयं ॥ कारयंती भयात्पत्यु-र्निःस्नेहा मे न मोददा ॥ २७ ॥ मामाक्रोशति रोषे-
ण । सा निःकारणवैरिणी ॥ मातुः पराभवात्प्राप्त—यौवनो निरगां पुरात् ॥ २८ ॥ गत्वो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ध्यानांतरे चिंता—तुरोऽहं कातरांतरः ॥ महांतमेकमद्राक्षं । विद्यासिद्धं कृपापरं ॥ २९ ॥ तेनाऽ-
पृष्टं च वात्सल्य—पिच्छलस्वच्छचेतसा ॥ वत्स विच्छायवक्त्रस्त्वं । कुतः क प्रस्थितोऽसि वा ॥
॥ ३० ॥ दयालुरिति तस्याग्रे । स्वरूपं सर्वमात्मनः ॥ अवदं सोऽपि संजात—करुणो मामवा-
दीऽवदत् ॥ ३१ ॥ वत्सागच्छ मया साकं । पूरयिष्यामि ते मतं ॥ मयापि साहसं धृत्वा । प्र-
पन्नं तस्य तद्वचः ॥ ३२ ॥ संचरन् पादचारेण । गतो यावत्कियच्चिरं ॥ तेन सार्धं स ताव-
न्मा—मादायोत्पतितो नभः ॥ ३३ ॥ पक्षीव संचरन् व्योम्नि । कौतुकानि विलोकयन् ॥
भोजनावसरे प्राप्ते । इदमुद्यानमासदत् ॥ ३४ ॥ तस्य संसिद्धविद्यस्य । तत्र हुंकारमात्रतः
॥ प्रादुर्बभूव प्रासादो । मनोमृगपदार्थभृत् ॥ ३५ ॥ समं तेन प्रविश्यांतः । प्रासादं विहिता-
दरं ॥ मनोरममहेलानां । हस्तात्स्नानादि लब्धवान् ॥ ३६ ॥ सिद्धोऽपि विहितस्नानो । दे-
वदूष्यविभूषितः ॥ पूजोपचारभृत्पाणि—र्जैननाथमपूजयत् ॥ ३७ ॥ सदैव तेन भक्त्याह—
मपि देवार्चनं व्यधां ॥ सुधाभ्यधिकमाधुर्य—वर्यभोज्यान्युपाययुः ॥ ३८ ॥ यथेच्छं भोजनं ते-
षां । कृतवंतावुभावपि ॥ सुरांगनावीज्यमान—चामरावमराविव ॥ ३९ ॥ स्वर्णमय्यां सुश-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च्यायां । नीत्वा निद्रासुखं क्षणं ॥ सिद्धो हुंकारमात्रेण । प्रासादं तं व्यसर्जयत् ॥ ४० ॥
मामादाय खमुत्पत्य । स चचार घनीं महीं ॥ सायं हुंकारमात्रेण । नूयः प्रासादमानयत् ॥४१॥
उन्नौ प्रविश्य तस्यांतः । शय्यामाश्रित्य शोजनां ॥ नुंजानौ विषयान् देवां—गनानिः सुंद-
रांगीनिः ॥ ४२ ॥ अपि वाहितवंतौ तां । निशां सर्वां निमेषवत् ॥ विससर्ज पुनः प्रातः ।
प्रासादं सिद्धपूरुषः ॥ ४३ ॥ एवं प्रतिदिनं कुर्वन् । मया पृष्टः स सादरं ॥ महापुरुष कोऽसि
त्वं । कुतः सिद्धिस्तवेदृशी ॥ ४४ ॥ सोऽपि संजातसौहार्दो । वक्तुमारब्धवानिति ॥ साध-
र्मिकोऽसि यत्तस्मा—त्सर्वं ते कथ्यते पुरः ॥ ४५ ॥ श्रीपार्श्वनाथतीर्थेश—तीर्थे केशीगणा-
धिपः ॥ विहरन् पृथिवीपीठे । वसंतपुरमाययौ ॥ ४६ ॥ तत्र मे जनको धन्य—श्रेष्टी व्रतमु-
पाददे ॥ बालको जनकस्नेहा—दहमप्यात्तवान् व्रतं ॥ ४७ ॥ पठन् गुणन् गुरूपांते । संप्राप्तं
यौवनं वयः ॥ तत्र चारित्ररत्नं मे । जहार रततस्करः ॥ ४७ ॥ चारित्रमुंचनोपायां—श्चिंतयं-
स्तातमूचिवान् ॥ चारित्रं चरितुं तात । न शक्नोमि करोमि किं ॥ ४ए ॥ अन्यधत्त तत-
स्तातो । यथाशक्ति तपः कुरु ॥ नुंदवैकवारं द्विस्त्रिर्वा । कष्टं किमपि मा कृथाः ॥ ५० ॥ म-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यान्यदा पुनः प्रोक्तं । दुष्करं गोचराटनं ॥ तेनोक्तं भक्तपानादि । तवानिष्येऽहमेव हि ॥ ॥ ५१ ॥ शीतं मे लगतीत्युक्ते । स स्वप्रावरणान्यदात् ॥ दुष्यंति तात मेऽस्थीनी—त्युक्ते संस्तारकान्यदात् ॥ ५२ ॥ लोचं कारयितुं नाहं । शक्त इत्युक्तवत्यपि ॥ पिता कर्तरिकाहस्त—श्चक्रे मन्मुंरुमुंकनं ॥ ५३ ॥ अथो कथंचिदाश्रित्य । निर्लज्जात्वं पितुः पुरः ॥ प्रोक्तं शक्नोमि न स्थातु—मेकयांगनया विना ॥ ५४ ॥ अयोग्य इति तातो मां । तर्जयित्वातिरोषतः ॥ रजोहरणघातेनो—पाश्रयान्निरकाशयत् ॥ ५५ ॥ अव्यक्तवेषभृत्यक्त—साधुवेषो भ्रमन्नहं ॥ आकाशगामिनीचिंता—मणिविद्ये असाधयं ॥ ५६ ॥ ते विद्ये सुगुरूपांते । सिद्धांतं पठता श्रुते ॥ सारभूते मया तत्र । साधनासुविधिः श्रुतः ॥ ५७ ॥ तेनैव विधिनाराद्धे । सिद्धे ते उत्तमे मम ॥ तयोर्यथेप्सितं कामान् । लभेऽहं चंक्रमीमि च ॥ ५८ ॥ मया त्यक्तेऽपि चारित्रे । सम्यक्त्वं नैव मुच्यते ॥ अपि सिद्ध्यंत्यचारित्रा । न पुनः दर्शनोझिताः ॥ ५९ ॥ इति दुश्चरितं भद्र । भवतः पुरतो मया ॥ आत्मीयं प्रकटीचक्रे । बांधवाभ्यधिकोऽसि यत् ॥ ॥६०॥ इति सिद्धोदितं श्रुत्वा । मयोक्तं जिनशासनं ॥ धन्यं यस्यैकदेशज्ञ—स्त्वमीदृक्सिद्धसि-

श्री. कै. ला. ज्ञान कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऋिनाक् ॥ ६१ ॥ अथो पुनरपि कौण्यां । पश्यंतौ कुतुकावलीं ॥ एकलावामपश्याव: । पुरो-
द्याने जिनालयं ॥ ६२ ॥ तत्र प्रविश्य दृष्टा श्री-पार्श्वेशमूर्तिरुत्तमा ॥ श्रीमच्छासनदेव्याश्च।
प्रतिमान्या तदंतिके ॥ ६३ ॥ तस्याः पुरो विष्टरस्था । कुर्कर्येका विवेकिनी ॥ योगिनीवाच-
लदृष्टि–र्दृष्टिगोचरमागमत् ॥ ६४ ॥ चंदनालिप्तसर्वांगीं । वीजयंतिस्म तां स्त्रियः ॥ तास्वेका-
पृष्ठि सिद्धेन । जद्रे किमिदमद्भुतं ॥ ६५ ॥ सा प्राह कथ्यते दुःखं । तस्याग्रे दुःखितोऽस्ति
यः ॥ जक्के ड्डःखे जवेद्यो वा । दुःखमुद्धर्तुमीश्वरः ॥ ६६ ॥ त्वं चाकारेण सारेण । लक्ष्यसे
सर्वकार्यकृत् ॥ अतस्तवाग्रतो जद्र । वृत्तमेतन्निरूप्यते ॥ ६७ ॥ अत्रारिष्टपुराख्याने । नगरे-
ऽतिगरीयसि ॥ सुशासनो नरेशोऽस्ति । पाकशासनशासनः ॥ ६७ ॥ तद्राज्ञी चंद्रलेखेति ।
चंद्रलेखेवं निर्मला ॥ पुत्री मदनरेखास्याः । प्राप्तरेखा सतीषु या ॥ ६९ ॥ लीलान्यस्तकला
रूप—शालिनी गुणमालिनी ॥ गुरूपांतश्रुतजैन—धर्ममर्मपरायणा ॥ ७० ॥ युग्मं ॥ इदं
श्रीपार्श्वनाथस्य । भूमिनाथेन मंदिरं ॥ कारितं शासनदेव्याः । प्रतिमेयं च जक्तितः ॥७१॥
जोदये जिनार्चनं कृत्वा । प्रत्यहं जक्तिजागहं ॥ जग्राहाजिग्रहमिति । गुरूपांते नृपात्मजा ॥७२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आबाल्यादिति कुर्वंती । सान्यदा प्राप्तयौवना ॥ पूजयित्वा जिनं भक्त्या—चैयशासनदेवतां ॥ ७३ ॥ तदग्रतः कृतध्याना । सावधाना नृपांगजा ॥ ऊचे कुतश्चिदागत्य । परिव्राजिकया कया ॥ ७४ ॥ रे बाले बालबुद्धे किं । पाषाणः पूज्यते त्वया ॥ आराध्यसि न किं त्वं मां । सर्वसिद्धिविधायिनीं ॥ ७५ ॥ अथो मदनरेखाख्यद् । दुःखदौर्गत्यदुर्गते ॥ पूर्वं कुर्वात्मनः सौख्यं । सर्वः स्वात्महितो जनः ॥ ७६ ॥ देवस्त्रैलोक्यनाथोऽसौ । पार्श्वनाथोऽर्चनोचितः ॥ शासनोत्सर्पणकर्त्री । सैषा शासनदेवता ॥ ७७ ॥ अनयोः सेवनान्नूनं । लभ्यते सर्वमीप्सितं ॥ साक्षाद्दारिद्र्यमुद्रायाः । किं साध्यं तव सेवनात् ॥ ७८ ॥ इत्यादियुक्तियुक्तोक्त्या । कुमार्या सा निराकृता ॥ निर्वासिता ततः स्थाना—त्पराभूय सखीजनैः ॥ ७९ ॥ कथं प्रतिकरोम्यस्या । राजपुत्र्या वराक्यहं ॥ परिव्राजिकयाचिंति । चिरमित्यतिरोषतः ॥८०॥ स्मृतोपायाऽचिराद्दासी—मेकां सा स्ववशां व्यधात् ॥ जलांतरौषधीचूर्णं । तस्या हस्ताददापयत् ॥ ८१ ॥ तस्य प्रभावतो जज्ञे । कुमारी कुर्कुरी क्षणात् ॥ ते परिव्राजिकादास्यौ । राज्ञा निर्वासिते पुरात् ॥ ८२ ॥ राज्ञाज्ञाताभिरस्माभिः । सहितासौ नृपात्मजा ॥ श्रीमच्छास-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रत्येक चरित्रं १९७

नदेव्यंह्री । सेवमानात्र तिष्ठति ॥ ८३ ॥ तदिदं सकलं वृत्तं । गदितं भवतो यतः ॥ अथो सत्पुरुषैतस्या । उपकारं त्वमाचर ॥ ८४ ॥ इत्याकर्ण्य समुत्पन्न—करुणो सिद्धपूरुषः ॥ अस्मार्षीत्तत्क्षणं चिंता—मणिविद्यामवद्यजित् ॥ ८५ ॥ तदधिष्ठायिका देवी । दुग्धभृङ्गाजनान्विता ॥ तदपाययदेतस्याः । स्वप्नावस्थाथ साजनि ॥ ८६ ॥ राजांगजां स्वरूपस्थां । तां दृष्ट्वा हृष्टमानसाः ॥ तुष्टुवुः पार्श्ववर्तिन्यो । दास्यः सर्वाः स्मिताननाः ॥ ८७ ॥ अथ शासनदेवीं सा । प्रत्यक्षीभूय भूयसीं ॥ स्तुतिं चक्रे सिद्धपुंस—स्ततस्तां प्रणनाम सः ॥ ८८ ॥ ऊचे कृतांजलिर्देवि । प्रसादोऽयं तवैव मे ॥ परं परममाश्चर्य—मेतन्मानसमंतरा ॥ ८९ ॥ यदस्यास्तव पादाब्ज—सेविकाया अपीदृशी ॥ कथमापदियं चक्रे । परिव्राजकयानया ॥ ९० ॥ अथ शासनदेव्यूचे । भद्रेयं भवितव्यता ॥ देवैर्देवाधिदेवैर्वा । निराकर्तुं न शक्यते ॥ ९१ ॥ अनयार्जितमासीद्य—त्कर्म तत्फलमित्यभूत् ॥ गलिते सांप्रतं पापे । मयानीतो भवानिह ॥ ९२ ॥ प्रणम्य सिद्ध आचष्टा—नया पूर्वभवे कृतं ॥ किं नामैतादृशं कर्म । प्रसद्यैतत्प्रकाशय ॥ ९३ ॥ देव्यथो वक्तुमारेभे । श्रीमंगलपुरेपुरे ॥ जयमंगलराजाभू—त्प्रभूततमविक्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मः ॥ ९४ ॥ वेश्या रतिविलासाख्या । तत्र सर्वकलास्पदं ॥ आसीन्निःसीमरूपत्वा—द्वाम-
नेत्राशिरोमणिः ॥ ९५ ॥ इतो गजपुरे राजा । नरविक्रम इत्यभूत् ॥ त्रिविक्रमः सुतस्तस्य ।
जज्ञे परमविक्रमः ॥ ९६ ॥ सोऽन्यदा शरणायात—मरक्षच्चौरमातुरं ॥ अपराधात्ततस्तातः ।
कुमारं निरकाशयत् ॥ ९७ ॥ क्रमात् त्रिविक्रमो भ्राम्यन् । श्रीमंगलपुरे ययौ ॥ वेश्यां रति-
विलासां ता—मपश्यत्तत्र सोऽन्यदा ॥ ९८ ॥ हृतचित्तः प्रविश्यांत–स्तया जातानुरागया ॥
भुंजानो विषयान्नाना—विधांस्तस्थौ यथासुखं ॥ ९९ ॥ अन्यदा कुट्टिनी प्राह । प्रसुते नृप-
नंदने ॥ वत्से विसर्जयैनं द्राक् । सुरूपमपि निर्धनं ॥ १०० ॥ वेश्यानां सदने मान्यो । धन-
वानेव मानवः ॥ कुशलो नो कुलीनो नो । न कलावान्न रूपवान् ॥ १ ॥ अथो रतिविला-
साह । मातर्मे गुणिनामुना ॥ हृतं चित्तं च तेनाहं । रमिष्ये नापरेण हि ॥ २ ॥ अभिग्रहो
मयाग्राहि । यत्पतिर्मेऽयमेव हि ॥ अथान्ये धनवंतोऽपि । पुमांसः सोदरोपमाः ॥ ३ ॥ सको-
पयाक्कया प्रोचे । मुग्धे किमिदमभ्यधाः ॥ नात्मगेहेऽयमाचारो । वेश्या हि नगरांगना ॥४॥
मायया कथ्यतेऽप्येत—दवलोक्य निर्धनं जनं ॥ किमनेन दरिद्रेण । रंजितेनापि साध्यते ॥५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तयोक्तमर्जिता लक्ष्मी—र्हीं तव गृहे मया ॥ अथायमेव पुरुष । आजन्म शरणं मम ॥६॥ एवं तयोः समं वाक्यं । सुप्तोऽलीकप्रमीलया ॥ श्रुत्वा व्यचिंतयच्चित्ते । कुमारः सारसाहसः ॥ ७ ॥ नूनं रतिविलासाया । मयि प्रेम निरुत्तरं ॥ धनेषु पुनरक्षाया । युक्तमेतद् द्वयोरपि ॥ ८ ॥ कथंचित्पूरयाम्यस्या । धनदानेन वांछितं ॥ ध्यात्वेति निशि तद्गेहा—न्नगरादपि निर्ययौ ॥ ९ ॥ भ्रमन् भूमौ महारण्ये—ऽन्यदैकत्राशृणोदयं ॥ ध्यायन् धनार्जनोपायं । चतुर्णां कलहं नृणां ॥ १० ॥ तेषामभ्यर्णमभ्येत्य । सोऽपृच्छत्केन हेतुना ॥ भवंतः कलहायंते । ततस्तैरिति जल्पितं ॥ ११ ॥ चत्वारोऽपि वयं चौरा । वसामोऽत्रैव कानने ॥ एकोऽत्र नर आयासी—द्विद्यासाधनहेतवे ॥ १२ ॥ षड्भिर्मासैर्घनायासैः । सिद्धा विद्यास्य भूस्पृशः ॥ प्रत्यक्षीभूय देव्यस्मै । वस्तुत्रयमिदं ददौ ॥ १३ ॥ तत्रैकं पादुकायुग्मं । कंथा लकुट इत्यपि ॥ तेषां प्रभावमित्यूचे । देवता स्वमुखेन सा ॥ १४ ॥ पादुकाभ्यां गतिर्व्योम्नि । लकुटेनारिनिर्जयः ॥ दीनाराणां सहस्रं च । दत्ते कंथा दिने दिने ॥ १५ ॥ अभिधायेत्यदृश्याभू—द्देवी संसाधकोऽथ सः ॥ अवशिष्टं विधिं सर्वं । कर्तुमारब्धवान् पुनः ॥१६॥ तस्मिन् व्याक्षिप्तचे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्के—ऽस्मान्निरागत्य लाघवात् ॥ तज्जगत्त्रयसाराज्ञं । वस्तुत्रयमुपाददे ॥ १८ ॥ गृह्यतेऽदो विभज्येति । नान्यो विभजतां सतां ॥ भंगो मिलति चत्वारो । वयं वस्तुत्रयं ह्यदः ॥ १९ ॥ आकाराल्लक्ष्यसे दक्ष—स्त्वं भो पुरुषसत्तमः ॥ आदाय स्वयमस्मभ्यं । विभज्य दिश सांप्रतं ॥ २० ॥ कुमाराग्राभिधायेति । चौरा वस्तुत्रयं ददुः ॥ पादुके पादयोः क्षिप्ते । लकुटश्चाददे करे ॥ २१ ॥ कंथा परिदधे चक्रे । हुंकारो नृपसूनुना ॥ जग्मे च तेषु पश्यत्सु । सविषादेषु पुष्करं ॥ २२ ॥ आगाद्रतिविलासाया । वेश्मोपरितनक्षणे ॥ क्षणात्त्रिविक्रमः साथ । दृष्ट्वा तं हृष्टहृज्जगौ ॥ २३ ॥ स्वामिन् गगनचारित्वं । संजातं भवतः कुतः ॥ कुमारश्चौरवृत्तांतं । समस्तं तं न्यवेदयत् ॥ २३ ॥ तत्रायया क्षणादक्का । तमपृच्छच्च विस्मिता ॥ भद्र त्वं कथमायातो । न दृष्टः प्रविशन् मया ॥ २४ ॥ तेनोक्तं त्वादृशामक्के । धनिबद्धदृशां ननु ॥ अस्मादृशा दृशोर्मार्गे । कथमायांति निर्धनाः ॥ २५ ॥ तयाथ माययावाचि । सभायमवलोक्य तं ॥ गुणावर्जितभूपृष्ट । ममेष्टोऽसि त्वमेव हि ॥ २६ ॥ परं सत्यमिदं ब्रूहि । कथमागतवान् भवान् ॥ ततो रंजितचित्तेन । तेन सत्यं निवेदितं ॥ २७ ॥ अथान्यदा कुट्टिनी सा—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽवोचत्कपटपंक्तिता ॥ प्रासादः सिंहलद्वीपे । कामदेवस्य विद्यते ॥ २० ॥ कामितान्यमिता-न्येष । जक्तांगिज्यः प्रयछति ॥ यात्रा तत्र मयामानि । त्वदागमकृते कृतिन् ॥ २ए ॥ त-द्भद्र पादुकारूढो । मां गृहीत्वा क्षणादपि ॥ तत्र यात्रां विधाय त्वं । समागछेः स्वमंदिरं ॥ ३० ॥ कुमारः सरलः शांत—स्तां समादाय पाणिना ॥ उत्पत्य पादुकारूढः । काममंदि-रमासदत् ॥ ३१ ॥ विमुक्तपादुको द्वारे । कुमारो जवनांतरे ॥ पश्यंश्चित्रं प्रविश्यांत—र्नेना-म मकरध्वजं ॥ ३२ ॥ पादुके पादयोः क्षिप्त्वा । कुट्टिनी तावदेव सा ॥ उत्पत्य व्योममार्गे-ण । क्षणात्स्वपुरमाययौ ॥ ३३ ॥ दृष्टा सा मंदिरं प्राप्ता । पृष्टा रतिविलासया ॥ कुमारो दृ-श्यते किं नो । मन्मनोंबुधिचंद्रमाः ॥ ३४ ॥ मन्ये तत्पादुके हृत्वा । जगद्वंचनतत्परे ॥ अरे समागतासि त्वं । वंचयित्वा मम प्रियं ॥ ३५ ॥ तयोक्तं पुत्रि मे द्रव्यं । प्रचुरं तेन जक्षितं ॥ पादुकाढ्यतयादानात् । किमेवं हृदि पीड्यसे ॥३६॥ सकोपयान्यदावादि । तया यातु क्षयं धनं ॥ निःकृष्टा कुक्कुरीतोऽपि । डुष्टे त्वमसि लोजिनि ॥ ३७ ॥ पिशुनस्य शुनश्चापि । दृश्यते महदंतरं ॥ पोषकेन जषत्येको । परस्तु सकलेष्वपि ॥ ३० ॥ एवमुक्तेऽक्कया प्रापि । चित्ते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत्येक
चरित्रं


दुःखं महत्तमं ॥ ततो निकाचितं कर्म । बद्धं रतिविलासया ॥३९॥ अथो रतिविलासा सा । कुमारविरहातुरा ॥ तस्थौ दुःस्था मौनवती । स्नानभोजनवर्जिता ॥ ४० ॥ त्रिविक्रमकुमारोऽथ । नत्वा स्तुत्वा मनोभवं ॥ भवनद्वारमायातो । नापश्यन्निजपादुके ॥ ४१ ॥ शंभलीमविलोक्याथो—ऽचिंतयद्वंचितोऽस्मि हा ॥ मया हि मुषिताश्चौरा । अनयाहं पुनश्छलात् ॥ ४२ ॥ अथो कथंचिज्ज्ञात्वेत—स्तस्याः कुर्वे प्रतिक्रियां ॥ जातेन तेन किं यो नो । अपकारकरोऽरिषु ॥४३॥ अत्रांतरे कुमारेण । ददृशेऽवतरन् दिवः ॥ एको विद्याधरः पुष्प—भाणपूजनहेतवे ॥४४॥ स समेत्यानमन्मारं । कुमारं चाभ्यधादिति ॥ विलक्षवदनः कस्मा—द्दूयसे त्वं नरोत्तम ॥४५॥ शंभलीचेष्टितं सर्वं । तेनाभाणि तदग्रतः ॥ ततो विद्याधरोऽवादी—त्सर्वस्तेऽर्थः करिष्यते ॥४६॥ परं दिनत्रयं भद्र । त्वमत्रैवातिवाहय ॥ पुरः प्रयोजनं कृत्वा । यथागच्छाम्यहं पुनः ॥४७॥ इहैव भवता स्थेयं । न गंतव्यं वनांतरे ॥ शिक्षयित्वेति दत्वा च । भोजनं त्रिदिनोचितं ॥४८॥ गते विद्याधरे स्थित्वा । तत्रैव दिवसद्वयं ॥ कुमारोऽचिंतयत्कस्मा—न्निषिद्धं गमनं वने ॥ ४९ ॥ किं तत्रास्तीति पश्यामि । ततो निर्गत्य मंदिरात् ॥ भ्रमन् वनेऽयमद्राक्षी—

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

त्पुष्पजारगुरुं तरुं ॥ ५० ॥ स तस्यादाय पुष्पाणि । जघ्रौ चाजूत्खरः क्षणात् ॥ वनं खरस्व-
नं कुर्वन् । बभ्राम गतचेतनः ॥ ५१ ॥ विद्याधरः स आयासी—दपश्यंस्तत्र तं नरं ॥ गतो
वनं व्यलोकिष्ट । खरं खरतरस्वरं ॥५२॥ ज्ञातो व्यतिकरोऽनेन । विद्याधरवरस्ततः ॥ अचिं-
तयन्निषिद्धेऽर्थे—ऽधिकं लोकः प्रवर्तते ॥ ५३ ॥ अथादायाऽपरागस्य । परागीणि सुमानि सः
॥ अपरांगं पराकार्षी—त्तस्याघ्राप्य कृपापरः ॥ ५४ ॥ विद्याधरोपदेशेन । स्वजावस्थः कुमा-
रराट् ॥ उजयोर्वृक्षयोः पुष्पा—एयाददे तानि सादरः ॥ ५५ ॥ विद्याधरस्तमादाय । समुत्पत्यै-
त्य च क्षणात् ॥ मुमोचोच्चैस्तरे तस्या । विशोपरितनक्षणे ॥ ५६ ॥ निःकारणोपकारिन् जो
। जूरियं भूषिता त्वया ॥ स्तुत्वेत्यादिप्रकारेण । कुमारस्तं व्यसर्जयत् ॥ ५७ ॥ उपोषित-
त्रयक्षामा । श्यामा कामातुरांतरा ॥ दृष्ट्वा रतिविलासा सा । हृष्टा प्राणप्रियागमं ॥ ५८ ॥
अमृतेनेव संसिक्ता । सा समुत्थाय संभ्रमात् ॥ तं निवेश्य स्वशय्याया—मपृच्छत्कुशलागमं
॥ ५९ ॥ कुमारागमनोदंतं । दासी गत्वा न्यवेदयत् ॥ कुट्टिनी हा कथं पापी । ममारिरय-
मायया ॥ ६० ॥ करोमि कपटं किंचित् । पादुकाहृतिलोपकृत् ॥ ध्यात्वेति सा शिरोबाहु—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पादाद्यंगेषु सर्वतः ॥ ६१ ॥ बध्ध्वा पट्टान् स्खलत्पादा । समागत्येत्यजाषत ॥ स्वागतं मम जा-
मातुः । कथमागा विपादुकः ॥ ६२ ॥ तदा त्वयि गते मध्यं । पादुकारक्षणाधिनी ॥ स्थि-
ताहं जवनद्वारे । रत्नं यत्नाद्धि रक्ष्यते ॥ ६३ ॥ तावदेकः समायात-स्तत्र विद्याधरः परः ॥
हत्वा मां लकुटाघातैः । पादुके ते जहार सः ॥ ६४ ॥ बाहुदंडममुंचंतीं । स्फारपूत्कारकारि-
णीं ॥ मामुपादाय विद्यानृ-दुत्पपात नजस्तलं ॥६५॥ सोऽत्रागत्य बलोन्मत्तो । मम बाहुम-
मोचयत् ॥ गतः क्वचित्स जूपीठे । पतिताहं निराश्रया ॥ ६६ ॥ पतत्या मम जग्नानि । पा
दाद्यंगानि सर्वतः ॥ कथंचिद्गृहमायाता । दुःखंत्यद्याप्यमून्यहो ॥ ६७ ॥ कुमारः प्राह वि-
ज्ञाय । सर्वं कपटचेष्टितं ॥ अद्याप्यंगं न जग्नं य-दंतास्ते नापतन्नमी ॥ ६८ ॥ अक्षयोक्तमलं
जद्र । वचनेनामुना तव ॥ त्वां विना दुःखितां किं मे । दुहितारं न पश्यसि ॥ ६९ ॥ अ-
नया त्वद्वियोगेना-हारो हारोऽप्यमुच्यत ॥ वद स्वागमवृत्तांतं । तदस्याः सुखहेतवे ॥
॥ ७० ॥ ततः कुमार आचष्ट । दिवत्रयसमार्चितः ॥ एकध्यानात्समाराद्धः । प्रसन्नोऽजून्मयि
स्मरः ॥ ७१ ॥ स्वशीर्षतः समुत्तार्य । प्रत्यक्षीजूय भूयसा ॥ इमाः सुमनसो दत्ताः । कामं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कामितदाः क्षणात् ॥ ७२ ॥ अहं सुमनसामासां । प्रभावाद्गगनाऽध्वना ॥ सुखेनैव समाया-
तो—ऽर्थ्यते यत्तद्ददत्यमूः ॥ ७३ ॥ विधाय मनसा वांछां । पुष्पाण्येतानि जिघ्रति ॥ यः स
सर्वं समाप्नोति । तत्क्षणं नात्र संशयः ॥ ७४ ॥ निवेदितं तवाग्रेऽदो । रहस्यं परमं मया ॥
अवश्यमपरस्याग्रे । नैव कथ्यं कथंचन ॥ ७५ ॥ कुट्टिनी प्राह वृद्धत्वं । देहदीप्तिहरं दृढं ॥
आघ्राप्य निजपुष्पाणि । तारुण्यं मे समानय ॥ ७६ ॥ एवमस्त्विति जल्पित्वा । गर्दभत्वक-
राणि सः ॥ आघ्राप्य कुसुमान्याशु । कुट्टिनीं गर्दभीं व्यधात् ॥ ७७ ॥ निबद्ध्य रज्जुना
बाढ—मारुह्यासह्यविक्रमः ॥ ताडयन् दृढदंडेन । कुमारो निर्ययौ गृहात् ॥ ७८ ॥ दृष्ट्वा त-
त्तादृशं वेश्या—वर्गस्तत्राखिलोऽमिलत् ॥ ऊचे रतिविलासाग्रे । गत्वा राज्ञे निवेदय ॥७९॥
यथासौ मोचयत्यक्कां । पीड्यमानां नरादितः ॥ ऊचे सा सहतामेषा । स्वदुःकर्मसमं फलं
॥ ८० ॥ ततो विलासिनीवर्गः । समग्रो नृपमभ्यधात् ॥ स्वामिन्नस्माकमक्कैका । पुंसैकेन ख-
रीकृता ॥ ८१ ॥ अस्त्यसौ दंडघातेन । कुट्टयन् कुट्टिनीं खरीं ॥ कृपां कृत्वा नृपैतस्मा—द्वि-
मोचय वराकिनीं ॥ ८२ ॥ राज्ञादिष्टाः पुमांसोऽथ । गत्वावोचंस्त्रिविक्रमं ॥ अरे विडंबयस्येवं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किमेवं नृपसंमतां ॥ ७३ ॥ मुक्त्वैतां भूपतेरंतं । समागच्छान्यथा पुनः ॥ बध्ध्वा बलेन नेष्यामो । भूपादेशोऽस्त्ययं हि नः ॥७४॥ स आह साहसाधारो । मयेयं तस्करी खरी ॥ कृता विडंबयाम्येनां । स्वापराधविधायिनीं ॥ ७५ ॥ इमां नाहं विमोच्यामि । पक्षमस्याः करोति यः ॥ स समायातु तस्यापि । शिक्षां दातुं क्षमोऽस्म्यहं ॥ ७६ ॥ इत्युक्ते कुपितस्वांताः । कृतांता इव भीषणाः ॥ दुढौकिरे प्रहर्तुं त–मुदस्त्रा राजपूरुषाः ॥ ७७ ॥ सोऽपि चंडेन दंडेन । खंडयामास खंडशः ॥ एकेनापि प्रहारेण । पातयन् शतशो भटान् ॥ ७८ ॥ अथ ध्वस्ताः परे सर्वे । त्रस्ता गत्वा न्यवेदयन् ॥ नृपाय सोऽपि सेनान्य—माज्ञापयति तंप्रति ॥ ७९ ॥ स गत्वैकांतवीरेण । कुमारेण समं चिरं ॥ विधाय विविधं युद्धं । क्षणभग्नः पलायितः ॥ ८० ॥ तद् ज्ञात्वा भूपतिस्तत्र । समागाद्विस्मिताशयः ॥ तावत्कुमारप्रस्तावी—डुपलक्ष्येति मागधः ॥ ८१ ॥ नरविक्रमराजेंद्र—कुलांभोनिधिचंद्रमाः ॥ त्रिविक्रमकुमारेंद्र । जय त्वं जगतीतले ॥ ८२ ॥ इति श्रुत्वा नृपोऽवादी—न्मातुलो निस्तुलप्रभः ॥ नरविक्रमभूपो मे । बांधवोऽयं त्रिविक्रमः ॥ ८३ ॥ इत्युक्त्वागत्य भूपाल । आलिंगत्कंठकंदलं ॥ तवातिथिविधिर्जात—स्पृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वौऽयं मया कृतः ॥ ९४ ॥ अपराधं क्षमस्वैनं । न दोषो यदजानतः ॥ वदैतया वरा किन्या।
कोऽपराधः कृतस्तव ॥ ९५ ॥ इत्युक्ते भूभुजा प्राह । कुमारः स्फारसाहसः ॥ अनयादन-
या देव । पादुके मे हृते इति ॥ ९६ ॥ स्वन्नावस्थामिमां नर्ड । त्वं विधेहि विधेयवित् ॥
यथा यथोचितां शिक्षां । करोम्यानाय्य पादुके ॥ ९७ ॥ एवं जल्पति भूपाले। स्वन्नावस्था-
थ सा कृता ॥ कुमारेण समाघ्राप्य । पुष्पाण्यपरशाखिनः ॥ ९८ ॥ राज्ञा जनेन्य आदिष्ट-
मरे निर्वासयंत्विमां ॥ गृहसर्वस्वमादाय । छित्वा कर्णौ च नाशिके ॥ ९९ ॥ ततः सा कंप-
मानांगी । समानीय स्वमंदिरात् ॥ पादुके ते कुमाराग्रे—ऽमुंचत्पादौ ननाम च ॥ २०० ॥
स्वपादुके समादाय । सोऽप्युत्पन्नकृपो नृपात् ॥ अमोचयत्कुट्टिनीं तां । संतो हि दुःस्थवत्स-
लाः ॥ १ ॥ आमंत्रितः श्रीजयमंगलेन । राज्ञा स शृण्वन् जयमंगलानि ॥ आरुह्य तुंगं प-
रमं तुरंगं । रंगन्नरेंद्रालयमाजगाम ॥ २ ॥ राज्ञा विहितसन्मानः । समं रतिविलासया ॥
कुर्वन् रतिविलासान् स । तस्थौ तत्र सुखान्वितः ॥ ३ ॥ गत्वैकांते झटत्कृत्य । स्वां कंथां प्र-
तिवासरं ॥ दीनाराणां सहस्रं स । लब्ध्वा दानं ददौ सदा ॥ ४ ॥ भूपो रतिविलासां ता—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्यदालोक्य मोहितः ॥ कुमारं तादृशं शूरं । जानन्नादत्तवान् पुनः ॥ ५ ॥ नृपस्तामन्य-
दाकार्य । सानुरागमना जगौ ॥ शुभेऽतिसुभगस्वामि-त्वेन मामुररीकुरु ॥६॥ यावत् त्रिविक्र-
मो द्रव्यं । दत्ते ते प्रतिवासरं ॥ ततः शतगुणं नित्यं । नूनं दास्याम्यहं धनं ॥७॥ प्रचुरद्रव्य-
दातैव । प्रायशः प्राणिनां प्रियः ॥ विशेषेण पुनः स्त्रीणां । वेश्यानां तु विशेषतः ॥८॥ एनं
नरं परित्यज्य । मां प्रपद्य स्वनायकं ॥ वेश्याया अप्यवश्यं ते । वश्यं राज्यमिदं ततः ॥ ९ ॥
न बलाज्जायते स्नेह । एतदर्थं वदाम्यदः ॥ राज्ञो हि निजदेशस्थं । विवशं किमु वर्तते
॥ १० ॥ अथो रतिविलासोचे । सुखार्थं धनसंचयः ॥ सुखं यद्गुणिनः संगा—न्न हि तद्ध-
नसंचयात् ॥ ११ ॥ धनेन प्रिय इत्येत-दलीकं वचनं ननु ॥ किं धनं चक्रवाक्यै तु । चक्र-
वाको ददात्यहो ॥ १२ ॥ पतिव्रतास्मि संजाता । वेश्याकुलगताप्यहं ॥ दरिद्रकुलसंभूतैः ।
श्रीमद्भिः किं न भूयते ॥ १३ ॥ कलाबलविशालेऽस्मिन् । गुणग्राममनोहरे ॥ सति पत्यौ
ममावश्यं । वश्यमेवाखिलं जगत् ॥ १४ ॥ आदातुं कः समर्थः स्या-दस्मिन् जाग्रति मां
बलात् ॥ शेषराज शिरोरत्नं । गृहीतुं केन शक्यते ॥ १५ ॥ इति प्रत्युत्तरैः सारै-र्नृपं कृत्वा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिरुत्तरं ॥ मोहिते मूर्छिते तस्मि—न्निजं धाम जगाम सा ॥ १६ ॥ कुमाराग्रे समग्रं तं । वृत्तांतमभिधाय सा ॥ आख्यन्न स्वजनैः साकं । विरोधो यशसे प्रजो ॥ १७ ॥ मुक्त्वा क्लेशकरं स्थान—मिदमन्यत्र गम्यते ॥ कुमारः सत्यमित्युक्त्वा—ऽचालजंतुं पितुः पुरं ॥ १८ ॥ पादुके पादयोः क्षिप्त्वा । कंथां स्वां परिधाय च ॥ दक्षिणे लकुटं तां च । प्रियां वामे करेऽकरोत् ॥ १९ ॥ कुमारः कृतहुंकार । उत्पपात नत्नोंगणे ॥ व्रजन् पितुः पुरं मार्गे । पंचदिव्यान्यलोकत ॥ २० ॥ किमेतदिति साश्चर्यो—ऽवर्त यं भुवि मानवं ॥ एकं पप्रच्छ सोऽप्याख्य—दत्रापुत्रो मृतो नृपः ॥ २१ ॥ पंचदिव्यं भ्रमत्येत—दभिषेकपरं नरं ॥ तयोर्वार्तयतोरेवं । कुमारांते तदाययौ ॥ २२ ॥ अभिषेकं करी चक्रे । तस्य छत्रेण विस्तृतं ॥ चामराभ्यां वीज्यतेस्म । हयो हेषारवं व्यधात् ॥ २३ ॥ दिव्यवादि स्वयं तत्र । दिव्यया जयढक्कया ॥ सामंतैर्मंत्रिभिः सर्वैः । स कुमारो नमस्कृतः ॥ २४ ॥ वाद्येषु वाद्यमानेषु । गीयमानासु गीतिषु ॥ नवत्सूत्सवदृंदेषु । प्रोच्छलत्सु मुदांगिषु ॥ २५ ॥ दीयमानेषु दानेषु । समं रतिविलासया ॥ आरुह्य सिंधुरस्कंधं । कुमारः पुरमाविशत् ॥ २६ ॥ युग्मं ॥ श्रीभोग-

पुरसाम्राज्यं । ददुः पूर्वनृपासने ॥ निवेश्य शस्यभाग्याय । तस्मै सामंतमंत्रिणः ॥ २७ ॥ कन्याः पूर्वनृपस्याष्टा—वेतस्य परिणायिताः ॥ भुंक्ते भोगान् समं ताभि—र्भुंजन् भोगपुरेशतां ॥ २८ ॥ सोऽन्यदाथ गवाक्षस्थः । क्रियमाणाममारिणा ॥ श्रीमल्लदेवसूरीणां । संघपूजामलोकत ॥ २९ ॥ लक्ष्मी नेवासे विलसद्गुणाढ्ये । संश्रूयमाणध्वनिषट्पदौघे ॥ धन्यस्य कस्यापि गृहांबुजाते । श्रीसंघहंसः प्रददाति पादं ॥ ३० ॥ अचिंतयच्च चित्ते स । श्रीसंघो यस्य मंदिरं ॥ अलंचक्रे स पुण्यात्मा । भावनां भावयन्नृपः ॥ ३१ ॥ तत् श्रुत्वा हृष्टयावाचि । तावद्रतिविलासया ॥ युक्तियुक्तमिदं स्वामिन् । भवता प्रतिपादितं ॥ ३२ ॥ मानं दानं सुपात्रेषु । गीतगानं निरंतरं ॥ बंदिनां जयशब्दश्च । जायते धन्यसद्मनि ॥ ३३ ॥ दानानुमोदनादेवं । द्वाभ्यां पुण्यमुपार्जितं ॥ प्रवृत्तं च स्वयं संघ—पूजादिसुकृतेष्वलं ॥ ३४ ॥ त्रिविक्रमनराधीशो । गुरूपांतश्रुतश्रुतः ॥ धर्मकर्मोद्यमं कुर्व—श्चिरं राज्यमपालयत् ॥ ३५ ॥ इतश्चांतःपुरीमुख्य—परिवारवृतोऽपि सः ॥ जयमंगलभूपालो । विना रतिविलासया ॥ ३६ ॥ राज्यराष्ट्रादिकं सर्वं । मन्यमानो निरर्थकं ॥ राज्ये नंदनमारोप्य । तापसव्रतमाददे ॥ ३७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कृताज्ञानतपा मृत्वा । सुदर्शनपुरेशितुः ॥ महाबाहुमहीशास्तुः । स सुतोऽभून्मनोरथः ॥
॥ ३७ ॥ त्रिविक्रमनरेंद्रोऽपि । मृत्वा तस्यैव बांधवः ॥ लघुरप्यलघुर्जज्ञे । युगबाहुर्गुणोत्करैः
॥ ३८ ॥ मृत्वा रतिविलासा सा । सुशासननृपांगजा ॥ एषा मदनरेखाभू—चंद्ररेखोदरोद्भ-
वा ॥ ४० ॥ शंखश्र्यप्याप्य पंचत्वं । सा परिव्राजिकाजनि ॥ पादुकाहरणोत्पन्न—रुषा रति-
विलासया ॥४१॥ दुष्टे त्वं कुर्कुरीतोऽपि । निकृष्टासीत्यन्नाणि यत् ॥ नवेऽस्मिन् कर्मणा तेन ।
कुर्कुर्येषा कृता तया ॥ ४२ ॥ मिष्टमेव हि वक्तव्यं । नानिष्टं च वचः क्वचित् ॥ दीयते को-
किलाभिः किं । काकैः किं ह्रियतेऽथवा ॥ ४३ ॥ एवं मदनरेखायाः । प्रादुष्कृत्य नवांतरं ॥
तिरोबभूव सा देवी । जिनशासनरक्षिका ॥ ४४ ॥ श्रुत्वा मदनरेखापि । तदा पूर्वनवं निजं
॥ संजातजातिस्मरणा । सर्वं साक्षादलोकत ॥ ४५ ॥ मिलिष्यति कथं मेऽथ । स पूर्वनवन-
ल्लभः ॥ इति चिंतातुरा जज्ञे । सा नरेश्वरनंदिनी ॥ ४६ ॥ विद्यासिद्धोऽवदत्ताव—भद्रे किं
चिंतयातुरा ॥ धन्या त्वमेव यस्याः सा—ऽध्यक्षा शासनदेव्यभूत् ॥ ४७ ॥ नवांतरवरं भद्रे
। मेलयिष्याम्यहं तव ॥ चिंता न कापि कर्तव्या । नगिन्यास्त्वं ममाधिका ॥ ४८ ॥ पुत्री-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्यसनापगम—वचनांबुदवर्षणात् ॥ सुशासननृपो जज्ञे । हर्षबुन्नृतमानसः ॥ ४९ ॥ तत्रा-
गात्तावदेवास्य । पुरो वृत्तांतमादितः ॥ दास्यो निवेदयामासुः । स च संतोषमासवान् ॥५०॥
सिद्धेनोक्तं महाराज । सुदर्शनपुरे पुरे ॥ जिनदत्तो वसत्येष । तत्स्वरूपं च वेत्त्यसौ ॥५१॥
ततो नरेंद्रपृष्टेन । मयावादि महीपते ॥ आसीत्सुदर्शनपुरे । महाबाहुर्महानृपः ॥ ५२ ॥
तस्मिन् दिवं गते जज्ञे—ऽधुना राजा मनोरथः ॥ युवराजा लघुभ्राता । युगबाहुर्महागुणः ॥
॥ ५३ ॥ राज्ञावादि महाभाग । युगबाहुकुमारकः ॥ अत्रानेयः स्वया पुत्र्या । विवाहं का-
रये यथा ॥ ५४ ॥ ॐमिति प्रतिपद्योर्वी—नायकस्य वचो मया ॥ समं सिद्धेन चोत्पत्य । स्था-
नकेऽत्र समागमं ॥ ५५ ॥ आकाशगामिनीं विद्यां । चिंतामण्यभिधामपि ॥ मह्यं प्रदाय सि-
द्धः स । तत्साधनविधिं जगौ ॥ ५६ ॥ विद्यायां साध्यमानायां । भाव्यं सत्ववता त्वया ॥
सिद्धे साध्ये चंद्रलेखा—पुत्र्याः साध्यं प्रयोजनं ॥ ५७ ॥ अहं गच्छामि निर्मातुं । यात्रां नंदी-
श्वरादिषु ॥ एवं प्रदाय मे शिक्षां । सिद्धराजस्ततो ययौ ॥ ५८ ॥ मया साधयितुं विद्या ।
प्रारब्धा व्योमगामिनी ॥ अनेन विधिना दृष्टं । ततः सत्वं त्वयापि मे ॥ ५९ ॥ युगबाहु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुमारोऽथ । जिनदत्तोदितं वचः ॥ श्रुत्वा सर्वं जातजाति—स्मृतिः स्वन्नमैक्त ॥ ६० ॥
ऊचे मदनरेखायां । जातरागो नरोत्तमः ॥ जिनदत्त समस्तोऽयं । मदर्थं त्वदुपक्रमः ॥६१॥
तन्मे विद्यामिमां देहि । साधयित्वा ददे यथा ॥ ततश्च जिनदत्तेन । तस्मै विद्या समर्पिता
॥ ६२ ॥ वह्निकुंडोपरिस्थस्य । शिक्ककस्यांतरे स्थितः॥ युगबाहुः कुमारेंद्रः । सत्ववानित्यचिंत-
यत् ॥ ६३ ॥ तथैव विहिते व्योमो—त्पपातोत्तमसाहसः ॥ कुमारस्तत्क्षणं तस्य । प्रत्यक्षा
देव्यजायत ॥ ६४ ॥ भणिता तेन सिद्ध्यस्व । देव्यस्य गुणशालिनः ॥ श्रेष्ठिनो जिनदत्तस्य ।
तदर्थं साधितासि यत् ॥ ६५ ॥ तयोक्तं वत्स सिद्धाहं । युवयोरुभयोरपि ॥ महाप्रसाद इ-
त्युक्त्वा । द्वाभ्यां सा स्वाश्रयं ययौ ॥ ६६ ॥ महासाहसिनं प्राप्य । सहायं तं कुमारकं ॥
जिनदत्तस्तदा चिंता—मणिविद्यामसाधयत् ॥ ६७ ॥ उक्तं च जिनदत्तेन । कुमार गगना-
ध्वना ॥ श्रीअरिष्टपुरड्ंगे । रंगद्रंगेऽथ गम्यते ॥ ६८ ॥ वांछा मदनरेखायाः । सुशासनभू-
पस्य च ॥ पूर्यते मे प्रतिज्ञा च । त्वदानयनलक्षणा ॥ ६९ ॥ एवमस्त्विति जल्पित्वा । त-
तो विद्याबलादुभौ ॥ कुमारो जिनदत्तश्चो—त्पतितौ व्योममंडले ॥ ७० ॥ एत्यारिष्टपुरोपांते

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

। जिनदत्तो विनिर्ममे ॥ श्रीचिंतामणिविद्याया । बलात्प्रासादमुत्तमं ॥ ७१ ॥ कुमारं तत्र सं-
स्थाप्य । स्वयं गत्वा पुरांतरं ॥ सुशासननरेशस्य । सभायां सादरोऽविशत् ॥ ७२ ॥ आसने
च निवेश्यैनं । भूपोऽवक् पुरुषोत्तम ॥ भवतोर्गतयोः पुत्री । निजमंदिरमासदत् ॥ ७३ ॥
जलेनेव विना मत्स्यी । पुत्रेन चमरी च गौः ॥ युगबाहुकुमारेण । विना सा व्याकुलाजनि
॥ ७४ ॥ शिशिरश्चांदनः सेकः । पवनश्च ससीकरः ॥ पुष्पशय्यादयस्तस्याः । प्रत्युतोत्ताप-
कारिणः ॥ ७५ ॥ भवता प्रतिपन्नस्य । सिद्धेन च सशक्तिना ॥ कुमारानयनस्यात्र । चिंता
कापि कृता न वा ॥ ७६ ॥ अथवा ह्यनेहसाल्पेन । कथं सिध्यति तादृशं ॥ बुभुक्षितानु-
रोधेन । पच्यते किमुदुंबरं ॥ ७७ ॥ विहस्य जिनदत्तेना—भाणि देव मया कृतं ॥ तव का-
र्यं समानीतः । कुमारोऽस्याः पुरोंतिके ॥ ७८ ॥ ससंभ्रमं ससंमोदं । मेदिनीशः स तत्क्षणं ॥
तं सोत्सवं पुरस्यांत—र्निगम्य समानयत् ॥ ७९ ॥ विवाहितः कुमारश्च । समं मदनरेखया
॥ विसृष्टो भूभुजाचालीत् । कुमारः सपरिच्छदः ॥ ८० ॥ सुदर्शनपुरद्रंगं । प्रविश्योत्सवपूर्वकं
॥ तस्थौ भोगान् स भुंजानः । साकं मदनरेखया ॥ ८१ ॥ अन्यदा सुखसुप्ता सा । चंद्रं स्वप्ने

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

व्यलोकयत् ॥ चंद्राभस्ते सुतो भावी । भर्तापि फलमूचिवान् ॥८२॥ च्युत्वा भानुमतीजीवः
। सप्तमाद्देवलोकतः ॥ तस्या अवातरत्कुक्षौ । सुशुक्ताविव मौक्तिकं ॥ ८३ ॥ सासूत समये
सूनुं । चंद्रवच्चारुदर्शनं ॥ दर्शनोल्लासकृन्मूर्तिं । स्पर्शनप्रीतिदप्रभं ॥ ८४ ॥ स्वप्नाकारानुसारे-
ण । पित्रा तस्य प्रतिष्ठितं ॥ महांतमुत्सवं कृत्वा । नाम चंद्रयशा इति ॥ ८५ ॥ स्नेहवत्स-
लस्वांते । शुक्ले पक्षे शशांकवत् ॥ शनैरासादयन् वृद्धिं । क्रमात्प्राप स यौवनं ॥ ८६ ॥
अन्यदा शुभरूपाप्त—रेखां लेखांगनाधिकां ॥ संचरंतीं गृहे साक्षा—ल्लक्ष्मीमिव मनोरमां
॥ ८७ ॥ दृष्ट्वा मदनरेखां तां । मदनातुरमानसः ॥ मनोरथनृपोऽकार्षी—त्तत्संगममनोरथान्
॥ ८८ ॥ युग्मं ॥ तस्यां पूर्वभवाभ्यासा—दनुरागस्तथाभवत् ॥ गम्यागम्यविभेदं हि । न
विवेद यथा नृपः ॥ ८९ ॥ अपार्थं मे सुखं राज्यं । जीवितं च तया विना ॥ धन्योऽसौ बां-
धवो योऽस्या । मुखांबुजमधुव्रतः ॥ ९० ॥ अपराः प्रवरा नार्यः । प्रचुराः संति यद्यपि ॥ अ-
गम्यासौ तथाप्येतां । विना नान्यत्र मे रतिः ॥ ९१ ॥ अस्ति कश्चिदुपायः स । संगो ये-
नानया भवेत् ॥ अज्ञातं प्रथमं कुर्वे । प्रेम दानादिनाऽनया ॥ ९२ ॥ आलापनात्समालोका

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

—दानाच्च गुणकीर्तनात् ॥ सोपानानुक्रमात्प्रेमा—रोहति स्वांतमंदिरं ॥ ९३ ॥ एवं विचिं-
त्य चित्तांत—र्मनोरथनराधिपः ॥ अंते मदनरेखायाः । प्राहिणोन्निजदूतिकां ॥ ९४ ॥ त-
या कर्पूरतांबूल—वसनाभरणादिकं ॥ तस्यै तदर्थ्यते नित्यं । शस्तं भोग्यंगिवस्तु यत् ॥
॥ ९५ ॥ ज्येष्ठो ददाति वध्वै य—त्तन्ननूचितमित्यसौ ॥ समस्तमपि गृह्णाति । सत्यो हि स-
रलाशयाः ॥ ९६ ॥ युगबाहुकुमारेंद्रे—ऽन्यदोद्यानमुपागते ॥ एकांते नृपतिर्गत्वा । तत्प्रिया-
मित्यभाषत ॥ ९७ ॥ यदि प्रपद्यसे भद्रे । पुरुषत्वेन मां तदा ॥ कुर्वे सर्वस्य राज्यस्य । स्वा-
मिनीं जीवितस्य च ॥ ९८ ॥ ऊचे मदनरेखापि । मयानंगी कृतेऽपि हि ॥ स्त्रीत्वषंढत्वमुक्त-
स्य । पुरुषत्वं विधिर्व्यधात् ॥ ९९ ॥ युगबाहोस्तव भ्रातु—र्युवराजो गृहिण्यहं ॥ स्वामिन्ये-
वास्मि राज्यस्य । तद्भर्तुं कः क्षमो भवेत् ॥ ३०० ॥ भवतो जीवितव्यस्य । स्वामिनीत्वेन मे
सृतं ॥ अन्यायादत्तवित्तस्य । जीवितान्मरणं वरं ॥१॥ किंचान्यायं महाराज । स्वयं कर्तुं स-
मीहसे ॥ को निवारयिता भावी । कुर्वतोऽन्यान् जनांस्ततः ॥ २ ॥ जीवघातान्मृषावादात्
। परस्वहरणात्तथा ॥ परस्त्रीकांक्षणाल्लोका—जीवा गच्छंति दुर्गतिं ॥ ३ ॥ महतोऽप्यचिरान्मृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्युः । परस्त्रीपरचेतसः ॥ त्रिलोकीकंटकाख्यस्य । रावणस्येव जायते ॥ ४ ॥ किं चैवं प्रल-
पन् भूप । बंधोरपि न लज्जसे ॥ दुर्गतिप्रतिभूरूपा–त्पापाद्यदि बिभेषि न ॥ ५ ॥ श्रुत्वेति
मौनमाधाय । राजाचालीत्स्वमंदिरं ॥ गछन्नचिंतयन्नूनं । साध्यं सेत्स्यति मे शनैः ॥ ६ ॥ श-
नैर्जगम्यते मार्गे । शनैरेव फलंत्यगाः ॥ शनैः सिद्ध्यंति साध्यानि । भुज्यतेऽपि शनैः शनैः
॥ ७ ॥ शनैर्नानाविधोपायैः । पूर्यतेऽयं मनोरथः ॥ अस्याः पत्यौ परं जीव–त्येतत्कर्तुं न
शक्यते ॥ ८ ॥ यतः—आस्वादितद्विरदशोणितशोणिशोभां । संध्यारुणामिव वनस्थमृगा-
धिपस्य ॥ जृंभाविदारितमुखस्य मुखात्स्फुरंतीं । को हर्तुमिछति नरः परिभूय दंष्ट्रां ॥ ए ॥
तन्मारयाम्युपायेन । कुमारं सारविक्रमं ॥ पश्चादेनां गृहीष्यामि । छलेन च बलेन च ॥
॥ १० ॥ भणितश्च तया स्वामि—प्रायो यत्त्वं न लज्जसे ॥ बंधोरपि हते तस्मि—न्नूनं मा-
मादरिष्यति ॥ ११ ॥ इति क्षितिपतिः पापो । विचार्यानार्यमानसः ॥ कुमारमारणोपायं । प-
श्यन्नेवावतिष्ठते ॥ १२ ॥ अथ सागरदत्तस्य । जीवश्च्युत्वा सुरालयात् ॥ श्रीमन्मदनरेखाया
। उदरांतरवातरत् ॥ १३ ॥ तस्मिन्नेव क्षणे सुता । सा स्वप्नेऽपश्यदंबरात् ॥ संपूर्णं पूर्णिमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चंद्रं । प्रविशंतं मुखांतरे ॥ १४ ॥ तदनंतरमात्मानं । हास्यं कुर्वंतमुच्चकैः ॥ युगबाहुकुमारं च । गायंतं विरसस्वरं ॥ १५ ॥ विलोक्येति प्रबुद्धा सा । जर्तुरग्रे न्यवेदयत् ॥ सोऽपि बुद्ध्या विचार्याह । स्वप्नस्य फलमीदृशं ॥ १६ ॥ जद्रे तव यशोव्यूह—धवलीकृतभूतलः ॥ संपूर्ण-पूर्णिमाचंद्र—सन्निजो जविता सुतः ॥ १७ ॥ अट्टहासकरणात् । किंचिद्दुःखं तवोत्कटं ॥ प्राणांतिकोपसर्गो मे । गानात्संजाव्यते प्रिये ॥ १७ ॥ यतः—हसने रोदनं ब्रूया—ज्ञायने वधबंधने ॥ स्वप्नशास्त्रे यतः प्रोक्त—मेतत्सर्वार्थवेदिजिः ॥ १७ ॥ गुरुदेवनमस्कार—प्र-णिधानादिजिस्ततः ॥ प्रतिहन्यान्महामंत्रै—र्विषमप्युपहन्यते ॥ २० ॥ प्रतिपद्य वचः पत्यु-रुत्थाय स्वाश्रयं गता ॥ युक्ता हर्षविषादाज्यां । सुखं गर्जमुवाह सा ॥ २१ ॥ अथ गर्जानु-जावेन । दोहदो ह्यजायत ॥ नानातीर्थेषु तीर्थेश—वंदने दर्शनेऽर्चने ॥ २२ ॥ प्रियाग्रे तम-जिप्रायं । प्राह सा सोऽपि तत्क्षणं ॥ आहूतजिनदत्तस्तां । गृहीत्वोत्पतितो नजः ॥ २३ ॥ ग-त्वा शत्रुंजये पूर्व—मादिदेवं ननाम सा ॥ पूजां मदनरेखायाः । कारयामास पाणिना ॥ २४ ॥ दृष्ट्वा हृत्सागरोल्लास—चंद्रिकां प्रतिमां प्रजोः ॥ अर्चां विरच्य जक्त्यासौ । चकारेति स्तवं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नवं ॥ २५ ॥ तथाहि—श्रीमान् श्रीआदिनाथः श्रियमिह दिशतु श्रेयसीं भूयसीं वो । बि-
भ्राणः सौरजेयं हृदयमतशिवः शंकरः शंकराजः ॥ सेव्यो भूतैर्विभूत्या परिकलिततनुर्वर्णनी-
यो ह्यदीनै-र्विभ्रद्वर्णं सुवर्णं तुहिनशिखरिणो जाति यः कामजेता ॥ २६ ॥ रंगत्पुण्यलता
मनोज्ञुवि तनूद्यन्मंरूपे रोपिता । शुक्लध्यानजलेन वर्धिततमा श्रेयःफलावाप्तये ॥ कर्णद्वार-
विनिर्गता कचमिषात्त्वस्मिन्न मांतीव सा । यस्य स्कंधयुगे विराजति स वः श्रीमारुदेवः श्रिये
॥ २७ ॥ श्रीआदीश्वर तावकीनविशदप्रासाददंजादयं । धर्मः प्रस्फुरदंचलध्वजभुजेनाकार-
यन्नंगिनः ॥ एवं जल्पति घंटिकारवमिषाच्छत्रुंजयोर्वीधरः । श्रीमत्सिद्धिपुरीगमाय सरलो मा-
र्गोऽयमायात्विह ॥ २८ ॥ सिद्धिक्षेत्रमिति क्षितौ क्षितिधरः ख्यातोऽस्ति शत्रुंजयो । नित्यं
संप्रतिजूपतिस्तुतवतावेतर्हिं किं वर्ण्यते ॥ स्वर्णं स्वोपरि वर्ण्यवर्णमणिजृद्दुग्धं सितासंगतं ।
जव्यं रूपमलंकृतं पुनरहो निःसीमशोजं जवेत् ॥ २९ ॥ धन्ये मे नयने करः शिवकरः पु-
ण्यार्जनैराजनि । प्रज्ञा धन्यतमा ममाद्य समजूद्विज्ञा रसज्ञा च यत् ॥ श्रीशत्रुंजयशैलराज-
मुकुटप्रासादचूडामणे । त्वं देवेश विलोकितोऽसि विनतोऽस्यज्यर्चितोऽसि स्तुतः ॥ ३० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति स्तुत्वा युगादीशं । कुमारः प्रणिपत्य च ॥ उत्पत्य सप्रियोऽचाली-ज्जिनदत्तान्वितस्ततः
॥ ३१ ॥ गत्वा विद्याबलेनाशु । स श्रीरैवतपर्वतं ॥ तत्र नेमिजिनं नत्वा—ऽभ्यर्च्य च स्तु-
तवानिति ॥ ३२ ॥ तथाहि—श्रीनेमिनाथं जिनपं स्तवीम्यहं । सौभाग्यभाग्यप्रतिभाप्रभा-
वहं ॥ राजीमतीरंजनराज्यरंजितं । जितेंद्रियं विष्टपराज्यरंजितं ॥ ३३ ॥ विश्वैकवीरं सम-
रांगणधुर—मनंगमाघात्य समाधिनासिना ॥ नूनं रतिः प्रीतिरिति त्वया विभो । स्त्रसेव-
केभ्यः प्रददे तदंगात् ॥३४॥ त्वयांगजो नाथ हतस्तथापि । यशोऽत्र ते चित्रमिदं महत्तमं ॥
निघ्नन् जनोत्तापकरं निजांगज—मपि प्रभुः कैर्न हि वर्ण्यतेऽथवा ॥ ३५ ॥ राजीमती सा
दयितोग्रसेनजा—ऽक्षिप्तोऽपि मे स्नेह इतो गमिष्यति ॥ एवं विचार्येव विचक्षणाग्रणी—
र्देवान्न चिक्षेप जिनेश तत्र तं ॥ ३६ ॥ एवमादिप्रकारेण।नुत्वा नेमिजिनेश्वरं ॥ उत्पत्याष्टा-
पदं प्राप्तो । नतस्तत्र जिनानपि ॥ ३७ ॥ अष्टापदाचलनरेंद्रकिरीटतुल्या । अष्टापदोपमबलाः
सुविशालनेत्राः ॥ अष्टापदोपरि परिस्थितिकृज्जिनेंद्रा । अष्टापदो मम हरंतु कुकर्मरूपाः ॥
॥ ३८ ॥ संमेतशिखरिस्वर्ण-गिरिनंदीश्वरादिषु ॥ यात्रां संसूत्र्य सर्वत्र । देहे पावित्र्यमु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्वहन् ॥ ३९ ॥ मित्रेण जिनदत्तेन । नार्या मदनरेखया ॥ समं कुमार आयासी–त्सस्संमोदः स्वमंदिरं ॥ ४० ॥ युग्मं ॥ इति प्रियप्रसादेन । संपूर्णोत्तमदोहदा ॥ गर्भेऽर्भकं वहंती सा । निन्ये सुखमनेहसं ॥ ४१ ॥ व्यतीतेष्वष्टमासेषु । वसंततौ समागते ॥ युगबाहुः प्रियायुक्तो । रम्यमुद्यानमासदत् ॥ ४२ ॥ तत्रान्यान्यमनोज्ञवन्यसुमनःश्रेणीः स ह्लन् घनाः । कुर्वाणो मुकुटं स्फुटं विरचयन् केलीगृहं सस्पृहं ॥ क्रीडन् वल्लभया समं समरसैरात्मानमाह्लादयन् । सर्वं वासरमत्यवाहयदसौ सौख्यान्निमेषोपमं ॥ ४३ ॥ अस्तं गते दिवाधीशे । विस्तृते च तमश्चये ॥ अथाल्पपरिवारस्य । गमनं नोचितं मम ॥ ४४ ॥ तदत्रैव वसाम्यद्य । विचिंत्येति कुमारकः ॥ कृत्वा केलिगृहे केलिं । सुष्वाप सुखनिद्रया ॥ ४५ ॥ अथो मनोरथो राजा । छलं नित्यं विलोकयन् ॥ स्थितमल्पपरीवारं । कुमारं ज्ञातवान्निशि ॥ ४६ ॥ अयं ह्यवसरः सारः । कुमारो यदि हन्यते ॥ तमस्तोमवृता रात्रि–रपि मेऽत्र सहायिनी ॥ ४७ ॥ तदिदं साधयाम्यद्य । सद्यो गत्वा वनांतरं ॥ पश्चान्मदनरेखां तां । नोदये निःशंकमानसः ॥ ४८ ॥ एवं विचिंत्य दुष्टात्मा । कृपाणं पाणिना वहन् ॥ निःकृपो नृप आयासी–देकाकी तत्र

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कानने ॥ ४९ ॥ केलिगृहांतिकायातं । नृपतिं रक्षका जगुः ॥ अरे कोऽयं समायाति । ततोऽवादीद्धराधवः ॥ ५० ॥ विज्ञायाल्पपरीवारं । युगबाहुमिहोषितं ॥ आमंत्रयितुमायातो । मनोरथनृपोऽस्म्यहं ॥ ५१ ॥ बांधवोऽयं कुमारस्ये—त्यरुद्धो रक्षकैर्नरैः ॥ अंतः केलीगृहं राजा । प्रविवेश मनोरथः ॥ ५२ ॥ कुमारः सहसोत्थाय । विलोक्य निजमग्रजं ॥ नत्वा पप्रच्छ किं भ्रात—रत्रागमनकारणं ॥ ५३ ॥ रात्रावत्र हि शत्रूणां । कदाचित्प्रभवेद्बलं ॥ त्वामाकारयितुं गेहे । बांधवाहं समागमं ॥ ५४ ॥ उत्तिष्ठोत्तिष्ठ तस्मात्त्वं । गम्यते नगरांतरे ॥ प्रपद्येति वचो भ्रातुः । सनेपथ्यं स्वमाददे ॥ ५५ ॥ आदानव्याकुलस्वांतो । मोहांधीभूतचक्षुषा ॥ कंधरायां हतो राज्ञा । स कृपाणेन निःकृपं ॥ ५६ ॥ धिगहो मोहमाहात्म्यं । यत्तुच्छसुखवांछया ॥ सुस्निग्धबांधवो मुग्धो । नीयते निधनं मुधा ॥ ५७ ॥ विद्युतेवाहतो वृक्षः । कुमारो न्यपतद्भुवि ॥ कृता हाकारपूत्कारा—स्तावन्मदनरेखया ॥ ५८ ॥ निकटस्था भटास्ताव—त्प्राप्ता उत्पाटितासयः ॥ कुर्वन् खेदमिव क्ष्मापो । मायावीति तदावदत् ॥ ५९ ॥ करवालः करालोऽयं । कुमारोपरि मे करात् ॥ अकस्मात्पतितो हाहा । सांप्रतं किं करोम्यहं ॥ ६० ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कपटं नाटयन्नेवं । मनोरथनृपस्ततः ॥ किंचिद्विज्ञातवृत्तांतै–रपानीयत रक्षकैः॥ ६१ ॥ एकेन पुरुषेणाशु।। गत्वा चंद्रयशःपुरः ॥ युगबाहोः स्वरूपं त—स्प्रोक्तं सोऽपि सशोकहृत् ॥ ६२ ॥ वरवैद्यान् समादाय । तदुद्यानं समाययौ॥ वैद्यैश्च जीवनोपाया। बहवोऽपि विनिर्मिताः ॥६३॥ परं प्रहारद्वारेण । रुधिरं निर्ययौ तथा ॥ यथा तस्यानवत्काय–स्तत्क्षणं पूणिकोपमः ॥ ६४ ॥ आसन्नमरणावस्थं । भर्तारं वीक्ष्य दक्षया ॥ कर्णाभ्यर्णं समभ्येत्ये–त्यूचे मदनरेखया ॥६५॥ सम एवात्र संसारे । मृत्युः कातरधीरयोः ॥धीरीभूयैव मर्तव्यं । भूयो न म्रियते यथा ॥६६॥ अर्हंतः शरणं संतु । सिद्धाश्च शरणं मम ॥ साधवः शरणं शुद्धा ।धर्मोऽस्तु शरणं मम ॥६७॥ चतुर्णां शरणं श्रित्वा । सर्वं निंदस्व दुष्कृतं ॥ अनुमोदय स्वपुण्यानि । क्षमयस्वाखिलांगिनः ॥ ६८ ॥ स्वामिन् क्षमां प्रपद्यस्व । मा रोषं कुत्रचित्कृथाः ॥ पूर्वकर्मवशायातं । दुःखमेतत्सहस्व च ॥ ६९ ॥ सुकृतं दुष्कृतं यत्स्यात् । कृतं तस्यानुसारतः ॥ सुखदुःखानि जायंते । हेतुमात्रं नरः पुनः ॥ ७० ॥ सम्यक्त्वं प्रतिपद्यस्व । व्रतान्यंगीकुरुष्व च ॥ भावयन् भावनां चित्ते । स्मर पंचनमस्कृतिं ॥ ७१ ॥ समं पंचनमस्कारैः । प्राणा यस्य व्रजंति सः ॥ कदाचि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्नापवर्गं चेत् । स्वर्गं गह्रति निश्चितं ॥ ७१ ॥ मित्रपुत्रकलत्रादि । शरणं न शरीरिणां ॥ एकस्त्राता जगन्माता । धर्मः श्रीजिनन्नाषितः ॥ ७२ ॥ एवं मदनरेखोक्तं । सर्वं श्रुएवन् कृतांजलिः ॥ समस्तास्तमनःपीरुः । सुधयेवैतया गिरा ॥ ७४ ॥ युगबाहुः शुन्नध्यानं—दत्तबाहुवलंबनं ॥ आरुरोह स निर्मोहः । स्वर्गप्रासादमुन्नतं ॥ ७५ ॥ अथ चंद्रयशाः कुमारकः । पितरं वीक्ष्य परासुमाशु सः ॥ उपलन्नतेस्म विमूर्छनं दृणा—इहदुःखाशनिताकितोऽपतत् ॥ ॥ ७६ ॥ कृतन्नृत्यजनोपजीवनः । स समासादितचेतनस्ततः ॥ सुचिरं कृतरोदनो घनं । विललापेति पितुर्वियोगतः ॥ ७७ ॥ पितरीदृशशक्तिमान् नवान् । कथमासादितवानितः क्षतिं ॥ किमु वा मृगनायको बली । न शृगालेन निहन्यते बलात् ॥ ७८ ॥ तव जीवितमुत्तमं पितः । सुकृतैकाग्रमृतिस्तथान्नवत् ॥ उपकारन्नरेण रंजितः । सकलोऽयं नवता जगज्जनः ॥ ॥७ए॥ जगदेतदभूत्वया विना । सकलं शून्यमहो ममाधुना ॥ अथ वत्सलवाक्यसंचयं । त्वमिवान्यो मयि को वदिष्यति ॥ ८० ॥ कुरुषे गुणिनं जनं कुतः । कुरुषे चेत्किमु हंसि रे विधे ॥ तटिनीतटवालुकाकृता—लयविध्वंसिशिशूपमोऽसि तत् ॥ ८१ ॥ एवमादिप्रकारेण ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विलपत्यंगजे शुचा ॥ शोकाकुलापि मदन—रेखा दध्केत्यचिंतयत् ॥ ७२ ॥ नूनं पापेन भूपे-
न । मदर्थं बांधवो हतः ॥ अथैनं चंद्रयशस—मपि पापी हनिष्यति ॥ ७३ ॥ ततः सर्वस्व
भूतं मे । शीलं मलिनयिष्यति ॥ तन्ममास्मिन्नवस्थानं । स्थानेऽनर्थैककारणं ॥ ७४ ॥ तदि-
तः कुत्रचिद्गत्वा । स्वशीलं पालयाम्यहं ॥ प्रियं प्राणार्थपुत्रेभ्यः । सतीनां शीलमेव हि ॥
॥ ७५ ॥ एवं विचिंत्य शोकार्ता । पुत्रे परिजने च सा ॥ मंदं मंदमविज्ञात—निर्गमा निर्ययौ
ततः ॥ ७६ ॥ स्वभावान्मंथरगति—र्गर्भभाराद्विशेषतः ॥ सा तथापि शीलभंग—भयाद्दी-
र्घतरं ययौ ॥ ७७ ॥ अथो मनोरथो मार्गे । स्वयं पापेन शंकितः ॥ भयभीतो व्रजन् वेगा—
दृष्टो दुष्टाहिना क्वचित् ॥ ७८ ॥ मूर्छितः पतितः पृथ्व्या—मेकाकी करुणं रटन् ॥ साक्रंदं पी-
डया मृत्वा । चतुर्थं नरकं ययौ ॥ ७९ ॥ शृगालैस्तस्य देहोऽपि । रात्रौ तत्रेत्य भक्षितः ॥
उत्कृष्टपुण्यपापानां । फलं तत्क्षणमेव हि ॥ ८० ॥ प्रभातावसरे सर्वै—र्मिलित्वा राजपूरुषैः
॥ विधिना देहसंस्कारो । युगबाहोर्विनिर्ममे ॥ ८१ ॥ दृष्ट्वा मनोरथस्यापि । देहखंडानि का-
निचित् ॥ तं परासुं विदांचक्रुः । सर्वे सामंतमंत्रिणः ॥ ८२ ॥ पुत्रो मदनरेखाया । राज्य-

नारधुरंधरः ॥ तैश्चंद्राजयशाश्चंद्र—यशा राज्ये निवेशितः ॥ ए३ ॥ इतश्च मदनरेखा । व्र-
जंती तीव्रवेगतः ॥ मानुगम्य स पापीयान् । संगृह्णात्विति जीतितः ॥ ए४ ॥ विलोक्यास्म
महासत्या । गमनं डुःकरं पथि ॥ तमसीति विचार्यैवो—दियाय दिननायकः ॥ ए५ ॥ चलं-
ती पादचारेण । स्खलंतीव पदे पदे ॥ वात्येव न क्वचित्तस्थौ । शीलजंगजयेन सा ॥ए६॥ क-
रैरुष्णकरस्योष्णै—रूर्ध्वं चाधो नखंपचैः ॥ वेलुकानिचयैरंतः—पुटपाकमिवाप सा ॥ ए७ ॥
अपि मित्राण्यमित्राः स्यु—रापद्येतदृतं वचः ॥ मित्रेणापि व्रजंती सा । पथि संतापिता नृशं॥
॥ ए८ ॥ सातपेनापि संतप्ता । व्याप्ता च तृषया क्षुधा ॥ एकं तमागमद्राक्षी—दाम्रवृक्षा-
नुवेष्टितं ॥ एए ॥ प्रक्षाल्य वदनं तत्र । जलं पीत्वा च शीतलं ॥ फलैश्च विहिताहारा ।
तस्थावेकतरोस्तले ॥४००॥ ततः सा साकारप्रत्या—ख्यानं चेतस्यचिंतयत् ॥ डुर्विज्ञेया विचि-
त्रा च । जीवानां कर्मणां गतिः ॥ १ ॥ जवांतराणि चत्वारि । प्रोचे शासनदेवता ॥ जयमं-
गलजीवोऽयं । तत्रावादि मनोरथः ॥ २ ॥ जवांतरेऽपि मय्यासी—द्देष रागी मया पुनः ॥ वि-
ज्ञाय तदजिप्रायं । पुरः पत्युर्निवेदितं ॥ ३ ॥ अमार्यः शत्रुरिति तं । त्यक्त्वा सोऽप्याश्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यांतरं ॥ तामादाय ययौ तस्मा–त्साधुबुद्धिं तदा व्यथां ॥ ४ ॥ भवांतरानुरागेण । मय्यरज्यत नृपतिः ॥ आविश्चकार च रहो । मनोऽभिप्रायमात्मनः ॥ ५ ॥ बंध्वोर्मास्म विरोधोऽभू–दिति निर्भाग्यया मया ॥ कुबुद्ध्या न च तस्योक्तं । स्वरूपं स्वपतेः पुरः ॥ ६ ॥ आकाशगामिनीविद्या–शक्तिमांस्तादृशः पुमान् ॥ स्वरूपे विदिते तेन । नैव पापेन हन्यते ॥ ७ ॥ यद्येवमकथयिष्यं । विरोधं मा कृथाः प्रभो ॥ भवांतर इव क्लेश–करं स्थानमिदं त्यज ॥ ८ ॥ अकरिष्यत्स शुद्धात्मा । स्त्रिया अपि वचो मम ॥ उक्ते हितेऽत्र नो धीमा—न्न त्वत्कारमपेक्षते ॥ ९ ॥ अहमेवाभवं मूढा । परं निर्भाग्यशेखरा ॥ अथवा लंघ्यते केन । दुर्लंघ्या भवितव्यता ॥ १० ॥ धिग्मे रूपमिदं स्वामि—मारणानर्थकारणं ॥ धन्यास्ते येन जायंते । कर्मबंधनिबंधनं ॥११॥ ध्यायंतीं चिरमित्यादि । शोकव्याकुलमानसां ॥ अशकन्निव तां द्रष्टुं । । रविरस्तं ययौ तदा ॥ १२ ॥ निद्रां मदनरेखाप्य । क्षणं श्रांता घनाध्वना ॥ सिंहव्याघ्रादिबूत्कारै—र्जजागारं भयातुरा ॥ १३ ॥ पूर्वा दिगिव मार्तंडं । रत्नं रोहणभूरिव ॥ सुखेन सुषुवे सूनुं । सार्धरात्रौ शुभप्रभं ॥ १४ ॥ निस्सीमोत्तमविद्रुमोपमकरं नेत्रांबुजोल्लासकं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सर्वाशाप्रसरत्प्रत्नापरिगतं सन्नंदनं नंदनं ॥ तत्स्वांतांतरवर्तिदुःखतमसो विध्वंसनायोत्सुकं ।
रात्रावप्युदितं दिनेशमिव सा दृष्ट्वा प्रहृष्टाजनि ॥ १५ ॥ आगत्य वनदेवीभिः । सूतिकर्म
विनिर्ममे ॥ देवाः कर्मकरा नूनं । भवेयुः पुण्यकारिणां ॥ १६ ॥ अंतरंगे बहिःस्थे च । नष्टे
तमसि किं मया ॥ इतीव नंदनालोक—मुदोऽस्या अगमत्तमी ॥ १७ ॥ तया सूतं सुतं दृष्ट्वा
। प्रत्नाद्योतितदिक्तटं ॥ स्पर्धयेव हरित्पूर्वा । सुषुवे तीक्ष्णदीधितिं ॥ १८ ॥ प्रातः सरोवरं
गत्वा । प्रक्षाल्य वसनानि सा ॥ यावद्धावति देहं स्वं । धावतिस्म तदामहान् ॥ १९ ॥ एको
जलगजेंद्रो द्राक् । निर्गत्योच्चैःशुंडया ॥ तां पद्मिनीमिवोत्पाट्यो—च्छालयामास लीलया ॥
॥ २० ॥ प्रियं दृष्टुमिवोर्ध्वं सा । व्रजंती गगनांगणे ॥ दृष्टा विद्याभृतैकेन । समागत्यांतरा
धृता ॥ २१ ॥ समानीय विमानांतः । स्थापिता साप्यचिंतयत् ॥ धिग्विधे त्वां यद्विधेयं ।
दुःखमेवोत्तरोत्तरं ॥ २२ ॥ मृते पत्यौ सुतं दृष्ट्वा । हृष्टाभूवं किमप्यहं ॥ दैवैतदपि सोढं न ।
त्वया निःकारणारिणा ॥ २३ ॥ दीनानना विचिंत्येति । विद्याधरमुवाच सा ॥ बलाज्जलगजो-
त्क्षिप्ता । विधृता भवतांतरे ॥ २४ ॥ सुकुमालः स बालो मा । शृगालादिभिरद्यते ॥ जात-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मात्रो विना मात्रा । कथं जीवति बालकः ॥ २५ ॥ तन्मां मुंच सुतोपांते—तराहं यत्त्वया धृता ॥ तन्मह्यं जीवितं दत्तं । पुत्रभिक्षां प्रदेह्यथ ॥ २६ ॥ पश्यन्ननन्यसामान्य—रूपां तां च स मोहितः ॥ ऊचे सर्वं करिष्यामि । चेत्पतिं मां प्रपद्यसे ॥ २७ ॥ पुत्रोऽहं मणिचूडस्य । सर्वविद्याधराधिपः ॥ मणिप्रभाभिधो गन्त—ऽस्मि नंदीश्वरेऽधुना ॥ २८ ॥ तत्रोपात्तव्रतस्तात—स्तपस्यति निरंतरं ॥ तस्याथ वरिवस्यायै । नमस्यायै च याम्यहं ॥ २९ ॥ श्रेणिद्वयाधिनाथं मां । रत्नाकरपुरेश्वरं ॥ प्रतिपद्यस्व भर्तारं । भव त्वं खेचरेश्वरी ॥ ३० ॥ सतीमतल्लिका सैवं । शीलभंगकरं वचः ॥ श्रवसा दुःश्रवं श्रुत्वा । चिंतयामास चेतसि ॥ ३१ ॥ मनोरथादहं नष्टा । पतितास्य पुनः करे ॥ पलाय्य व्याघ्रतः सिंह—मुखे निपतनं ह्यदः ॥ ३२ ॥ धिङ्मे रूपमिदं स्थाने । स्थानेऽनर्थैककारणं ॥ परमावर्ज्य साम्नेन । पुत्रसारां करोम्यहं ॥ ॥ ३३ ॥ इति ध्यात्वावदद्भद्र । जातमात्रो मया सुतः ॥ मुक्तोऽस्ति कानने रौद्रे । तस्याधारो न कश्चन ॥ ३४ ॥ चित्ते तद्विरहार्त्ताया । मम नायाति किंचन ॥ मेलयादौ सुतं पश्चा—त्करिष्यामि त्वदीहितं ॥३५॥ हर्षोल्लसितचित्तः स । विद्याभृदप्यभाषत ॥ प्रज्ञप्तीदेवताख्या-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्मे । त्वत्पुत्रोदंतमादितः ॥३६॥ मिथिलानगरीशेन । राज्ञा पद्मरथेन सः ॥ त्वत्पुत्रो दुर्दमा-
श्वेन । हृतेनादर्शि कानने ॥ ३७ ॥ अत्यंतोत्पन्नसौहार्द—स्तं समादाय बालकं ॥ आलिलिं-
ग मुहुर्वक्त्रे । चुचुंब मुमुदेऽपि च ॥ ३८ ॥ अन्वागतेन सैन्येन । समं स्वपुरमाप्य सः ॥
प्रियायै पुष्पमालायै । ददौ साप्याप संमदं ॥ ३९ ॥ प्राप्ते ताभ्यामपुत्राभ्यां । तादृग्गुणगणैं-
गजे ॥ यो हर्षो ऽव्यापि तं वित्त—स्तच्चिते ज्ञानिनोऽथवा ॥ ४० ॥ मेरौ कल्पद्रुवत्तुक्क—प-
क्षे वार्धिरिवोल्बणः ॥ वर्धमानोऽस्ति पुत्रस्ते । तच्चिंतां मा कृथा वृथा ॥ ४१ ॥ निश्चिंतीभूय
जद्देऽथ । प्रतिपद्यस्व मां पतिं ॥ ततो नंदीश्वराद्येषु । तीर्थयात्राविधानतः ॥ ४२ ॥ धर्ममर्थं
च कामं च । लभमाना निरंतरं ॥ मनुष्यजन्मसाफल्यं । त्वं विधेहि विचक्षणे ॥ ४३ ॥
श्रुत्वेति मदनरेखा । चिंतयामास हा मया ॥ किं कार्यमथवा कुर्वे—ऽधुना कालविलंबनं ॥
॥ ४४ ॥ ध्यात्वेति सावदज्जद्द । श्रीमन्नंदीश्वरादिषु ॥ यात्रां कारय मेऽवश्यं । करिष्येऽभी-
प्सितं ततः ॥ ४५ ॥ पुत्रं मदनरेखायां । विज्ञायासक्तमानसं ॥ प्रारेभे देशनां साधुः । का-
मवृक्षकुठारिकां ॥ ४६ ॥ यस्य चित्ते सुखाकांक्षा । तात्विकी स न सेवते ॥ आसक्त्या वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षयान् यस्मा—दायतौ तेऽतिदुःखदाः ॥ ४७ ॥ कामतृष्णामपाकर्तुं । यः स्त्रीसंगेन कांक्षति ॥ तृषां शशमिषुस्तस—त्रपुपानात्स मूढधीः ॥ ४८ ॥ अंगनासंगमस्त्याज्यो । विशुद्धात्मभिरंगिभिः ॥ विशेषेण परस्त्रीणां । संगरंगं करोति कः ॥ ४९ ॥ नरकादिगतिद्वारं । वधबंधनिबंधनं ॥ परांगनापरिष्वंगं । वर्जयेद्धर्यचेतनः ॥५०॥ विशेषेण सतीनां यः । शीलभंगं चिकीर्षति ॥ विनश्यत्येव सोऽवश्यं । दशानन इवाचिरात् ॥ ५१ ॥ इमां कामयसे कामा—तुरो वत्स मणिप्रभ ॥ परं नायमभिप्राय । आयतौ ते सुखायते ॥ ५२ ॥ शक्तः शक्रोऽपि नो कर्तुं । सतीनां शीलखंडनं ॥ अधोधो याति वांछोत्थ—पापभारेण केवलं ॥ ५३ ॥ व्रज दूरं नरकांतात् । सतामगम्याध्ध्रुवं पथो ह्यस्मात् ॥ व्यावर्तय कुशलेप्सु—र्यदि वत्स मनोरथं सौवं ॥ ५४ ॥ इति साधुवचःसाधु—सुधामापिबतः संतः ॥ रागोरगविषावेगो । व्यरमत्तस्य तत्क्षणं ॥ ५६ ॥ उन्मीलितविवेकाक्षः । प्रकटीभूतचेतनः ॥ उत्थाय मदनरेखां । नत्वा क्षमयतिस्म सः ॥ ५७ ॥ यदयुक्तं मयोक्तं ते । तत्क्षमस्व क्षमापरे ॥ अद्यप्रभृति मेऽसि त्वं । जननीभगिनीसमा ॥ ५८ ॥ अथो पप्रछ सा साधुं । भगवन्मम नंदनौ ॥ उत्तमौ वाधमौ जी-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

नौ । ततो मुनिरभाषत ॥ ५९ ॥ गुणचंद्रो गुणधर । इत्यास्तां द्वौ सहोदरौ ॥ गुणश्रीगुणमा-
लाख्ये । जाते भार्ये तयोः शुभे ॥ ६० ॥ भवे द्वितीये चत्वारो—ऽप्यासन् देवास्त्रिविष्टपे ॥
तृतीयेऽथ पुष्पसिंह—रत्नसिंहौ महौजसौ ॥ ६१ ॥ तत्प्रिये कुसुममाला । तथा च वनसुं-
दरी ॥ चत्वारोऽपि चतुर्थेऽथ । देवलोकेऽभवन् सुराः ॥ ६२ ॥ सागरदेवसागर—दत्ताख्यौ पं-
चमे भवे ॥ चंद्रमतीभानुमत्यौ । जाते तद्वल्लभे शुभे ॥ ६३ ॥ षष्ठे भवेऽभवन् सर्वे । सुप-
र्वाणः सुरालये ॥ तेषु सागरदेवस्य । जीवः पद्मरथोऽजनि ॥ ६४ ॥ जज्ञे चंद्रमतीजीवः । पु-
ष्पमालेति तत्प्रिया ॥ तथा भानुमतीजीवः । सुतश्चंद्रयशास्तव ॥ ६५ ॥ जीवः सागरदत्त-
स्य । द्वितीयस्तनयस्तव ॥ तं विलोक्य वने पद्म—रथो हर्षं परं ययौ ॥ ६६ ॥ पूर्वषड्भवरा-
गेण । स आदाय ययौ गृहं ॥ वर्धते पाल्यमानोऽसौ । सांप्रतं पुष्पमालया ॥ ६७ ॥ अस्मि-
न्नेव भवे जीवा—श्चत्वारोऽमी स्वकर्मणां ॥ क्षयं कृत्वा गमिष्यंति । मोक्षमक्षयसौख्यदं ॥
॥ ६८ ॥ उक्त्वैवं विरते साधौ । विमानं तत्र पुष्करात् ॥ सद्दीप्त्यवततारैक—मेकस्तस्मात्सु-
रोत्तमः ॥ ६९ ॥ निर्गत्य मदनरेखां । प्रदत्तत्रिप्रदक्षिणः ॥ प्रणनाम महाभक्त्या । मणिचूड-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मुनिं ततः ॥ ७० ॥ तद् दृष्ट्वा विस्मितस्वांत—स्तमवोचन्मणिप्रभः ॥ विबुद्धा अपि मुह्यंति ।
कदाचिदिति निश्चितं ॥ ७१ ॥ विबुधेषूत्तमेनापि । यत्त्वयासौ नमस्कृता ॥ आदौ मदनरे-
खात्री—मात्रमुल्लंघ्य सन्मुनिं ॥ ७२ ॥ असौ सत्युत्तमेत्यस्मा—न्न पुनर्मुनिपुंगवात् ॥ सूर्या-
धिकप्रकाशा स्या—न्निर्मलापि न चंद्रिका ॥ ७३ ॥ देवोऽवददिदं जद्र । सत्यं परमियं मम
॥ धर्माचार्योऽजवत्तस्मा—न्माननीया मुनेरपि ॥ ७४ ॥ तथाहि श्रृणु वृत्तांतं । सुदर्शनपुरे-
श्वरौ ॥ मनोरथयुगबाहु—नामानौ द्वौ सहोदरौ ॥ ७५ ॥ हेतोः कुतोऽप्यनिर्वाच्यात् । ख-
ड्गेनानुजमग्रजः ॥ जघान घनदुर्ध्यानः । स पपात च भूतले ॥ ७६ ॥ युगबाहुर्महापीमा—
जातरोषः पतन्नपि ॥ नरकांधेऽनया सत्या । सद्वचोरज्जुनोद्धृतः ॥ ७७ ॥ अस्या वचनपीयूष
—यूषमास्वादयन् रसात् ॥ स मृतः पंचमे कल्पे—ऽजवदिंद्रसमः सुरः ॥ ७८ ॥ विद्याधर स
एवाहं । देवः सेयं महासती । विद्याधरे ध्यायतीति । देवोऽवादीन्महासतीं ॥ ७९ ॥ जद्रे
यद्रोचते तुभ्यं । कार्यं तन्मे समादिश ॥ तयोक्तं मम पर्याप्त—मन्येनाप्तो यदा जिनः ॥
॥ ८० ॥ तथापि मम हर्षाय । वद किंचित्प्रयोजनं ॥ देवेनेत्युदितेऽवादी—न्महासतीमत-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

ल्लिका ॥ ८१ ॥ एवं चेन्नय मां भद्र । मिथिलां नगरीं यथा ॥ तत्र पुत्रमुखं दृष्ट्वा । प्रव्रज्या माश्रयाम्यहं ॥ ८२ ॥ एवमस्त्विति जल्पित्वा । नत्वा मुनिवरं च तां ॥ स्वविमाने समारोप्य । स सुरः प्राचलत्ततः ॥ ८३ ॥ क्षणात् श्रीमिथिलापुर्यां । मल्लिनाथजिनेशितुः ॥ मंदिरे मंदरादुच्चै–स्तरेऽवातरदंबरात् ॥ ८४ ॥ जन्मनिष्क्रमणज्ञान–स्थानं मल्लेर्नमेस्तथा ॥ इति सा परमप्राप्त—प्रमोदाऽपूजयज्जिनान् ॥ ८६ ॥ अत्रांतरे समायासी–द्देववंदनहेतवे ॥ तत्र संवेगमालाख्या । साध्वीयुक्ता महत्तरा ॥ ८७ ॥ सा महत्तरया भक्त्या । नता मदनरेखया ॥ समं तया समायाता । गणिनी स्वमुपाश्रयं ॥ ८८ ॥ सतीमतल्लिका साथ । क्रमान्नत्वा महासतीः ॥ सर्वा महत्तरापार्श्वे । समेत्योपाविशत्ततः ॥ ८९ ॥ धर्मोपदेशयोग्यां तां । ज्ञात्वा संवेगशालिनीं ॥ संवेगमाला प्रारेभे । देशनां पापनाशनीं ॥ ९० ॥ जीवोऽनादिरयं भ्रमत्यविरतं संसारपारांनिधौ । नानाताडनपीडनाद्यनुभवद्दुःकर्मवातेरितः ॥ तावद्यावदिदं कृपापरहृदा निर्यामकेणाहृतं । तीर्थेशेन न संश्रयेत्प्रवहणं श्रीजैनधर्माभिधं ॥ ९१ ॥ अगाधदुःखावलीपंकपूर्णे । निःसारसंसारसरस्यशेषे ॥ अत्यल्पमात्रोपरिमात्रदृशं । नेच्छंति दक्षा विष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यांबु पातुं ॥ ए२ ॥ मोहो नैव विधातव्यो । जव्यैः संसारकारणं ॥ संबंधान् विदधे सर्वान् जीवः सर्वांगिन्निः सह ॥ ए३ ॥ तदत्र कुत्र पुत्रादि——प्रतिबंधो विधीयते ॥ इत्याद्युपदेशात्सा । बुध्यतेस्म विशेषतः ॥ ए४ ॥ दुःकर्मनिर्जराहेतुं । प्रव्रज्यां लातुमुद्यतां ॥ निर्जरोऽवदद् दागच्छ । पुत्रास्यं दर्शयामि ते ॥ ए५ ॥ तयोक्तमथ मे पूर्णं । पुत्रालोकेन सांप्रतं ॥ स्वसाध्यं साधयिष्यामि । प्रव्रज्याश्रयणादहं ॥ ए६ ॥ त्वमत्रानयनाज्जातो । महोपकृतिकृन्मम ॥ अथ स्वस्थानकं याहि । कुर्याः सम्यक्त्वमुज्ज्वलं ॥ ए७ ॥ तयैवमुदितो देवो । मुदितश्रीमहत्तरां नत्वा मदनरेखां च । देवलोकं निजं ययौ ॥ ए८ ॥ प्रकाशितस्ववृत्तांता । नितांतानंदितांतरा ॥ दीक्षां महत्तरापार्श्वे । ललौ सा लोलतोज्झिता ॥ एए ॥ गृह्णंती द्विविधां शिक्षां । चारित्राचारतत्परा ॥ विजहार महीपीठे । श्रीमहत्तरया सह ॥ ५०० ॥ इतश्च मिथिलेशस्य । राज्ञः पद्मरथस्य सः ॥ मंदिरे पालितः पंच—धात्रीन्निर्वर्धते शिशुः ॥ १ ॥ तदागमाद्दुर्दमा ये । दुर्गमा ये च भूभुजः ॥ ते सर्वे स्वयमागत्य । नेमुः पद्मरथं नृपं ॥ २ ॥ ततोऽतिसंतोषितमार्गणव्रजं । सुविस्मयस्मेरितविष्टपप्रजं ॥ कृत्वोत्सवं तस्य शिशोर्नरेश्वरो । नामान्निरामं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नमिरित्यदान्मुदा ॥ ३ ॥ कल्पद्रुवन्मेरुगिरौ सुरत्तं । खनात्रिवासादितवृद्धिरुच्चैः ॥ अत्यल्प-
कालात्सकलाः कलाः स । गृह्णन्नमिर्यौवनमाससाद ॥ ४ ॥ इक्ष्वाकुवंशोद्भवकन्यकाना-मष्टो-
त्तरं चारुतरं सहस्रं । समं कुमारेण महैर्गरिष्ठै-र्विवाहितं पद्मरथेन राज्ञा ॥ ५ ॥ अथा-
न्यदा पद्मरथ—नृपतातो महामुनिः ॥ जयसेनस्तत्र पुत्र—प्रबोधाय समागमत् ॥ ६ ॥ नं-
तुं तातं समायातो । राजापि सपरिच्छदः ॥ मुनीश्वरः सुधादेश्यां । देशनां तत्पुरोऽकरोत् ॥
॥ ७ ॥ संसारकूपे विषयादिसौख्य—मास्वादयंतो मधुबिंदुतुल्यं ॥ तिष्ठंति निश्चिंतहृदो ज-
ना ये । तेऽनंतदुःखान्यचिराल्लभंते ॥ ८ ॥ विगाह्य राज्यांबुनिधिं सुखाढ्यै—श्वर्यादिरत्नान्य-
चिराद् गृहीत्वा ॥ ये संयमं पोतमिवाश्रयंते । तरंति ते लोलधियो ब्रुडंति ॥ ९ ॥ इत्यादि-
साधुवचनैः । प्रतिबुद्धमना नमिं ॥ राज्येऽभिषिच्य जग्राह । तातांते संयमं नृपः ॥ १० ॥
पुष्पमालापि शिष्याय । संयमं भूभुजा समं ॥ विजहतुर्महीपृष्ठे । ध्वस्तमोहावुभावपि ॥
॥ ११ ॥ घातिकर्म क्षयं कृत्वा । प्राप्य केवलमुज्ज्वलं ॥ प्रतिबोध्यानेकलोका—नीयतुर्दंपती
शिवं ॥ १२ ॥ न्यायेन पालयन् राज्यं । प्रतापाक्रांतभूतलः ॥ बुभुजे विषयान्नाना—विधा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नमिनरेश्वरः ॥ १३ ॥ अन्यदा क्षीरडिंडीर—पिंडपांडुरदीधितिः ॥ चतुर्दंतो गिरींद्रोच्च—श्रृंचद्भक्षणलक्षितः ॥ १४ ॥ विशालहस्तिशालायां । अलंकारः शुभाकृतिः ॥ श्रीमन्नमिनरेंद्रस्य । मदोन्मत्तो गजोऽजनि ॥ १५ ॥ युग्मं ॥ आलानस्तंभमुन्मूल्य । मूलतः प्राचलत्पुरात् ॥ नटैरस्खलितगति—र्वेगवांस्तीव्रवातवत् ॥ १६ ॥ व्रजन् जवेन हस्तींद्रो । द्रागतीत्य स निवृतिं ॥ विदेहाख्यं ययौ चंद्र—यशसो देशमुल्बणं ॥ १७ ॥ चिराक्रांतमदः किंचित्सुदर्शनपुरांतिके ॥ चरन् दृष्टो नरैरेत्य । तैरुक्तं भूभुजः पुरः ॥ १८ ॥ राज्ञापि चंद्रयशसा । तत्क्षणं हृष्टचेतसा ॥ एत्य स्वयं वशीकृत्य । हस्ती नीतः स्वमंदिरे ॥ १९ ॥ तदालये विलोक्यैनं । कुंजरानुचराश्वराः ॥ आगत्य नमिराजस्य । पुर एवं व्यजिज्ञपन् ॥ २० ॥ राजंस्तव श्वेतदंती । चतुर्दंत इतो गतः ॥ श्रीचंद्रयशसो राज्ञो—ऽलंकरोत्यधुनालयं ॥ २१ ॥ तत्कालं नमिभूपालः । स्ववाचा वाचिकार्पणं ॥ कृत्वा प्रैषीन्निजं दूतं । श्रीचंद्रयशसोंतिके ॥ २२ ॥ स गत्वा तत्र भूपाल—सभायां निर्भयोऽवदत् ॥ राजंस्तवेदमादिष्टं । स्पष्टं नमिनरेंद्रुना ॥ २३ ॥ यदितो निर्गतो हस्ती । मदीयस्तव मंदिरे ॥ तिष्टन् श्रुतः स च प्रेष्य—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्त्वया न्यायानुवर्तिना ॥ २४ ॥ अथ चंद्रयशाः प्राह । किमेतद् दूत जल्पसि ॥ रत्नभूतानि वस्तूनि । कस्य सत्कानि संति किं ॥ २५ ॥ यत्र पश्यंति कल्याणं । गुणिनं च धराधवं ॥ तत्रैवायांति रत्नानि । याञ्चया नो बलान्न च ॥ २६ ॥ यथा तपनराजस्य । मंदिरे मित्रकुंजरः ॥ स्वयनेव समायात—स्तथायं मद्गृहेऽधुना ॥ २७ ॥ राज्यवृद्धिकरं हस्ति—रत्नं स्वयमुपस्थितं ॥ कथं पश्चात्प्रदास्यामि । पूर्णं पुण्यमिवोज्ज्वलं ॥ २८ ॥ न्यायोऽत्र हीयते नैव । ममैनं रक्षतः सतः ॥ स्वयं तद्देशमायातो । यदसौ ध्रियते मया ॥ २९ ॥ अथवा किमु युक्तोक्त्या । किं वा न्यायनिरूपणैः ॥ युज्यते बलमेवैकं । तत्साध्यं ह्यखिलं जगत् ॥ ३० ॥ दूत ते वर्तते राज्ञो । नाम किंचन चेद्बलं ॥ स तर्ह्यायातु सन्नह्य । गृह्णातु च निजं गजं ॥ ३१ ॥ ततो दूतोऽवदद् नृप । जम्रूपो भवान्ननु ॥ नमिराज्ञो न जानासि । बलमैंद्रमिवाधिकं ॥ ३२ ॥ कंबलं परिधायाद्रि—कंदरासु दरातुराः ॥ शेरते वैरिभूपाला । यस्य शश्वतरौजसः ॥ ३३ ॥ तृणमात्रं बलात्तस्य । रक्षितुं कः क्षमः क्षितौ ॥ न्यायार्थं ज्ञापितोऽसीदं । याञ्चेयं न पुनस्त्वयि ॥ ३४ ॥ शृणु चंद्रयशो राजन् । हितमेतन्मयोच्यते ॥ यस्याका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रात्त्र हुंकारा-रक्षुन्यंत्येव सुरासुराः ॥ ३५ ॥ राज्ञा कटाक्षितं तेन । शस्तं वस्तु प्रदीयते ॥
स्वकीयमपि किं वाच्यं । तस्यैव वस्तुनोऽर्पणे ॥ ३६ ॥ परकीयं परं वस्तु । दृष्ट्वा नृप न मु-
ह्यते ॥ गृह्यते नैव यो मूढ—स्तथा कुर्यात्स मुह्यति ॥ ३७ ॥ एकस्य कुंजरस्यार्थे । स्वराज्य-
मिदमद्भुतं ॥ किं हारयस्यहंकारा-त्कुबुद्धिर्न विधीयते ॥ ३८ ॥ वदंतं दूतमित्यादि—प्र-
कारेण गुणोद्भवणं ॥ नृपश्चंद्रयशाः प्राह । किंचित्कुपितमानसः ॥ ३९ ॥ पशुमात्रं गजं धर्तुं
। यो न शक्तः ससैन्यकः ॥ तस्य विज्ञातवीर्यस्य । श्लाघां किं कुरुषे मुधा ॥ ४० ॥ याहि
शिक्षा इमाः सर्वा । देहि स्वस्वामिनः पुरः ॥ एवं तिरस्कृतो दूतः । स रोषान्निरगात्ततः ॥
॥ ४१ ॥ स एत्य द्विगुणीकृत्य । कृत्यविन्नृपतेः पुरः ॥ न्यरूपयत्स्वप्रयाण-ढक्कामयमदापयत्
॥ ४२ ॥ रंगेण चतुरंगेण । बलेनाथ परीवृतः ॥ प्राचलन्मिथिलानाथः । शत्रून्माथकरः पु-
रात् ॥ ४३ ॥ क्षोभयन्नखिलक्षोणी—धरान् क्षोणीं च कंपयन् ॥ उद्भ्रांतसागरश्रीक—श्च-
लन्नमिनृपो बभौ ॥ ४४ ॥ तमायांतं समाकर्ण्य । सन्नह्य सबलो द्रुधा ॥ चंद्रोज्ज्वलयशाश्चं-
द्र-यशा अभ्येतुमुद्यतः ॥ ४५ ॥ ससैन्यो दैन्यनिर्मुक्तो । निर्गत्य नगरान्नृपः ॥ आकर्णयत्स-व

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कर्णाज्या–मिति कस्यापि नाषितं ॥ ४६ ॥ किमेवं यासि साटोपं । प्रयासोऽयं निरर्थकः ॥ सुखं तिष्टाश्रयं श्रित्वा । नव्यं नावि तथा च ते ॥ ४७ ॥ श्रुत्वैवं राज्ञि साशंके । विचारपरमानसे ॥ अन्यदुर्मत्रिणः स्वामि–न्न गंतव्यमितस्त्वया ॥ ४० ॥ व्याघृत्य स्वालयं गत्वा । मेलयित्वाखिलं बलं ॥ डुर्गरोधस्य सामग्रीं । समग्रां कारय प्रजो ॥ ४ए ॥ विज्ञोऽनुमन्य मान्यानां । मंत्रिणामिति सन्मतिं ॥ स्थित्वा पुरांतरेऽकार्षी–त्तृणधान्यादिसंग्रहं ॥५०॥ प्रयोजकानां वस्तूनां । कृत्वा संचयमक्षयं ॥ सुखं चंद्रयशास्तस्थौ । पुरे पिहितगोपुरे ॥ ५१ ॥ अविछिन्नप्रयाणेना–गछन्नमिनराधिपः ॥ सुदर्शनपुरेऽद्राक्षीद् । दुर्गरोधं विरोधतः ॥ ५२ ॥ उछलछस्त्रकल्लोलै–र्दुर्गं सैन्यैः समंततः ॥ वेष्टयित्वा नमिस्तस्थौ । द्वीपमब्धिरिवांबुनिः ॥ ॥ ५३ ॥ प्राकारसंस्थितानेक–सुनटैः सह दुस्सहं ॥ प्रत्यहं ढौकते युद्धं । विधातुं नमिरुद्धतः ॥ ५४ ॥ अयं व्यतिकरः सर्वः । श्रुतो मदनरेखया ॥ साचिंतयत्कृपावारि–पूर्णमानसमानसा ॥५५॥ हाहा सहोदरावेतौ । बद्धसंधौ परस्परं ॥ अज्ञानाद्विदधानौ स्तः । कथं युद्धमिहाधुना ॥ ५६ ॥ मत्त उत्पत्तिमासाद्य । ब्रमतां मा चिरादसौ ॥ अज्ञानात्संगरं कृत्वा ।

श्री. कै. श्री. कोबा

P.P. Ac. Gunratnasuri M.S.                    Jun Gun Aaradhak Trust

संसारे क्षणभंगुरे ॥ ५७ ॥ तद्बोधयामि गत्वाह—मित्यभिप्रायमात्मनः ॥ महत्तरापुरः सर्वं ।
यतिन्याविश्चकार सा ॥ ५८ ॥ सापि दृष्ट्वा महद्भावं । तत्र ज्ञानोपयोगतः ॥ अदादाज्ञां
महासत्यै । जनन्यै नृपयोर्द्वयोः ॥ ५९ ॥ एकां साध्वीं सहादाय । प्राप्ताज्ञा प्राचलत्ततः ॥
क्रमान्मदनरेखा सा । नमिसैन्यांतरागमत् ॥ ६० ॥ दृष्ट्वा ससंभ्रमोत्थान—पूर्वं दत्तशुभासनः
॥ नमिर्भक्त्या नमस्कृत्य । साध्वीपुर उपाविशत् ॥ ६१ ॥ प्रसादोऽयं मयि महा—नथ कार्यं
समादिश ॥ भक्त्या राज्ञेति विज्ञप्ते । साध्वी वक्तुं प्रचक्रमे ॥ ६२ ॥ धर्माद्राज्यं सुखं धर्मा
—द्धर्मादेव श्रियो बलं ॥ यत्किंचित्सुंदरं लोके । तद्धर्मस्याखिलं फलं ॥ ६३ ॥ आराधितो-
ऽर्थितकरो । विराद्धोऽत्यंतदुःखदः ॥ आराध्योऽयं विराध्यो नो । सुस्वामीव विचक्षणैः ॥६४॥
स च धर्मो दयामूलः । सर्वज्ञैः प्रतिपादितः ॥ स उच्छिन्नस्तदुच्छेदे । छिन्ने मूलइव द्रुमः ॥
॥ ६५ ॥ तद्धर्मरक्षणोपायं । कृपां कृत्वा नरेश्वर ॥ मुंचेमं जंतुसंघात—निर्घातकरणं रणं ॥
॥ ६६ ॥ किं चायं ते बृहद् भ्राता । नृपश्चंद्रयशा भवेत् ॥ तेनैवं युद्धसंरंभं । कुर्वतो दूषणं
महत् ॥ ६७ ॥ सविस्मयमना एत—दाकर्ण्य नृपतिर्जगौ ॥ साध्वीं चंद्रयशा एष । बृहद् भ्राता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथं मम ॥ ६८ ॥ ततस्तया समग्रोऽसौ । वृत्तांतो नृपतेः पुरः । निरूपितः सहर्षोऽसौ । तां ववंदे मुहुर्मुहुः ॥ ६९ ॥ ऊचे च मातरेतद्य–त्पुण्यमूर्त्येव मूर्तया ॥ भवत्या भगवत्योक्तं । तत्सर्वं सत्यमेव हि ॥ ७० ॥ परं क्षत्रियधर्मोऽयं । यत्प्रारब्धं शुभाशुभं ॥ सर्वं निर्वाहयेद्धीरः । कातरस्त्वंतरा त्यजेत् ॥ ७१ ॥ विधाय संधां प्रारब्धं । बंधुना युद्धमुद्धतं ॥ कथं कथय मुंचामि । त्वमेवेदं विचारय ॥ ७२ ॥ संग्रामे नो इमे गण्याः । पिता भ्राता सुतः सुहृत् ॥ क्षत्रियाणामयं धर्मः । सर्वशास्त्रनिरूपितः ॥ ७३ ॥ किंच–तेजोभरैकरूपाणां । स्वदेहोऽपि न दुस्त्यजः ॥ यतो निर्वाणमायाति । वह्निर्याति न शांततां ॥ ७४ ॥ बलाद्दुर्गं गृहीत्वेमं । प्रणम्य निजमग्रजं ॥ पश्चाद्राज्यद्धैश्वर्य—मपि दास्यामि बंधवे ॥ ७५ ॥ परं मातर्न वाच्यं मे—ऽधुना युद्धविमोक्षणे ॥ इत्युक्तं भूभुजा श्रुत्वा । साध्वी चेतस्यचिंतयत् ॥ ७६ ॥ बालबुद्धिरयं मानी । प्रारब्धं नैव मोक्ष्यति ॥ तद्गत्वा चंद्रयशसं । बोधयामि विवेकिनं ॥ ७७ ॥ वंदिता नमिराजेन । धर्मलाभं प्रदाय सा ॥ समुत्थाय ततः स्थाना—त्साध्व्यद्रिमभ्राशया ॥ ७८ ॥ यतिनीत्यनिरुद्धा सा । प्राविशन्नगरांतरे ॥ तत्क्षणं प्रत्यभिज्ञाता । चिरं प्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिचितैर्जनैः ॥ ७९ ॥ जनैश्चानुगम्यमाना । नम्यमाना नवैर्नवैः ॥ साध्वी मदनरेखा सा । राजमंदिरमासदत् ॥ ८० ॥ दृष्ट्वोपलक्ष्य सहसा । समुत्थाय ससंभ्रमः ॥ दत्तासनश्चंद्रयशाः । स्वसवित्रीं नमोऽकरोत् ॥ ८१ ॥ ऊचे च प्रांजलिर्मात—र्हते ताते शुचाकुले ॥ मयि त्वं क गता कुत्र । गृहीतं चार्हतं व्रतं ॥ ८२ ॥ ततः साध्व्या समस्तेऽपि । वृत्तांते कथिते नृपः ॥ अप्राक्षीत्सांप्रतं मात—र्मम भ्राता क तिष्ठति ॥ ८३ ॥ साध्व्याभाणि वेष्टयित्वा । पुरमेतत्स्थितोऽस्ति यः ॥ स तेऽनुजो महाराज । नमिः क्रमपराक्रमः ॥ ८४ ॥ श्रुत्वेति तत्क्षणं जात—हर्षोत्कर्षेण भूभुजा ॥ निवार्य संगराद् भृत्यान् । प्राचालीन्नमिसन्मुखं ॥ ८५ ॥ प्रीत्याभ्यायांतमाकर्ण्य । सोत्कंठं निजमग्रजं ॥ भक्त्या मुक्ताभिमानोऽथ । चचालाभिमुखं नमिः ॥ ८६ ॥ नमिर्नमाग्रांग आगत्य । पपाताग्रजपादयोः ॥ तेनाप्युत्थाप्य हस्ताभ्यां । गाढमालिंगितोऽनुजः ॥ ८७ ॥ जाता दर्शनमात्रेण । पूर्वषड्भवसंभवा ॥ स्फुटान्योन्यं तयोः प्रीति—र्भ्रातृभावोद्भवापि च ॥ ८८ ॥ भ्रातरौ कुंजरारूढौ । ददानौ दानमद्भुतं ॥ भवत्सूत्सववृंदेषु । पुरे प्राविशतामुभौ ॥ ८९ ॥ अहो शत्रू कथं जातौ । भ्रातराविति विस्मितैः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नागरैर्वीक्ष्यमाणौ तौ । राजांगणमुपेयतुः ॥ ९० ॥ एकीभूताविव प्रीत्या । सुदर्शनपुरे पुरे ॥ सहोदरावुभे राज्ये । पालयंतावतिष्टतां ॥ ९१ ॥ साधुः साधुपरीवारः । केवलज्ञानमंजुलः ॥ पुरोद्यानेऽन्यदायासीत् । सूरिराट् गुणसागरः ॥ ९२ ॥ तद्वंदनाय तत्कालं । जग्मतुर्भ्रातरावुभौ ॥ देशनां विदधे सोऽपि । धर्ममार्गप्रदीपिकां ॥ ९३ ॥ तत्क्षणं प्रतिबुद्धात्मा । श्रीमच्चंद्रयशा नृपः ॥ स्वराज्यं नमये दत्वा । सूरिपार्श्वे व्रतं ललौ ॥ ९४ ॥ पालयन् समयाचारमतिचारविवर्जितं ॥ कर्मारिमारणं कृत्वा । केवलज्ञानमासदत् ॥ ९५ ॥ विहृत्य जगतीपीठे । प्रतिबोध्य घनान् जनान् ॥ स राजर्षिश्चंद्रयशा । आरोहन्मोक्षमक्षयं ॥ ९६ ॥ साध्वी मदनरेखापि । कर्माण्युन्मूल्य मूलतः ॥ आसाद्य केवलज्ञानं । निर्वाणपदवीं ययौ ॥ ९७ ॥ पालयन्नथ साम्राज्यद्वयं नमिनरेश्वरः ॥ आक्रमत्स्वप्रतापेन । निखिलक्षोणिनायकान् ॥ ॥ ९८ ॥ सुदर्शनपुरे स्थित्वा । स्वयं राजा कियच्चिरं ॥ चिरं परिचितां बाल्यान्मिथिलां पुरमाययौ ॥ ९९ ॥ पश्चान्मंत्रिवरैर्मुक्तैस्तस्यैश्वर्यमबूभुजत् ॥ नमिर्नामितवैर्योघो । वीर्यादस्यादगंजितः ॥ ६०० ॥ पंचप्रकारविषयान् । भुंजानस्यास्य भूभुजः ॥ जयशेखरमुख्यास्तु ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बहवः सूनवोऽभवन् ॥ १ ॥ चिरात्पूर्वकर्मयोगा—न्नीरोगस्यापि भूपतेः ॥ अकस्माद्रजनी-
जागे । देहे दाहज्वरोऽजनि ॥ २ ॥ जनिता वैद्यसंदोहै—रुपचारपरंपरा ॥ मांत्रिकैर्मंत्रतं-
त्राश्च । तन्नियंत्रणहेतवे ॥ ३ ॥ परं कोऽपि गुणो नाभूत् । कर्मणः प्रातिकूल्यतः ॥ तस्मिन्नेवा-
नुकूले यत् । फलंत्येतेऽखिला अपि ॥ ४ ॥ षण्मासांतेऽन्यदा दक्ष—वैद्येनैकेन भूभुजः ॥ श-
रीरे चांदनः सेक । उपचारो निरूपितः ॥ ५ ॥ अष्टोत्तरसहस्रं या । अंतःपुर्यो नरेशितुः ॥
ताः स्वयं प्रियभक्त्याथ । चक्रुश्चंदनघर्षणं ॥ ६ ॥ परस्परास्फलन्नाना—वलयालिसमुत्थितः
घोरो रवो नमे राज्ञः । कर्णशूलमिव व्यधात् ॥ ७ ॥ दुःश्रवोऽयं रवो नो मे । रोचते श्रव-
सोरिति ॥ उदितो भूभुजावादी—दमात्योंतःपुरीपुरः ॥ ८ ॥ एकैकं वलयं बाहा—ववैध-
व्यस्य लक्षणं ॥ स्थापयित्वा तदन्यानि । सर्वाण्यपनयंत्वितः ॥ ९ ॥ तथा कृत्वा समस्तान्नि
स्तान्निश्चंदनघर्षणं ॥ सहर्षान्निरिवान्योन्यं । क्रियतेस्म निरंतरं ॥ १० ॥ स शृण्वन् घर्षणा-
रावं । न तादृग्दुःश्रवं रवं ॥ नृपोऽपृच्छदंतिकस्थं । स्थितो घोरारवः कथं ॥ ११ ॥ तेनोक्तं देव
देवीभि—र्वलयान्यखिलान्यपि ॥ एकैकं स्थापयित्वा ता—न्यपनीतानि पाणितः ॥ १२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्योन्यास्फासनाऽन्नावाद् । घोरो रावो न्यवर्तत ॥ श्रुत्वेति नमिराजेन । निर्व्याजेन विचिंतितं ॥१३॥ मिलिता वलयावल्य । आस्फलंति परस्परं ॥ दुःखदाश्च नवंत्येवं । संसारे सर्वजंतवः ॥ १४ ॥ वलयस्य यथैकस्य । दुःखदत्वं न कस्यचित् ॥ जीवस्यापि तथैव स्या—न्निःसंगश्चेदयं नवेत् ॥ १५ ॥ यथा यथा स्यात्प्रचुरः परिग्रह—स्तथा परीवारनरस्य संग्रहः ॥ लोनोऽनिमानः कलहस्तथा तथा । तथा च दुःखं परमं शरीरिणां ॥ १६ ॥ संसारसंगः परिमुच्यते यदा । वैराग्यरंगः परिवर्धते तदा ॥ तथा च पापारिपरिक्षयः क्षणात् । क्षीणे च तस्मिन् सुखमक्षयं नृणां ॥ १७ ॥ किं बहुना यदि कथमपि । रोगोऽयं मे निवर्तते देहात् ॥ तदिदं विहाय राज्यं । प्रव्रज्यामाश्रये जैनीं ॥ १८ ॥ इति राज्ञः शुनध्यान—सुधापाननिराकृतः ॥ ॥ उत्ततार ज्वरो दुःख—करो विषनरोपमः ॥ १९ ॥ चिरादासतसमाधान—श्चंदनलिप्तविग्रहः ॥ षण्मासांते तदा रात्रौ । निद्रामाप नरोत्तमः ॥ २० ॥ तस्यां विनातकल्पायां । रजन्यां नरनायकः ॥ प्रासादशिखरारूढ—मैक्षतात्मानमुज्ज्वलं ॥ २१ ॥ इति स्वप्नं समालोक्य । जजागार जयारवैः ॥ वर्यतूर्यनिनादैश्च । प्रातर्नमिनरेश्वरः ॥ २२ ॥ विचारयंश्चारुबु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्टिः । शुभस्वप्नावलोकनं ॥ सुनिश्चितमभूदस्य । फलमस्य विचार्यते ॥ २३ ॥ अचिरान्नन्वहं लोक—प्रासादस्यास्य मस्तके ॥ आरोहणं करिष्यामि । गतपापमलोज्ज्वलः ॥२४॥ यादृशोऽद्य मया स्वप्ने । प्रासादः परमोत्तमः ॥ विलोकितस्तादृगेव । दृष्टोऽभूत्पूर्वमप्यहो ॥ २५ ॥ इत्येवं स्मरतो राज्ञो । जाता जातिस्मृतिः क्षणात् ॥ सर्वे पूर्वभवा दृष्टाः । षडप्यत्र निवेदिताः ॥ २६ ॥ चिंतितं च महाशुक्रे । देवलोके विलोकितं ॥ पुष्पोत्तरविमानं यत् । प्रासादः स समीक्षितः ॥ २७ ॥ क्व तद्दैवं सुखं क्वेदं । क्व सिता सिकता क्व च ॥ क्व क्षीरं क्षारनीरं क्व । क्व रत्नं क्व च कर्करः ॥ २८ ॥ कल्पेऽत्रानल्पसंकल्प—मात्रलभ्यं चिरं सुखं ॥ भुक्त्वा तृप्तो न यो जीवः । स तृप्यत्यधुना कथं ॥ २९ ॥ तद्विहायाखिलं नानो—पद्रवोपयुतं द्रुतं ॥ श्रित्वा सत्संयमाचारं । प्राप्नोमि शिवमव्ययं ॥३०॥ शुद्धबुद्ध्या विचार्येति । तदैवोत्सवपूर्वकं ॥ लक्ष्मीप्राज्ये निजे राज्ये । पुत्रं प्रातिष्ठपन्नृपः ॥ ३१ ॥ गत्वोद्यानवनं राजा । नमिर्निःसंगमानसः ॥ बुद्धो वलयदृष्टांते—नार्हतं व्रतमाददे ॥ ३२ ॥ तथा चोक्तं—बहूणं सद्दयं सोच्चा । एगस्स य असद्दयं ॥ वलयाणं नमीराया । निक्खंतो मिहिलाहिवो ॥ ३३ ॥ निःसं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गो देवतादत्त—लिंगोऽनंगोच्छ्रितांगकः ॥ राजर्षिर्नमिरन्यत्र । विहर्तुं प्राचलत्ततः ॥३४॥ राज्यं विदधता प्राज्य—गुणावर्जितमानसाः ॥ सकला मिथिलालोकाः । सशोका जज्ञिरे तदा ॥ ॥ ३५ ॥ वह्लन्तो विलपंतिस्म । नमिमार्गानुगा इति ॥ त्वदेकनाथा हे नाथ । त्विहायास्मान् क गच्छसि ॥ ३६ ॥ अज्ञानाद्विहितं कंचि—दपराधं क्षमस्व नः ॥ प्रणिपातेन तुष्यंति । विपक्षेष्वपि सत्तमाः ॥ ३७ ॥ लोका अपि सशोकांतः—करणाः करुणस्वरं ॥ रुदंतो विलपंतश्चा—न्वगच्छन्नमिसन्मुखं ॥ ३८ ॥ इत्यालापैर्विलापैश्च । पाषाणमपि भेदकैः ॥ वज्राभेद्यं नैव भिन्नं । मनागपि मुनेर्मनः ॥ ३९ ॥ तत्ताहृगवधिज्ञाना—त्सौधर्मेंद्रो व्यलोकयत् ॥ अचिंतयदहो किंचि—न्निर्ममत्वं नमेर्महान् ॥ ४० ॥ तदितः सांप्रतं गत्वा । कृत्वा तस्य परीक्षणं ॥ ॥ प्रणम्य रम्यधैर्यं तं । समायामि स्वसद्मनि ॥ ४१ ॥ एवं विचिंत्य सौधर्मा—धिपतिर्देवलोकतः ॥ एत्येति मिथिलापुर्यां । विचक्रे देवमायया ॥ ४२ ॥ अकस्मान्नमिराजस्य । वैरिणो निखिला अपि ॥ एत्योत्पाटितशस्त्रौघा । मिथिलामुदवेष्टयन् ॥ ४३ ॥ मार्यतामरिसंघातो। म्रियतामपरे जनाः ॥ लुंट्यतां पुरसर्वस्व—मिति शत्रुपतिर्जगौ ॥ ४४ ॥ ततः प्रविश्य पुर्यंत—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नमिगृह्यान् महाभटान् ॥ निगृह्य गृह्यतेऽस्माशु । सर्वस्वमपि शत्रुभिः ॥४५॥ ततस्तैः सकला शाशु । ज्वालितो ज्वलनो घनं ॥ ततः सर्वा पुरी जज्ञे । ज्वालामालाकरालिता ॥४६॥ शिशवो रोदनं चक्रु-र्विलपंतिस्म योषितः ॥ नरा हाकारपूत्कारान् । विविधान् विदधुस्तदा ॥ ॥ ४७ ॥ हा नमे भूपतेऽस्माकं । स्वामिनि त्वयि सत्यपि ॥ गृह्यतेऽस्मारिभिः सर्वं । दह्यते वपुरप्यथ ॥ ४८ ॥ अतो नृप कृपां कृत्वा । रक्ष रक्ष कृतादितः ॥ इत्यारवोऽभवद् घोर—स्तथा बुंबारवः पुरे ॥ ४९ ॥ अथारिसैन्यनाथेन । प्रोक्तं रे सांप्रतं नमिः ॥ जीवन् बध्ध्वा समानेयः । स कुत्रास्त्यत्र नेक्ष्यते ॥ ५० ॥ एकेनोक्तं महाराज । त्वत्तो भीतो नमिः पुरं ॥ विहायांतःपुरं सर्व—मादाय प्रपलायितः ॥ ५१ ॥ तेनोक्तमनुगच्छंतु । रेरे धृत्वानयंतु तं ॥ उत्पाटितकराबाला । अन्वधावंस्ततो भटाः ॥ ५२ ॥ कियद्दूरं प्रयासि त्व—मन्वायाता इमे वयं ॥ अद्यैव स्फोटयिष्यामो हृदयं । तव मा व्रज ॥ ५३ ॥ मुषिता श्रीस्त्वयास्माक—मोषिताश्च वयं वने ॥ त्वया तथा कथाशेषी—कृता नोऽशेषपूर्वजाः ॥ ५४ ॥ तत्सारोऽवसरोऽस्माभि—श्चिरादयमवाप्यत ॥ अथास्माकं कृतं पश्य । पश्यन्नपि विनश्यसि ॥ ५५ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

इति जल्पंत आटोपा—त्सुभटा विकटार्चिषः ॥ धावंतस्ते क्रुधा तूर्ण—माजग्मुर्नमिसन्निधौ
॥ ५६ ॥ नापराध्यप्ययं नीत्या—हतश्रमणवेषभृत् ॥ हन्यः क्षत्रैर्निहंतव्यो । युध्यमानो हि
सन्मुखं ॥ ५७ ॥ करालकरवालेन । निघ्नन्नेको मुनीश्वरं ॥ समागत्यांतरैकेन । वदतेति
निवारितः ॥ ५८ ॥ युग्मं ॥ हा नाथ रक्ष रक्षेति । विलपंत्यो नृपाग्रतः ॥ अंतःपुर्यो बला-
न्नीता । धृत्वा केशेषु तैर्भटैः ॥ ५९ ॥ स्वरूपस्थेऽपि सर्वस्मि—न्नंतःपुरपुरादिके ॥ श्रीमन्न-
मिपरीक्षायै । दर्शयित्वेति मायया ॥ ६० ॥ कुपितोऽयं मुनिः किंचि—च्छुद्धश्रद्धोऽभवन्न वा
॥ अवधिज्ञानतः स्वर्ग—लोकस्वामीत्यलोकत ॥ ६१ ॥ अंतःपुरीपुरीराज्य—राष्ट्रादिक-
मिदं मया ॥ त्यक्तं तदस्य का चिंता । निर्ममस्य ममाधुना ॥ ६२ ॥ त्यक्तस्य नोचिता चिंतो
—पभुक्तस्याप्यमुष्य मे ॥ कुर्कुरैर्भक्ष्यमाणं हि । वांतं को नाम रक्षति ॥ ६३ ॥ एवं विचिं-
त्य निश्चिंतं । गच्छंतं पथि निःस्पृहं ॥ इंद्रो मुनींद्रमद्राक्षीद् । ज्ञानान्निःक्रोधमानसं ॥ ६४ ॥
अथाकंपितचित्तस्य । क्षोभं कर्तुमना मुनेः ॥ हरिः पुनः समायासी—द्विप्ररूपधरस्तदा ॥
॥ ६५ ॥ ऊचे चेति महासत्व । मिथिलेयं पुरी परैः ॥ दह्यते गृह्यते चैत—त्त्वत्पुरांतःपुरं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परं ॥ ६६ ॥ तत्तेऽधुना गतं नूनं । धैर्यं वीर्यं वरं च तत् ॥ अन्यथा कथमेतादृक् । प्रत्यक्षं त्वमुपेक्षसे ॥ ६७ ॥ नमिरुवाच—नगर्यां दह्यमानायां । मम किंचिन्न दह्यते ॥ मम किंचिद्धि पद्मैर्मे । गृह्यते च न किंचन ॥ ६८ ॥ येऽर्जिताः शक्रचक्रग्रथा । विश्वे विश्वविडंबकैः ॥ तेषां कर्मविपक्षाणां । हननेऽहं समुद्यतः ॥ ६९ ॥ तन्मे धैर्यं च वीर्यं च । संप्रत्येवोदितं द्विज ॥ इंद्रः—प्रत्यक्षस्ते परीवारो । हन्यते पश्य शत्रुभिः ॥ ७० ॥ नमिः—अनुकूलोऽनुचारी च। तात्त्विको हितकारकः ॥ धर्मो मेऽथ परीवारो । हन्यते न स केनचित् ॥ ७१ ॥ मित्रपुत्रकलत्रादि—परिवारो न तात्त्विकः ॥ सर्वः स्वार्थपरो लोकः । सशोकश्चात्मचिंतया ॥७२॥ गते मृते हृते पुंसि । सर्वः स्वार्थं हि रोदिति ॥ तस्माद्धर्मेतरः कोऽपि । संसारे न स्वकः खलु ॥ ७३ ॥ इंद्रः—आर्त्तो भीतो भवेद्रक्ष्यः । परोऽपि किं पुनर्निजः ॥ आरक्षकस्तवैवं हि । क्षात्रो धर्मोऽपि हीयते ॥ ७४ ॥ नमिः—रक्षयित्वांतरंगारे—रात्मानमुपदेशतः ॥ रक्षणीयो जनोऽप्येष । क्षात्रो धर्मोऽस्ति तात्त्विकः ॥ ७५ ॥ धर्मो जीवदयामूलः । सर्वज्ञैः प्रतिपादितः शत्रूणां हननेऽमीषां । स विनश्यति न क्षणं ॥ ७६ ॥ इंद्रः—एतेषां निघ्नतां लोकान् । सत्यां

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

शक्तावुपेक्षणे ॥ दयामूलोऽपि धर्मस्ते । क्षीणः क्षत्रियसत्तम ॥ ७७ ॥ नमिः—इमे नाम स्व-
का लोका । वैरिणोऽपि न केचन ॥ समता मे समस्तेषु । ममतामुक्तचेतसः ॥ ७८ ॥ त-
त्केषु करुणां कुर्वे । हन्मि कान् हेतुवर्जितः ॥ इंद्रः—सकृपोऽनेकलोकघ्नान् । वैरिणोऽमून्
विनाशय ॥ ७९ ॥ अनल्पप्राणिरक्षा स्या—द्यस्मिन्नल्पे विनाशिते ॥ पापं न जायते किंचि
—त्तद्विनाशविधायिनः ॥ ८० ॥ नमिः—एकेंद्रियादिजीवाना—मनंतानां विनाशकाः ॥ संत्यमी
जंतवः सर्वे । हंतव्यास्तर्हि तेऽखिलाः ॥ ८१ ॥ तस्माच्चैत्यादिविध्वंस—विधायिजनवर्जिते ॥
प्राणिवर्गे समग्रेऽपि । कृपा कार्या विचक्षणैः ॥ ८२ ॥ इंद्रः—अधुना संपदा प्राज्यं । राज्यं
त्यजसि हेलया ॥ पश्चात्तापं पुनः पश्चा—त्सुखाकांक्षी करिष्यसि ॥ ८३ ॥ यतश्चिरं श्रितच्छाय
—स्तपनातपमिच्छति ॥ तप्तकायः पुनश्छाया—मेवाश्रायितुमीहते ॥ ८४ ॥ नमिः—दुःखगर्भित-
तवैराग्या—न्नवेदेवं चलं मनः ॥ ज्ञानगर्भितवैराग्यं । चिरं संपद्यते स्थिरं ॥ ८५ ॥ तन्मे जा-
मतो विप्र । मनागपि मनो न हि ॥ भोगिभोगोपमान् भोगान् । रोगानिव समीहते ॥
॥ ८६ ॥ इंद्रः—दीनदुःस्थितसाधुभ्यो । दिशन् दानं यथेप्सितं ॥ गृहिधर्मं समाराध्य । स-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

जस्व शिवमव्ययं ॥ ७७ ॥ नमिः—आरंभाज्जंतुसंघात—घातको हि धर्मवान् ॥ सर्वारंभवि-
मुक्तेन । साधुना तुलयेत्कथं ॥ ७८ ॥ मेरुसर्षपयोर्यादृक् । वार्धिगोःपदयोर्यथा ॥ अंतरं ता-
दृशं विद्धि । गृहस्थयतिधर्मयोः ॥ ७९ ॥ एवमादिप्रकारेण । विवादं सुरशेखरः ॥ विधाया-
वधिनाद्राक्षी—च्चेतोवृत्तिं मुनीशितुः ॥ ८० ॥ ज्ञात्वा निश्चलस्वांतं । तं मुनिं निर्जरेश्वरः ॥
परिहृत्याखिलां मायां । स्वरूपं प्रकटं व्यधात् ॥ ८१ ॥ प्रणिपत्य सत्यभक्त्या । मया मायां
विधाय भोः ॥ खेदितोऽसि परीक्षायै । तत्क्षमस्व क्षमानिधे ॥ ८२ ॥ उक्त्वेति स्तोतुमारेभे
। नमिं भिन्नभवभ्रमिं ॥ समं स्तुतौ च निंदायां । निरहंकारमानसं ॥ ८३ ॥ तथाहि—जय
मेरुधराधरधीरचित्त । जय जीवदयापर मुक्तवित्त ॥ जय सत्वसमुद्र गुणैकपात्र । जय संसृ-
तिसागरयानपात्र ॥ ८४ ॥ जय मुक्तिसुयोषिति बद्धराग । जय पातकपादपभंगनाग ॥ जय
जंगमकल्पतरूपमान । जय मानविवर्जितदत्तदान ॥ ८५ ॥ जय पादपवित्रितभूमिभाग ।
जय निर्ममानस मुक्तराग ॥ जय शोभनबुद्धिविशुद्धकाय । जय गंजितमन्मथमोहमाय ॥
॥ ८६ ॥ जय सर्वसुपर्वविनम्यपाद । जय तर्जितगर्जितधीरनाद ॥ जय कर्मरिपूच्चयचूरणेश ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जय संयमसार नमे मुनीश ॥ ८७ ॥ इत्थं स्तुत्वा नमिमुनिवरं देवराजः स्वभक्त्या । नत्वा तस्य स्मृतिकृतिपरो धाम सौवं जगाम ॥ राजर्षिश्च प्रशमिततमाः शांतचित्तः प्रवृत्तः । कर्तुं सारानवनिवनिताहृत्सुहारान् विहारान् ॥ ८८ ॥ इति श्रीप्रत्येकबुद्धचरित्रे तृतीयप्रस्तावे नमिसप्तभववर्णनो नाम चतुर्थः प्रकाशः समाप्तः ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादच्छटाधरितदिव्यसुधासमूहम् ॥
संसारकाननतटे भ्रमतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितम् ॥२॥ युग्मं
चारित्रपूर्वा विजयाभिधाना। मुनीश्वराः सूरिवरस्य शिष्याः ॥
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छमुनेतु रेते ॥ ३ ॥

---

आ ग्रंथ श्रीजामनगरनिवासि पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेय माटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीप्रत्येकबुद्धचरित्रं समाप्तं ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust